Shree Raghunath Sanskrit Research Institute Library,
Jammu

No. २८०२१ महाभारते ।

Title भगवद्गीता १८ टीकासहिता
११ दशाध्यायः

Author श्रीसदानन्द व्यासः

Extent २०५ Age

Subject वेदान्तशास्त्रं

26

8781
F. 17+184+10+195
57, 58 after 65. 85 after 77
Double nos. 6, 90, 12, 48, 84, 10, 73, 10, 332, 347
Wanting. 65
Complete

एकादशोध्याय

शांकरभाष्य
आनंदगिरिकृतटी.
श्रीधरी स्वामिकृता
पिशाचभाष्य
रामानुजभाष्य
अभिनवगुप्ती
परमार्थप्रपा
वनमाली
उत्तमवैजयन्ती
मधुसूदनी
सदानंदी
नीलकंठी
आनंदी
रामकंठी
लासिकी
पंचोली ॥

भाषा अनुवाद ॥

अर्जुन उवाच मदनुग्रहाय परमं गुह्यम
ध्यात्मसंज्ञितं यत्त्वयोक्तं वचस्तेन मोहो
ऽयं विगतो मम १

शांकरभाष्यं १

भगवतो विभूतय उक्तास्तत्र च विष्टभ्याहमिदं कृत्स्नमेकां
शेन स्थितो जगदिति भगवताभिहितं श्रुत्वा यज्जगदात्मरू
पमाद्यमैश्वरं तत् साक्षात् कर्तुमिच्छन्नर्जुन उवाच मदनुग्रहा
र्थं परमं निरतिशयं गुह्यं गोप्यं अध्यात्मसंज्ञितमात्मानात्मविवेक
विषयं निरतिशयं यत्त्वयोक्तं वचो वाक्यं तेन वचसा मोहोऽयं वि
प^ गतो ममाविवेकबुद्धिरपगतेत्यर्थः १

आनन्दगिरिकृतटीका २

तेन तेनात्मना भगवदनुसन्धानार्थमुक्ता विभूतीरनुवदति भ
गवत इति परस्य सोपाधिकं निरुपाधिकञ्च चिद्रूपं ध्येयत्वेन
ज्ञेयत्वेन चोक्तमित्यर्थः सोपाधिकमैश्वरं रूपमशेषजगदात्मकं ^ गप
विश्वरूपाख्यमधिकृत्याध्यायान्तरमवतारयन्ननन्तरश्लोकस्योपयो^
गित्वेन हेतुं कीर्तयति तच्चेति यदेतदशेषप्रपञ्चात्मकमखिल प^
स्यैतस्य जगतः कारणं सर्वज्ञं सर्वैश्वर्यवद्रूपमुक्तं तदिदं श्रु
त्वा तस्य साक्षात्कारं पियाचयिषुरादौ दृष्टवानित्याह श्रुत्वेति म
यि करुणां निमित्तीकृत्योपकारोऽनुग्रहस्तदर्थमिति वचसो विशे
षणं निरतिशयत्वं परमपुरुषार्थसाधनत्वं अशोच्यानित्यादिवप
हार्थप्रधानवाक्यं मोहस्यायमित्यात्मसाक्षिकत्वं दर्शयति १

स्वामिकृतटीका ३

विभूतिवैभवं प्रोच्य कृपया परया हरिः दिदृक्षोरर्जुनस्याथ विश्वरूप
मदर्शयत् पूर्वाध्यायान्ते विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जग
त् इति विश्वात्मकं पारमेश्वररूपमुपक्षिप्तं तद् दिदृक्षुः पूर्वोक्तमभि
नंदन् अर्जुन उवाच मदनुग्रहायेति त्रिभिः ममानुग्रहाय शोक
निवृत्तये परमं परमार्थनिष्ठं गुह्यं गोप्यमप्यध्यात्म संज्ञितं

श्री॰
गी॰ टी॰
५

आत्मानात्मविवेकविषयं यत्त्वयोक्तं वचः अशोच्यानन्वशोचस्त्वं प्र
ज्ञावादांश्च भाषसे इत्यादि षष्ठाध्यायपर्यंतं यदुक्तं तेन ममायं मोहो
ऽहं हंता परैर्हतश्चाहमित्यादिलक्षणो भ्रमो विगतो विनष्टः आत्मनः क
र्तृत्वाद्यभावोक्तेः १

पैशाचभाष्यम् ४

एवं भगवन्मुखोक्तं तेषु विस्तराध्यायेषु विभूतिं श्रुत्वा परं रू
पं द्रष्टुकामोऽर्जुन उवाच मदनुग्रहायेति अध्यात्मसंज्ञितमध्यात्म
प्रतिपादकं वचनमध्युपचारेणाध्यात्मसंज्ञितमित्युच्यते १

रामानुजभाष्य॰ ५

एवं भक्तियोगनिष्पत्तये तद्विवृद्धये च सकलेतरविलक्षणेन स्वा
भाविकेन भगवदसाधारणेन कल्याणगुणगणेन सह भगवतः
सर्वात्मत्वेन तदितरस्य कृत्स्नस्य चिदचिदात्मकस्य वस्तुजा
म॰ तस्य तच्छरीरतया तदायत्तस्वरूपस्थितिप्रवृत्तित्वं चोक्तं तदेवं भग
वदसाधारणस्वभावं कृत्स्नस्य तदायत्तस्वरूपस्थितिप्रवृत्तितां च भ
गवत्सकाशाच्छ्रुत्वा एवमेवेति च निश्चित्य तथाभूतं भगवंतं सा
क्षात्कर्तुकामोऽर्जुन उवाच तथैव भगवत्प्रसादादनंतरं द्रक्ष्यति
सर्वाश्चर्यमयं देवमनंतं विश्वतोमुखं तत्रैकस्थं जगत्कृत्स्नं प्र
विभक्तमनेकधेति मदिति देहात्माभिमानरूपमोहेन मोहित
स्य ममानुग्रहैकप्रयोजनाय परमं गुह्यं परमरहस्यमध्यात्मसंज्ञि
तमात्मनि वक्तव्यं वचः न त्वेवाहं जातु नासमित्यादि तस्माद्योगी
ने॰ भवार्जुनेत्यंतं यत्त्वयोक्तं तेनायं ममात्मविषयो विमोहः सर्वो वि
गतः दूरतो निरस्तः १

अभिनवगुप्तकृतटी॰ ६

समनंतरेणाध्यायेन यद्यवार्थ्युक्तं तत्त्वमेव प्रत्यक्षीकर्तुमर्जुनः पृ
च्छति स एव चायमुपयमः योऽसुपदेशक्रमेणार्थो विगतः स एव
प्रमत्तसंविदा परिकलमानः स्फुटीभवतीति तदर्थमेवेयमुक्तिप्रत्य
क्षीक्रियते ॥ १ पश्य मे पार्थ रूपाणि इत्यादि तमसः परमे वेदितव्यमित्यंतम् ॥ १ ॥

परमार्थप्रपाटीका १

श्रीधराचार्यांतेविष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदित्युक्ते तर्हि
६॰ तादृशं रूपं कीदृशं विश्वात्मनिति द्रष्टुमपेक्षमाणोऽर्जुनः प्रार्थयन्पृच्छति म

दनुग्रहायेति वचनैर्भिः ममानुग्रहाय शोकनिवृत्तये परमं रहस्यं गुह्यं
गोप्यमध्यात्मसंज्ञितमात्मानात्मविवेकरूपं दहीति मम व्याख्यायमि
तितथाश्रुत्वा कं वक्तिमापन्नमिति तथा मया ततमिदं विश्वमिति तथा
ममोहं सर्वभूतेष्वित्यादियद्वचः ...के ते न मे मोहोऽविगतः निःशेषो
गतः १

वनमालीटीका १

पूर्वाध्याये नानाविभूतीरुक्त्वा विष्टभ्याह मिदं कृत्स्नमित्यादिना
सर्वव्यापकमैश्वरं रूपमुक्तं श्रुत्वा परमोत्कंठितस्तत्साक्षात्कर्तुका
मोऽर्जुनः पृच्छति मदिति पूर्वषट्के मामनुगृहीतमात्मत्वात्तदुपा
यकमं समाधियोगमपि निगृहं कं परमं गोप्यमात्मपरमात्मविषयत्वा
दध्यात्मसंज्ञितं यद्वचस्त्वयोक्तं तेन वाक्यवादिविषयो मोहोऽपि नष्टः १

[illegible]वैजयन्तीटीका १

एकादशे विश्वरूपमर्जुनायैत्त यद्धरिः तेन स्तुतः पुनः सौम्यस्वरूपो
ह भूदितीर्यते दशमेऽध्याये मामात्मा गुडाकेश सर्वभूताशयस्थितः वि
ष्टभ्याहमिदं कृत्स्नमित्युपक्रमोपसंहाररूपाभ्यां चेतनाचेतनात्मकस्य
सर्वस्य जगतो भगवत्स्वरूपत्वं भगवतोक्तं तत्तमेव विश्वात्मक
भगवत्स्वरूपं द्रष्टुकामोऽर्जुनः स्वसारथिं भगवंतं पृच्छति वचनैर्भिः
मदनुग्रहायेति मदनुग्रहाय मम शोकमोहापनयनाय निवृत्तये परमं प
रमार्थविषयं गुह्यं गोप्यं वदितरदेवाद्यगोचरं अध्यात्मसंज्ञितं देहात्मविष
यकं अशोच्यानन्वशोचस्त्वमित्यादि विष्णुध्यानं केनवचः यद्वाक्यं त यो
या सर्वेश्वरेण सर्वज्ञेन मन्निमित्तं लोके पूर्वं कथितं तेन वचसा मम त्व
मसात्त्वलध्यात्मज्ञानस्याधं बुद्धिस्थितो मोहो देहएवात्मेत्याकारक
सर्व आत्मविषयो भ्रमो विगतो विशेषेण दूरतो निरस्तः १

मधुसूदनी टीका १

पूर्वाध्याये नानाविभूतीरुक्त्वा विष्टभ्याहमिदं कृत्स्नमेकां
शेन स्थितो जगत् इति विश्वात्मकं परमेश्वररूपं भगवताभिहितं
श्रुत्वा परमोत्कंठितस्तत्साक्षात्कर्तुमिच्छन्पूर्वोक्तमभिनंदन्म श्रुत्वार्जुनउवाच
दनुग्रहाय शोकनिवृत्त्युपकाराय परमं निरतिशयपुरुषार्थप्रका
शकं गुह्यं गोप्यं यस्मै कस्मैचिद्वक्तुमनर्हमपि अध्यात्मसंज्ञितमध्यात्मामि
तिशब्दितमात्मानात्मविवेकविषयं अशोच्यानन्वशोचस्त्वमित्यादि
षष्ठाध्यायपर्यंतं त्वया यद्वचः परमकारुणिकेन सर्वेश्वे

नोक्तं वचो वाक्यं तेन वाक्येनादं मे मोहं नाम मयैतेह त्वत्तोऽस्मादि विविध
विपर्यासलक्षणो मोहोऽयमनुभवसाक्षिको विगतो विनष्टः मम तत्र
श्रुतस्य कृतात्मनः सर्वविक्रियाशून्यत्वेनोक्तेः १

सदानंदी टीका १ ११

सदालम्बावासे सकलमुनिवृंदे स्तवनिधौ महाभागे पार्थे यदुविदुरणम
करे देसममितिद विधीशाशास्त्राधिकुशयवमाविकरनिपदमनोभगो
मे श्रीहरिपदसरोजे प्रविशतु १ पूर्वाध्याये विभूतीः स्वाः प्रोच्यातेश्री
कवानिति विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् २ इति विश्वा
त्मकं रूपं स्वस्य भगवतेरिति तस्मात्तत्कृतकामः सम्पूर्णकमभि
नंदति ३ अर्जुनो भगवद्भक्तिविशुद्धान्तर्मनायतः ममैशाकनिहस्म
र्थे वाक्यं गोप्यत्वयेरितं ४ यदुक्तः कृष्णफले मोत पर्यवसायि सर्वथा
आत्मानात्मविवेकैकविषये संशयापहं ५ तेन मोहो विनष्टो मे दे
हाद्यध्यासलक्षणः अशेषाध्यानत्वभेशावत्तसिमारभ्य विवेचनं ६ ष
ष्ठाध्यायान्तमेवोक्तं तत्पदार्थस्य मुख्यतः तेन हेतावहमेते घातहं मे तेते
मयेति च ७ मोहो नष्टोऽक्रियं कूटस्थात्मानमजरामरं तथैव स
प्तमाध्यायादारभ्य दशमान्ततः ८ तत्पदार्थो विनिर्णीतः श्रीहरे
र्वचसा स्फुटः कृत्स्नं पादारविंदे यन्मानमेष उपादायते ९ मायाहरम
यात्नीर्णातेन स्यतेन निश्चितं १० [illegible]
[illegible]
[illegible]
[illegible]
[illegible]

नीलकंठी टीका १२

पूर्वस्मिन्नध्याये योगो विभूतिश्च व्याख्येयत्वेन प्रतिज्ञातौ एतौ विभू
तियोगं च मम यो वेत्ति आत्मनो योगं विभूतिं च जनार्दन भूयः
कथयेति तत्रेण च श्रोतव्यत्वेन प्रार्थितौ तत्र अहमात्मा गुडाकेश स
र्वभूताशयस्थित इति सर्वेषां योगो भगवतः सर्वभूताधारत्वल
क्षणः उक्तः प्राग्विभूतिकथनात् तदंते च विष्टभ्याहमिदं कृत्स्नमे
कांशेन स्थितो जगदिति कृत्स्नेन धाम्नामिव मयेदं जगद्विष्टब्धमि
त्युक्तम् एवं स्मारितस्तदेव भगवतः सर्वभूताधारत्वं साक्षात्कर्तुं

॥ ॥ ॥

कामोऽर्जुन उवाच मदनुग्रहायेति मय्यनुग्रहोऽनुकंपा तदर्थं मदनु
ग्रहाय परमं सर्वशोकमोहनिवर्तकत्वेन उत्कृष्टं गुह्यं गोप्यं अध्या
त्मसंज्ञितं आत्मानात्मविवेकार्थं शास्त्रं अध्यात्मतत्संज्ञितं यत्त्वयाव
चः अशोच्यानन्वशोचस्त्वमित्यादिना षष्ठाध्यायपर्यंतेन पदार्थशुद्धिप्र
धानेनायं हंति न हन्यत इत्यात्मनोऽकर्तृत्वाभोक्तृत्वप्रतिपादकेन
न मम मोहः अविवेकोयं विशेषेण गतो नष्टः अत्र प्रथमे पादेऽग
णाधिकमार्षं ॥ २॥

आनंदटीका

एवं चतुरंशास्येश्वरस्य प्रकृतिपुरुषाधिष्ठापिष्टानेन विश्वात्मतां विविक्षि
त्सप्राग्गतिनस्यकालस्वरूपस्य परीप्सार्थमर्जुन उवाच अध्यात्मसंज्ञितं पर
मात्मविषयज्ञानं यत् मोहोयमनात्मन्यात्मबुद्धिः १

रामकंठटीका

अथाध्यायदशकेन भगवदुपदिष्टज्ञानविज्ञानश्रवणेन समस्ताभिधेयवस्त्वव
वगमात्तादेव भगवतः परमेश्वरत्वावगमात्तस्य परमकारणत्वेन तदुक्तेव
चसि यथोक्तफलाविसंवादकतया प्रकृष्टोपायत्वेन निश्चितं संदेहमात्मान
मावेदयं स्तुतिमात्रप्रतिपत्तितन्मात्रादर्शनेच्छुर्वैरिमोऽर्जुन उवाच मदनु
ग्रहाय मामनुगृहीतुं निजयापरशक्त्या प्रबोधयितुं तयापरमेश्वरत्वं स्वयं
प्रतिपादितस्वभावेन यद्वचनमध्यायदशकात्मकं वाक्यमध्यात्मसहितमा
त्मविषयज्ञानमयमतएव परमं गोप्यं प्रकृष्टं रहस्यमुक्तम् उपदिष्टं तेन हेतु
भूतेनायं सर्वजनक्षीरकारणस्थितो मोहः प्रतिपादितपरमार्थप्रति
पत्त्यान्यथा प्रतीतिलक्षणो मम विगतो व्यपगतः १

[illegible]टीका

एवं दशमेनाध्यायेन भगवन्नारवादेश्वरयोगप्रवेशसोपानभूता विभूतीः
सम्यक् श्रुत्वा अधुना विस्तरेणात्मनो योगविभूतिं च त्वादिनायं स्मर अपि भ
गवतैकादशाध्यायेन विश्वरूपविषयानुत्तरेतं महाज्ञानं स्वरूपमैश्वरं योगं सोसा
क्षात्कर्तुं पूर्वोक्तमभिनंदन्नर्जुन उवाच मदनुग्रहाय मामनुगृहीतुं परमं गुह्यं प्रकृ
ष्टं रहस्यमध्यात्मसंज्ञितम् आत्मनएवं स्वरूपस्य तत्स्वरूपतया नित्यं गमयापि २
मतः सर्गादिभावाधिकारिलाभाय ममैश्वर्यापरपर्यायमहमिदमीत्येवं ल

त्तरणेवा अहमादिर्हि देवानामहं सर्वस्य प्रभवइत्यादि यद्वचस्त्वया सर्वज्ञेनोपदिष्टम् तेन हेतुभूतेनायं जगद्वैचित्र्यविषयो मोहस्त्वत्प्रतिपत्तिः किंकारणकमेतद्वैचित्र्यमित्येवंरूपो विगतो नष्टः १।

पंडोलीटीका

विभूतिवैभवं प्रोच्य अध्याये ते विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्। इति भगवता यज्जगदात्मरूपमात्मैश्वरं रूपमभिहितं तत्साक्षाच्चिकीर्षुः पूर्वोक्तमभिनंदन् अर्जुनउवाच मदनुग्रहायेति हे कृष्ण त्वया मदनुग्रहाय ममानुग्रहार्थं यत्परमं निरतिशयं गुह्यमध्यात्मसंज्ञितं ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः संपन्नं विश्वस्वरूपविषयमात्मानात्मविवेकविषयं वचः वाक्यं उक्तं तेन मम अयं मोहः अविवेकः विगतः अपगतः १

भक्तदीसमुद्बोधिनी

भगवद्भक्तियुक्तस्य रणवीरमहीभुजः आकल्पमस्तु तद्दिष्ट्यारूपदर्शनतः स्थितिः। अस्य सकलजन विभूतिमद्भगवद्वाक्यश्रवणात् स्वविषया स्वधर्मानुकूलकृतार्थतां निश्चित्येदानीमत्यद्भुतमैश्वरं रूपं दिदृक्षुरर्जुनः प्रार्थनापूर्वकमुपक्षिपति भगवंतं प्रत्याह मदनुग्रहायेति मदनुग्रहाय मय्यनुग्रहो मदनुग्रहस्तस्मै निमित्तभूताय यद्गोप्यं प्रत्यनुग्रहं कर्तुमध्यात्मसंज्ञितमात्मानं तेऽभ्रमयि कृत्य संज्ञितं चेष्टया ज्ञापितं संज्ञा स्याच्चेतनानामदृष्ट्यापे रर्थसूचनेत्यनुशासनात् परमं परार्ध्यं मुमुक्षूणामत्यन्तेनेति परमं गुह्यस्येतिचोदनानुकूलं अतएव गुह्यं रहस्यं वचस्त्वयोक्तं मह्यं तेनैव वचसा कथं भीष्ममहं संख्ये इत्याद्युक्तलक्षणः प्रतिकूलव्यापारोऽयमेव मोहो विगतो मम विमूढस्यापि मे विगतः प्रणष्टोऽधुनैव संजाताध्यात्मविवेकोऽहमस्मीति भावः १॥

मधुभाष्य

१॥

भाषा अनुवाद

श्रीभगवान कृष्णचन्द्र अति कृपा करके अपनी विभूति का
विभव कहा और सो सुनि के दर्शनेच्छु अर्जुन का विहस्था
ह मिदं कृत्स्न मे कांक्षेन स्थितो जगदित्यादि श्लोक से भगवा
न ने विश्वात्मक परमेश्वर स्वरूप प्रसंग वशाते दिखाया तो
अर्जुन भगवद्भक्त एवं वचनों की प्रशंसा करते हुये अब एका
दश अध्याय के आरम्भ मे चारि श्लोक से कहते हैं कि अशोच्या
नन्वशोचस्त्वमित्यादि दूसरे अध्याय के ग्यारहें श्लोक से ले कर
छठें अध्याय तक मेरे शोक निवृत्ति के अर्थ परमात्मनिष्ठ
अति गोपनीय आत्म अनात्म विचार के जो वचन आपने कहा
उन से हम हन्ता और ये शत्रु गण मारने योग्य ऐसो जो मेरी भ्रम
सो नष्ट हो गई क्यों कि आत्मा को कर्तृत्व आदि कछु नहीं है
यह आपने कहा सो ठीक ही है १

दोहा

मोहि अनुग्रह सें परम गुपत अध्यात्म नाम कह्यो जो तुम तिह
वाक ते यह मम मोह निशान १

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययं २

शाङ्करभाष्य १

किञ्च भवेति। भवउत्पत्तिरप्ययः प्रलयो भूतानां तौ भवाप्य
यौ श्रुतौ विस्तरशो मया न संक्षेपतः त्वत्तः त्वत्सकाशात् कम
लपत्राक्ष कमलस्य पत्रं कमलपत्रं तद्वत् अक्षिणी यस्य तव
स त्वं कमलपत्राक्षः हे कमलपत्राक्ष महात्म्यमपि चाव्ययमक्ष
यं श्रुतमिति अनुवर्तते २

आनन्दगिरिकृतटीका २

अविवेकबुद्धिरज्ञानविपर्यासात्मिका तस्मादारभ्य तत्पदार्थनि
र्णयार्थमपि भगवदुक्तं वचो मया श्रुतमित्याह किञ्चेति तौ
भूतानामुत्पत्तिप्रलयौ त्वत्तः श्रुतौ विस्तराभ्यां सम्बध्यते महात्म
नस्तव भावो माहात्म्यं पारमार्थिकं सोपाधिकं वा सर्वात्मत्वा
दिरूपं श्रुतमिति परिणम्यानुवृत्तिं द्योतयितुं अपि चेत्युक्तं २

स्वामिकृतटीका ३

किंच भवाप्ययाविति भूतानां भवाप्ययौ सृष्टिप्रलयौ त्वत्तः सका
शादेव भवत इति श्रुतौ मया अहं कृत्स्नस्य जगतः प्रभवः प्रलय-
स्तथा इत्यादौ विस्तरशः पुनः पुनः कमलस्य पत्रे इव प्रसन्ने विशाले
अक्षिणी यस्य तव हे कमलपत्राक्ष माहात्म्यमपि चाव्ययमक्षयं श्रुतं
विश्वसृष्ट्यादिकर्तृत्वेपि सर्वनियन्तृत्वेपि शुभाशुभकर्मकारयितृ
त्वेपि बंधमोक्षादिफलदातृत्वेपि अविकारावैषम्यासंगोदासीन्या
दिलक्षणमपरिमितं महत्त्वं च श्रुतं अव्यक्ते व्यक्तिमापन्नं मन्यते मया
ततमिदं सर्वं न च मां तानि कर्माणि निबध्नन्ति समोहं सर्वभूतेष्वित्या
दिना अतस्त्वत्परतंत्रत्वादपि जीवानामहं कर्तेत्यादिमदीयो मोहो
विगत इति भावः २

पैशाचभाष्यम् ४

भवाप्ययौ उत्पत्तिप्रलयौ २

रामानुजभाष्यम् ५

भवाप्ययाविति त्वत्तः सप्तमप्रभृति दशमपर्यन्तेन त्वदुक्तिविस्तरतो सर्वेषां भूतानां त्वत्तः परमात्मनो भवाप्ययावुत्पत्तिप्रलयौ विस्तरशो मया श्रुतौ हे कमलपत्राक्ष तवाव्ययं निखिलचेतनाचेतनवस्तुशेषित्वज्ञानबलादिकल्याणगुणैः त्वमेव परतरत्वं सर्वाधारत्वं चिन्तितनिमिषितादिप्रवृत्तिषु त्वमेव भर्तृत्वमित्यपरिमितं माहात्म्यं च श्रुतं हिशब्दो वक्ष्यमाणदिदृक्षाद्योतनार्थः २

अभिनवगुप्तकृतटीका· ६

स्पष्टार्थं २ ॥ ॥ ॥

परमार्थप्रपाटीका· ७

भवाप्ययाविति त्वत्तः सकाशाद्भूतानां भवाप्ययावुत्पत्तिप्रलयौ अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथेत्यादिवाक्यैर्विस्तरशो विस्तरेण मया श्रुतौ अव्ययमविनाशि माहात्म्यं सामर्थ्यमपि श्रुतं विश्वसृष्ट्यादिकर्तृत्वेऽप्यकर्तृत्वं सर्वनियन्तृत्वेऽप्यसंगत्वं विचित्रफलदातृत्वेऽप्युदासीनत्वलक्षणं माहात्म्यमित्यर्थः २

वनमालीटीका· ८

भूतानां भवाप्ययावुत्पत्तिप्रलयौ त्वत्त एव भवतो मत्त एव विस्तरशो मया श्रुतौ न तु संक्षेपेण सकृदित्यर्थः कमलस्य पत्रे इव दीर्घे रक्तान्ते परमे अतिरमणीये यस्य स त्वं हे कमलपत्राक्ष सौंदर्यातिशयोक्तिर्वीर्यप्रमातिशयात् न केवलं भवाप्ययौ त्वत्तः श्रुतौ माहात्म्यं निरतिशयैश्वर्यं सृष्ट्यादिकर्तृत्वेऽप्यविकारित्वं शुभाशुभकर्मकारयितृत्वेऽप्यवैषम्यं बन्धमोक्षादिविचित्रफलदातृत्वेऽप्युदासीनत्वमपि महत्त्वानन्दादिप्रयुक्तकार्यकर्तृत्वादिकमव्ययं सदैकाकारं त्वत्तः श्रुतम् २

ऊसमवैजयन्तीटी· ९

किंच भवाप्ययाविति हे कमलपत्राक्ष कमलपत्रस्येव रम्ये दीर्घे रक्तान्ते वर्तिनी नेत्रे यस्य स तथा तस्य संबोधने हे कमलपत्रनेत्र त्वत्सेवनेन भगवतोऽतिप्रसन्नत्वेन यावत्प्राप्नोपदेष्टा विनिरतिशयसौलभ्यत्वेन प्रेमास्पदत्वं च सूचितम् त्वत्तः सर्वेश्वरात्कृष्णात् भूतानां ब्रह्मादिस्थावरान्तानां सर्वेषां चेतनाचेतनात्मकानां भवाप्ययौ सर्गप्रलयौ विस्तरतोऽस

कृत्स्नया त्वत्कृपयाप्रेरणं श्रुतौ सप्तमादारभ्य दशमाध्यायपर्यंतेन
ग्रंथेन हि शब्देन पालनमपि श्रुतं च श्रुतं त्वाव्ययं नित्यं माहात्म्य
महानंतगुणशक्तियुक्त आत्मा स्वरूपं यस्य स महात्मा तस्य त
त्वभावो माहात्म्यं निरतिशयपरमैश्वर्यं विश्वसृष्ट्यादिकर्तृत्वे
अविकारित्वं सर्वशुभाशुभकर्मकारयितृत्वेपि तत्तत्कर्मादृष्ट
त्वेन तत्कर्मानुगुणदेवतिर्यगादिविविधयोनिप्रापकत्वेप्यवै
षम्येन घृणादित्वं सर्वाधारत्वं सर्वात्मत्वादिकमपि मया श्रुतमि
त्यर्थः २

मधुसूदनीटीका ९

तथा सप्तमादारभ्य दशमपर्यंतेन त्वदर्थनिर्णयप्रधानमपि
भगवतो वचनं मया श्रुतमित्याह भूतानां भवाप्ययौ उत्पत्तिप्र
लयौ त्वत्त एव विस्तरशो मया श्रुतौ न तु संक्षेपेणेत्यर्थः
कमलस्य पत्रं इव दीर्घे रक्तांते परममनोरमे अक्षिणी यस्य तव
स त्वं हे कमलपत्राक्ष अतिसौंदर्यातिशयाल्लोकोत्तरप्रेमातिशया
त् न केवलं भवाप्ययौ त्वत्तः श्रुतौ तव महात्मनो भावो महात्म्य
मनतिशयैश्वर्यं विश्वसृष्ट्यादिकर्तृत्वेप्यविकारित्वं शुभाशुभ
कर्मकारयितृत्वेप्यवैषम्यं बंधमोक्षादिविचित्रफलदातृत्वेपि
असंगोदासीनत्वमसत्त्वेपि सर्वात्मत्वादि सोपाधिकं निरुपाधिक
मपि वा अव्ययमक्षयं मया श्रुतमिति परिणतमनुवर्तते चकारा
त् २

सदानंदीटीका ११

भूतानां जन्मविलयौ विस्तरशस्त्वत्तः श्रुतौ पद्मपत्रविशाला
क्ष तवैश्वर्यमपि श्रुतं । विश्वसृष्ट्यादिकर्तृत्वेप्यवि-
कारित्वमात्मनः शुभादेः कारयितृत्वेप्यवैषम्यमहे-
शितुः विचित्रफलदातृत्वेप्युदासीन्यमसंगता इत्या
दि तव माहात्म्यमव्ययं च श्रुतं मया ३ २ ॥

नीलकंठीटीका १२

भवेति तथा सप्तमाध्यायमारभ्य दशमपर्यंतेन त्वया भूतानां भवा
प्ययावपि उक्तौ अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तत इति भाव
पि मया विस्तरशः त्वत्तः श्रुतौ हे कमलपत्राक्ष अव्ययं माहात्म्य

श्री॰ गी॰ टी॰ प

6

मपि नवमं नानिकर्माणि लिं पंक्तीति विषमसृष्टिकर्तृत्वेपि वैषम्य
नैर्घृण्ये दोषौ नास्ति जगत्कर्तृत्वेपि विकारगंधो नास्ति इत्येवमादि
रूपेण मदार्थस्तु द्रष्टव्य यथा नेष्टुतमित्यत्र घंगः २

आनंदीटीका

त्वत्तः परमकारणादेकस्मात्सर्वेषां भूतानामुत्पत्तिप्रलयौ मया वि
स्तरतः श्रुतौ अव्ययमनंतं च माहात्म्यं परमव्यापकत्वमपि विभू
तिलक्षणं श्रुतम् २

रामकंठीटीका

अत्रहेतुमाह — यस्मात्त्वत्तः परमकारणादेकस्मात्समस्तानां स्थावरजंगमभूतानां
प्रभवाप्ययावुत्पत्तिप्रलयौ विस्तरतो वैतन्येन मया श्रुतौ श्रुतिमात्रे
णाप्रतिपादितत्वेनावधारितावपि चाव्ययं नित्यं माहात्म्यं निरतिशया
यैश्वर्यलक्षणं महत्वं श्रुतमहं कृतत्वस्य जगतः प्रभवः प्रलयस्त
थामत्तः परतरं नान्यत् किंचिदस्तीत्यादेरविसंवादिना भगवद्वचना
देव भगवानेव सकलभूतभावस्य कारणं तथाभावेपि विशुद्धवि
ज्ञानात्मस्वभावाप्रच्युतेरद्भुतसैश्वर्यस्यैकास्पदमिति च मया प्रतिपन्न
मित्यर्थः [illegible]
[illegible] २

लासिकी वनमालीटीका

मोहापगममेवाह — भूतानां स्थावरजंगमात्मकानामुत्पत्तिविलयौ त्वत्तः सकाशा
देव भवतः इति सर्वभूतानि कौंतेयेत्यादिना विस्तरेण मया श्रुतौ
श्रुतिमात्रेणावधारितौ न त्वनुभूतौ तथाव्ययं जगद्विवर्तरूपेण
इदंतावभासमत्यपि स्वरूपाद्विचलनलक्षणमात्मस्वभावाप्रच्युतिरूपं ते
माहात्म्यं व्यापकत्वं च विश्वभावश्वमिदं कृतत्वमित्यादिना श्रुतम् न
त्वसाक्षात्कृतम् [illegible] २ ॥

पंचोलीटीका

किंच भवाप्ययाविति हे कमलपत्राक्ष हि यस्मात्मया त्वत्तः भूता
नां भवाप्ययौ भव उत्पत्तिरप्ययः प्रलयस्तौ त्वत्सकाशात् विस्तरे
ण श्रुतौ च अन्यत् अव्ययमनंतं माहात्म्यमपि श्रुतं २ ॥

भवाप्ययाविति द्विपाद्वोत्रवाक्यावयारसोकमलपत्राक्षेतिसंबोध
नमनुग्रहसूचनार्थं मयात्तभूतानामुत्पत्तिवस्तूनां भवाप्ययावुत्प
त्तिविनाशौ त्वत्तस्तत्त्वतःश्रुतावेवापुनाद्वयदव्ययंमाहात्म्यंतद
पिश्रोतुमिच्छामीतिशेषः २॥

मधुभाष्य

२॥

6/2

भाषा अनुवाद

और भूतों की सृष्टि तथा प्रलय भी आपही से होती यह भी मैं ने विस्तार से सुना और हे कमलपत्राक्ष श्रीकृष्ण आप का अव्यय कहे अलय माहात्म्य भी आपसे सुना इस से अब जीव सकल आपके अधीन हैं यह जाना और अहं कर्ता भोक्ता इत्यादि रूप मेरा मोह सम्पूर्ण दूर हो गया २

दोहा

उत्पति लय सब भूत की सुनी विस्तार सें मेंह तोसें पद्म दलन
यन पुनमहात्म अव्ययपद २

7

एवमेतद्यथात्थत्वमात्मानंपरमेश्वरं द्रष्टुमि-
च्छामि ते रूपमैश्वरंपुरुषोत्तम ३

शाङ्करभाष्य १

एवमिति एवमेतन्नान्यथा यथा येन प्रकारेणात्थ कथयसि त्वमात्मानं परेश्वरं तथापि द्रष्टुमिच्छामि ते तव ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः संपन्नमैश्वरं वैष्णवं रूपं पुरुषोत्तम ३

आनन्दगिरिकृतटीका २

त्वदुक्तेर्थेऽविश्वासाभावात् न तस्मिन् दिदृक्षा किन्तु कृतार्थी बुभूषया इत्याह एवमेतदिति येनप्रकारेण सोपाधिकेन नि-
रूपाधिकेन चेत्यर्थः यदिममात्थत्वं तिष्ठिम मदुक्ते तेमानेन
दिदृक्षते^ हिं किमिति मदुक्ते^ कृतार्थीबुभूषयेत्यर्के मत्वाह तथापीति च
तर्ज्ञानादिरूपनिष्ठत्वमर्थमाह ऐश्वरमिति तद्व्याचष्टे ज्ञानेत्यादिना
३

स्वामिकृतटीका ३

किंच एवमिति भवाप्ययौहिभूतानामित्यादिमयाश्रुतं यथाचेदानीमात्मानंत्वमात्थ विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगदित्येवंकथयसि हेपरमेश्वरएवमेतत अत्राप्यविश्वासोममनास्तीत्यर्थः तथापिहेपुरुषोत्तमतवैश्वर्यंज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः संपन्नंत्वद्रूपंकौतूहलादहंद्रष्टुमिच्छामि ३

पैशाचभाष्यम् ४ टी॰

एवमिति ईश्वरस्येदमैश्वरं ३

रामानुजभाष्यम् ५ टि॰

निपु^ एवमितिहेपरमेश्वरएवमेतदिति कृत्स्नमनदस्माधारणंसर्वस्यप्रशा-
सितृत्वेपालयितृत्वेस्रष्टृत्वेसंहर्तृत्वेकल्याणगुणाकरत्वेपरतरत्वेसक- भर्तृत्वे^
यत्वमि^ लेतरविसजातीयत्वंयथात्थत्वमात्मानं ब्रवीषिप्रभुत्वेचावस्थितं
रूपंद्रष्टुंसाक्षात्कर्तुमिच्छामि ३

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ३ ॥ ॥

परमार्थप्रपाटीका ७

गी·
टी·पे

एवमिति विष्टभ्याहमिदं कृत्स्नमितीदानीमात्मानं स्वयदात्म्य यदहत्वसि
पत्रतेयेश्वर्यज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः संपन्नं रूपं द्रष्टुमिच्छामि
पुरुषोत्तमेति सेतुस्याप्रलौकिकदर्शनकौतूहलेदिदृक्षालीतिस्मृति
ते श्रुतिरपि वामदेवेन साम्नोपदिशति कयानश्चित्र आभुवदूतीस
दावृधः सखा कया शचिष्ठया वृतेति भाष्ये वामदेवः सदावृधः सदा
वर्धमानः समष्टिरूपः परमात्मा चित्रभापनीयः पूजनीयः महाविवि
धाकृतिमयः सखा मित्रभूतः परमात्मा कयाऊती इत्यासंतर्पणेनत
थाकया शचिष्टया महत्तावन्नमनया महत्वासहितमनुष्ठीयमानेनकया
वृतांकेन वर्तमानेन कर्मणा वा नोस्माना भुवत् आभिमुख्येन भवे
त् अत्र भवार्गेचरो भवेदिमादिवाकोरेतादृशरूपदर्शनेवेहापि वामदे द॰
वस्यमनोरथं प्रकटीकरोति किंपुनरहमित्यर्थः तेइक्षेहरेवेशभा
ऊँरे त्वमासीने विष्टरे तेजनार्दनं वामदेवभरद्वाजो द्रष्टुमागतौ जग
न्मये तावायातौ समालोक्य विज्ञाय च तर्हीमिते उभयोर्दर्शयामा
स विश्वरूपं स्वमर्षोणि ततस्तावूचतुः कृत्स्नं सर्वदेवात्मकं विष्णु
त्वमादिः सर्वभूतानां मध्यमन्तस्तथा भवान् यामेव वृक्षजातानि
लोकदृष्टानि माधव नवगात्रेषु पश्यामस्त्रिलोकीः सर्वदेवताः जि॰
नपदैरित्य[illegible] शांतादांतायोगेश्वरेश्वराः नामीद्दर्शयन्ते ~ पश्यंतिनान्य
इत्येवविश्वदेइति अथ वामदेव्यस्य साम्नः अ हविरापस्तंभस्त्वावोया विश्वेभिर्देवैः एतनोजयामिजाग +

वनमाली टीका॰ ८

हे परमेश्वर यथा येन प्रकारेण घटवत् पटीयो निरतिशयानं तैश्व दना॰
र्येणात्मानं त्वमात्थ कथयसि एवमेतत् नान्यथा तथापि अहं तत्रापि मम
विश्वासः शंकानास्तीवयपिशाधान्तर्दूपंज्ञातं तथापि तद्रूपं द्रष्टु
मिच्छामि तेतवद्रूपमैश्वरं ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः संप
न्नमद्भुतं हे पुरुषोत्तम मम सेवायते नन सर्वतर्यामिन् तवतवमविश्वा
सोनास्ति मम दिदृक्षा चास्ति महतीति सर्वज्ञत्वात्त्वं जानासीति सू
चयति ३

कुसुमवैजयन्तीटीका ५

किंच एवमेतदिति हे परमेश्वर चेतनाचेतननियंतः यथा त्वमस्म
मतिरात्मानं त्वमात्थ विष्टभ्याहमिदं कृत्स्नमित्यादिना ब्रवीषि
तदेतदेवमित्यमवसमात्रतां मम विश्वासस्तथापि हे पुरुषोत्तम
प्रपन्नजनवात्सल्यादयेते परमेश्वरस्य तवैश्वरं जगत्स्रष्टादिकरू

+ तेन कुंदसामसप्तदशेन स्तोमेन वामदेव्येन साम्ना वषट्कारेण वज्रेणेति अत्र सामगायने स्तोमस्तोभादित
त्त्वमस्माभिः सामवेदभाष्ये प्रोक्तं तत्रैव भरद्वाजोपि कर्मणां फलदाता च फलदः कर्म कुर्वतां निध
नाद्धहसत्वान्नीयहहंदेत्योपरहसामिति श्रुतिरपि रक्षोहणमिति वृक्तेन एतदप्यग्रे निरूपयिष्यते ३॥ +

तेपि सर्वनियंतृत्वेपि सर्वभर्तृत्वेपि सर्वप्रशासितृत्वेपि स्वाभाविकानंत
कल्याणगुणार्णवत्वेनानंतशक्तित्वेन च सकलचेतनाचेतनविसजाती
यं तदसाधारणं रूपं विश्वरूपं द्रष्टुं साक्षात्कर्तुमिच्छामि तव निरतिश
यानंतज्ञानैश्वर्याद्याश्रयत्वेन निखिलविदंतरात्मकत्वेन च निरवधि
कातिशयानंताचिन्त्यगुणशक्तिके योगिध्येयं स्वरनराद्यगोचरं यत्व
द्रूपं तद्दर्शनायालंत्वस्य ममेच्छा प्रवृत्ता सा चेन्निराशा स्यान्नहि तव
भक्तकामपरिपूरकत्वमामनसेत्स्यत तत्वेनो मदीतेशश्यं यता प्रार्थ
यामीति संबोधनयोरभिप्रायः ३

मधुसूदनी टीका ९ निसोपाधिकेन

हे परमेश्वर यथा येन प्रकारेण सोपाधिकेनं च निरतिशयैश्वर्येण
त्मानं त्वमात्मानं कथयसि एवमेतन्नान्यथा त्वदुक्तेर्ऽपि ममावि
श्वासशंका नास्ति वेत्यर्थः यद्यप्येवं तथापि कृतार्थीबुभूषया द्रष्टुमि
च्छामि ते तव रूपमैश्वरं ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः संपन्नम
त द्भुतं हे पुरुषोत्तम संबोधनेन त्वद्वचसि विश्वासो मम नास्तीति दृष्टला
वमहतीवर्तत इति सर्वज्ञत्वात्त्वं ज्ञानासि सर्वांतर्यामित्वादिति सूच
यति ॥

सदानंदी टीका ११

यथा येन प्रकारेण परमेश्वरमापन्ने सोपाधिकात्मना तत्त्व निरुपाधि
करूपतः १ परमैश्वर्यसंपन्नं त्वात्मानं कथयसि तत्एवमेवेन त्वत्सी
हना त्विशंका मनागपि २ यद्यप्येवं तथाप्यत्रार्द्रकृतार्थीबुभूषया
द्रष्टुमिच्छामि ते रूपं ज्ञानैश्वर्यादिसंयुतम् ३ सर्वशास्त्राश्रयं श्रीम
त्पारमेश्वरमद्भुतं त्वद्वाक्ये नास्त्यविश्वासो दिदृक्षा महतीव मे ४ अं
तर्यामितया वेत्सि पुरुषोत्तम चांतरं ५ ३

नीलकंठी टीका १२

एवमिति यच्चत्वे विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति
आत्मानं जगदाधारमात्थ तदपि तथैवेन ममात्रासंभावनास्ति

हे परमेश्वर नेन व रूपं येश्वर ईश्वरस्येदं विश्वात्मकं मायामयमित्य
र्थः हे पुरुषोत्तम मत्तगालगातीत विश्वरूपं मायामयं वास्तवं त्वद्रूपं
मायातीतमित्यैश्वरमिति पुरुषोत्तमेति च पदाभ्यां लभ्यते तथा च
वक्ष्यति मायाह्येषा मया सृष्टा यन्मां पश्यसि नारद सर्वभूतगुणै
र्युक्तं नैवं मां ज्ञातुमर्हसीति उक्तं च शुद्धं रूपमभिप्रेतं त्वयाक्तो-
यमविंसोयमिति ३

आनंदीटीका

अतीन्द्रियस्तवात्मा अतएव किं तत्तैश्वरं रूपं सर्वभूतनिवासात्मि
कां दिव्यामूर्तिं द्रष्टुमिच्छामि ३

अतिमात्रेणैतन्मया प्रतिपन्नं न तु सा

रामकंठीटीका

त्वादनुभूतमिति तदर्थमाह॥

यथा येन प्रकारेण पूर्वोक्तेन तया स्वरूपमात्मानं परमेश्वरं ब्रह्मादी
नामपीश्वराणामीशितृत्वात्सर्वं प्रभुमात्थ कथयसि एतदुत्सर्वमने
न प्रकारेण स्थितं नात्र मे भ्रान्तिरित्यर्थः तत एव ते रूपं दिव्यं वपुरैश्वर
मीश्वरस्य तवैवं वस्थितं द्रष्टुं साक्षात्निरूपयितुमिच्छाम्यभिकांक्षामि
अनेन त्वयुक्तादृश्यमानेन पुरुषाकृतिना रूपेणानन्तरं रूपं वो मात्रेण
मम कथितं केवलं यत्रेदमेकस्मिन्सर्वमेवावस्थितं तदिदानीं भगवद्
वचनप्रत्ययात्मया तत्तथा विद्यमानतया प्रतिपन्नमतः पुरुषोत्तम प
रमपुरुष त्वत्प्रसादात्सत्यत्वतः प्रेक्षितुमभिकांक्षामि [illegible] ३ ॥

अथ तत्साक्षात्कारार्थमनुमि

लासिकी [illegible]टीका

तिपूर्वमाह॥ हे पुरुषोत्तम यथा येन प्रकारेणात्मानमैश्वरं रूपमाह कथयसि ए
वं वाढमनेन प्रकारेणैतत् नात्र मे विश्वासाभावः तथापि तवैश्वरं रू
पं साक्षात्कर्तुं स्पृहयामि [illegible] ३

पंचोलीटीका

पूर्वोक्तमभिनंद्य स्वाभिप्रायमाविष्करोति एवमिति हे कृष्ण हे परमेश्व
र यथात्वमात्मानं नित्यशुद्धबुद्धमुक्तस्वभावं परमेश्वरमात्मानमा
त्थ कथयसि एतत् एवमेव नान्यथा हे पुरुषोत्तम ते तव ऐश्वरं शक्ति-
वीर्यबलतेजोभिः संपन्नं रूपं द्रष्टुमिच्छामि ३ ॥

एवमेतदिति परमेश्वर त्वं स्वात्मानमात्मीयं स्वरूपं यथात्थ क
थयसि तदेतदेवमनेनैव प्रश्नोक्तप्रकारेण निर्णीतं भवतीति शेषः
संप्रति हे पुरुषोत्तम ते ऐश्वरं रूपं द्रष्टुमिच्छामीति ३॥

मधुभाष्य

३॥

भाषा अनुवाद

और जो आप ने सप्तम अध्याय मे कहा कि भूत सृष्टि तथा प्रलय आ
दि कार्य्यो का कारण मै हूं और दशम अध्याय के अन्त मे कहा कि
विष्टभ्याहमिदंकृत्स्न मेकांशेन स्थितो जगदिति और अव भी जो रू
प आप आपना कहते हो यह सव ऐसा ही है इसमे हमे कुछ सन्दे
ह नही है तो भी हे पुरुषोत्तम ज्ञान ऐश्वर्य वल वीर्य औ तेज से स
म्पन्न कहे युक्त तकारे रूप को अति आश्चर्य से मै देखने की इच्छा
करता हूं ३

दोहा

ऐसें जो तुम यह कह्यो आत्म कहूं भगवान देषा चहों पुरुषोत्तम
तो ईश्वररूप महान ३॥

10

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययं ४

शाङ्करभाष्य १

मन्यस इति मन्यसे चिन्तयसि यदि मयार्ज्जुनेन तत् शक्यं द्रष्टुमिति प्रभो स्वामिन् योगेश्वर योगिनो योगास्तेषामीश्वरो योगेश्वरः हे योगेश्वर यस्मादहमतीवार्थी द्रष्टुं ततः तस्मात्त्वं मम मदर्थं दर्शय त्वमात्मानमव्ययं ४

आनन्दगिरिकृतटीका २

द्रष्टुमयोग्ये कुतो निर्बन्धस्तत्राशङ्क्याह मन्यस इति प्रभवति सृष्टिस्थितिसंहारप्रवेशप्रशासनेभ्यः इति प्रभुः लक्षणया योगशब्दार्थमाह योगिन इति तत इत्यादि व्याचष्टे यस्मादिति ४

स्वामिकृतटीका ३

न चाहं द्रष्टुमिच्छामि इत्येतावतैव त्वया तद्रूपं दर्शयितव्यं किं तर्हि मन्यस इति योगिन एव योगास्तेषामीश्वर मयार्जुनेन तद्रूपं द्रष्टुं शक्यं यदि मन्यसे ततः तर्हि तद्रूपं त्वमात्मानमव्ययं नित्यं मम दर्शय ४

पैशाचभाष्यटीका ४

मन्यस इति योगशास्त्रात्समाधिवचनाद्दर्शनादित्वादच्प्रत्ययः योगो विद्यते येषां ते योगिनः योगिनामीश्वरो योगीश्वरस्तस्य सम्बोधने ४

रामानुजभाष्यटीका ५

मन्यस इति तत् सर्वस्य स्रष्टृ प्रशास्तृ सर्वस्याधारभूतं त्वद्रूपं मया द्रष्टुं शक्यमिति यदि मन्यसे ततो योगो ज्ञानादिकल्याणगुणयोगः यस्य मे योगेश्वरमिति हि वस्तुतेन त्वत्तो व्यतिरिक्तस्य कस्याप्यसम्भावितज्ञानबलैश्वर्यवीर्यशक्तितेजसां निधे आत्मानं त्वा मुव्ययं मे दर्शय प्रव यमिति क्रियाविशेषणं त्वं सकलं मे दर्शयेत्यर्थः [illegible]

अभिनवगुप्तकृतटी० ६

स्पष्टार्थं ६

परमार्थप्रपाटी० काटी० ७

श्री॰ गी॰टी॰ ५

[illegible]

अथैतद्रूपदर्शने केवलमनुग्रहैकलभ्यमित्याह मन्यसइति योगेश्व
रयोगिनएव योगास्तेषामीश्वर ततस्त्वं हि अव्ययमात्मानं दर्शय ४

वनमाली टीका ८

इष्टुमयोग्येजनस्तेदिदृक्षेत्या शंक्याह मन्यसइति प्रभवति सृष्टिस्थि
तिसंहारप्रवेशप्रशासनेष्विति प्रभुः हे प्रभो सर्वस्वामिन् तत्तवैश्वरं
रूपं मया द्रष्टुं शक्यमिति मन्यसे जानासीच्छसि वा हे योगेश्वर सर्वेषा
मणिमादिसिद्धिशालिनां योगानां योगिनामीश्वर ततस्त्वदिच्छाव
शादेव मे मह्यमत्यर्थमप्यर्थिने त्वं परमकारुणिको दर्शय वा त्वध-
ज्ञानविषयीकारय आत्मानमैश्वररूपविशिष्टमव्ययमत्यंसदै
काकारम् ४

ऊममवैजयन्ती टीका ९

ननु बलादिभिर्देवैरपि यद्दुष्टमशक्यं साधनसम्पन्नैर्योगिभिश्चापि
यद्दुष्प्रापं तत्त्वं साधनं विना कथं द्रष्टुमिच्छसीति चेत्तत्राह मन्यसेय
दीति प्रभवति सृष्टिस्थितिसंहारप्रवेशप्रशासनसमर्थो भवतीति प्रभुः
स्तत्संबुद्धौ हे प्रभो सर्वस्वामिन्निति अनेन भगवतः कर्तृत्वे कारयितृत्वे
प्यवरोधात् सृष्टत्वं सूचितं यदि मयाऽस्वल्पज्ञेन साधनहीनेन तत्सर्वेश्व
हृसर्वनियंतृसर्वाश्रयमव्ययं त्वद्रूपं द्रष्टुमवलोकितुं शक्यं मदर्शन
योग्यं भवेदिति त्वं मन्यसे जानासीच्छसि वा ततस्तर्हि हे योगेश्वर योग
शब्दोऽत्रानेनत्ज्ञानैश्वर्यादिकल्याणगुणयोगः यस्य स योगमेश्वरः
स्मिति वक्ष्यमाणत्वात् ज्ञानैश्वर्यतेजोवीर्यबलतेजादिशक्त्यादिज
लधेः स्यमनेन त्वज्ञातिरिक्तानां विधीशेंद्रादीनां केषामप्येतद्योगासंभ
वान्नेश्वरत्वं किं तत्त्वमेव सर्वेश्वरोऽसीति सूचितं अव्ययं नित्यमेकर
संक्रियाविशेषणं वा सकलेतरविसजातीयं यथास्यात्तथा आत्मा

नेस्त्वं तां मे मह्यमसमर्थमर्थिने परमकारुणिकस्त्वं दर्शय यद्वा त्वद्वि-
ज्ञानविषयीकारय यत्त्वदनुग्रहं विना त्वद्रूपदर्शने बलादयोपि देवा
न समर्थास्त्वत्कृपया मह्यं मूढप्रज्ञप्रसादयोपि समर्था भवेयुस्त्वल्लि-
ङ्गस्य मम यदि योग्यतास्ति तर्हि दर्शयेत्यभिप्रायः ४

द्रष्टुमयोग्ये कृतस्ते दिदृक्षेते **मधुसूदनी टीका· ९**

त्याशंक्याह समर्थो भवति प्रभवति सृष्टिस्थितिसंहारप्रवेशप्रशासनेष्विा-
ति प्रभुः हे प्रभो सर्वस्वामिन् तत्तैश्वरं रूपं मयार्जुनेन द्रष्टुं शक्य-
मिति यदि मन्यसे जानासि इच्छसि वा हे योगेश्वर सर्वेषामणिमा-
दियोगिताशालिनां योगिनामीश्वर ततस्तदिच्छाव[illegible] देव मे मह्य मा
मसमर्थमर्थिने त्वं परमकारुणिको दर्शय वा तुष ज्ञानविषयीका-
रय आत्मानमैश्वररूपविशिष्टमव्ययमलयं [illegible]
[illegible] ४

सदानंदी टीका· ११

सृष्टिस्थितिलयादिभ्यः प्रभुः प्रभवतीह यः हे प्रभो सकलस्वामि-
न् रूपं पतत्तैश्वरं १ मयार्जुनेन शक्यं चेद्द्रष्टुं चिंतयसीश्वर हे
योगेश्वर सर्वेषां योगिनां सिद्धिशालिनां २ योगानां चैव सर्वेषा-
मीश्वरोसि रमापते त्वदीयेच्छावशादेव मह्यमसमर्थिने विभो ३
आत्मानमैश्वरं रूपमत्ययं करुणानिधे चक्षुर्ज्ञानविषयीकार
यत्वमिहाधुना ४।। ४

नीलकंठी टीका· १२

मन्यस इति हे योगेश्वर योगानां योगिनामीश्वर तद्रूपं यदि मया
द्रष्टुं शक्यमिति मन्यसे यद्दिमणितदर्शनाधिकारेण पश्यसि ततस्त-
र्हि मे मह्यमव्ययं मायामयं आत्मानं दर्शय मायामयत्वादेवास्या-
व्ययत्वं मायायां हि सर्वं सर्वात्मकं सर्वदास्तीति प्रसिद्धं यथोक्तं व-
सिष्ठेन वर्तमानमतीतं च भविष्यत्स्थूलमणवपि तथाहरमहर
व निमेषः कल्पशतान्यपि चिदात्मनि स्थितान्येव यथा मायाविस्तभि-
नमिति नहि मकरमरीचिसरसीक्रमणः शुष्यति अतो मायामयत्वा-
देवास्येश्वरस्य रूपस्याव्ययत्वं ४

श्री॰ गी॰ टी॰ प॰ २

आनंदीटीका

योगीश्वरमहाविदेहाख्यया योगसिद्ध्या सयः सर्वं जगत्कर्त्तुं समर्थस्त्वमव्य
यमात्मानमनादिनिधनस्वरूपम् ॥

रामकंठीटीका

किंतु— हे प्रभो परमेश्वर तत्त्वयाविधेतात्विकं रूपं परमयोगिभिरपि साध्यमा
नदर्शनं मया मनुष्यमात्रेणाद्रष्टुं सामान्यात्मलिखितं शक्यं स्यामिति यदिम
न्यसे जानासि यदि ममेयती योग्यतां संभावयसि ततस्त्वं योगीश्वर स
हजसिद्धनिरतिशययोगत्वात्सर्वयत्नसाध्ययोगानां सर्वेषां योगा
तरागां प्रभो मम त्वमव्ययमनादिनिधनमात्मनेस्वरूपं दर्शय प्रत्य
क्षीकुर्वित्यभ्यर्थितः प्रसादाभिमुखो भगवानुवाच ॥

लासिकी [illegible]टीका

किंतु— हे प्रभो हे स्वामिन् भो योगेश्वर बुद्धियोगमारभ्य ज्ञानयोगपर्यंतं ययो
पपत्तियोगदानं समर्थः अस्माकमर्थे प्रतिहियांचैव अर्थे इति साक्षान्मामे
ऽनुगाम् तदैश्वरं रूपं मया मनुष्येणालज्ञात्ममात्रबोधेन द्रष्टुं साक्षा
त्कर्तुं शक्यं स्यामिति चेन्मन्यसे जानासि यदि ममेयती योग्यतां संभाव
यसि ततो मह्यमव्ययं यथोक्तमात्मानं दर्शय प्रत्यक्षीकुर्वित्येवमभ्यर्थि
तः प्रसादाभिमुखः ॥

पंचोलीटीका

न केवलं मम इच्छया त्वया दर्शयितव्यं मदीयमधिकारित्ववा
पेक्षणीयमित्याह मन्यस इति हे प्रभो यदि तदैश्वरं रूपं मया द्रष्टुं श
क्यमिति मन्यसे हे योगेश्वर योगाः योगिनस्तेषामीश्वरस्ततस्त्वं मम
से आत्मानं दर्शय ॥

रणवीरसमिद्धोधिनी ॥

इदानीं भगवंतं स्वाभिव्यक्त्यविश्वरूपं दर्शयितुमभ्युपगमयति मन्य
स इति प्रभो संबोधनं सर्वशक्तिमत्त्वद्योतनार्थं त्वया यदि मन्यसे महिष
यं योग्यतं वेजानासि तत्स्वरूपं द्रष्टुं साक्षादवधारयितुं मयार्जुनेन मा

क्यमिति ततस्तर्हि योगेश्वर भगवन्नात्मानं स्वरूपमव्ययं सनातनं
मेमह्यंदर्शयेतीत्यंप्रार्थनापूर्वंप्रस्तुतो भगवानुवाच पश्यमेइ
ति ४ ॥

मधुभाष्य

यथाश्रुतेध्यानंप्राप्तंतथास्वरूपस्थितिरनेनाध्यायेनोच्यते
प्रभुःसमर्थः नास्तितस्मात्परंभूतंपुरुषार्हैसनातनादिति
मोक्षधर्मे प्रभुदीपः ॥

12/12

भाषा अनुवाद

और मेरी इच्छा है देखने की इस हेतु आपको अपना रूप देखावना उचित है यह कुछ बातनहीं है परन्तु हे योगेश्वर जो वह आपका ईश्वर स्वरूप हमारे देखे नयोग्य होय और हम देख सकैं तो हे प्रभो वही अव्यय स्वरूप अपना हमे कृपा करि दिखावो यह अर्जुन ने कहा ४

दोहा

जो प्रभु मानत योग्य यह देषनको मोहि याहि तो मोह योगेपा
तुम आतम अव्यय देषाहि ४

13

श्रीभगवानुवाच पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः नानाविधानि दिव्यानि नानावर्णाकृतीनि च ५

शाङ्करभाष्यं १

एवमुक्तोदितोऽर्जुनेन भगवानुवाच पश्येति पश्य मे मम पार्थ रूपाणि शतशोऽथ सहस्रशः अनेकश इत्यर्थः तानि च नानाविधानि अनेकप्रकाराणि दिवि भवानि दिव्यान्यप्राकृतानि च नानावर्णाकृतीनि च नाना नीलपीतादिप्रकारा वर्णा विलक्षणास्तथा आकृतयोऽवयवसंस्थानविशेषा येषां रूपाणां तानि नानावर्णाकृतीनि च ५

आनन्दगिरिकृतटीका २

अर्जुनेनमतिभक्तं सत्वरं प्रार्थितमतिश्रुत्वणिनाश्वासयितुमाह पश्येति ५

स्वामिकृतटीका ३

एवं प्रार्थितः सन् अत्यद्भुतं रूपं दर्शयिष्यन् सावधानो भवेत्यर्जुनमभिमुखीकरोति श्रीभगवानुवाच पश्येति चतुर्भिः रूपाण्येकत्वेपि नानाविधत्वाद्रूपाणीति बहुवचनं अपरिमितानामनेकप्रकाराण्यलौकिकानि मम रूपाणि पश्य वर्णाः शुक्लकृष्णादयः आकृतयोऽवयवसन्निवेशविशेषाः नाना अनेका वर्णा आकृतयश्च येषां तानि नानावर्णाकृतीनि ५

पैशाचभाष्यटीका ४

एवमर्जुनेन स्वरूपदर्शनं प्रार्थितं तद्दर्शयितुकामो भगवानुवाच पश्य मे इति शतशः शतानि सहस्रशः सहस्राणि नानावर्णाकृतीनि नानाविधवर्णसंस्थानि ५

रामानुजभाष्यटीका ५

एवं कौतूहलान्वितेन हर्षगद्गदकंठेन पार्थेन प्रार्थितः ॥

श्रीभगवानुवाच पश्य मे सर्वाश्रयभूतानि रूपाणि अथ शतशः सहस्रशश्च नानाविधानि नानाप्रकाराणि दिव्यान्यप्राकृतानि नानावर्णाकृतीनि शुक्लकृष्णादिनानावर्णाकृतीनि पश्य ५

अभिनवगुप्तकृतटी· ६

स्पष्टार्थं ५ ॥ ॥

१

१ श्री· अथभगवानपिअलौकिकरूपंदिदृक्षितमर्जुनेनसन्मुखीकरोति पश्ये
गी·टी· त्यादि चतुर्भिः भोपार्थमेशतशः सहस्रशश्चरूपाणिपश्य शतशोमु
ख्यानि विभूतिरूपाणिसहस्रशोवान्तराणि शतसहस्रशब्दाभ्यां नंतसं
ना° ख्यावाचीना नानाविधानिनाप्रकाराणि तदेवाह नानावर्णाःशुक्ला
दयः नानाआकृतयश्चाकारायेषांतानि ५

वनमालीटीका ८

स्वभक्तेनैवंप्रार्थितःसन्नाहपश्येति अत्रक्रमेणश्लोकचतुष्टयेपि
पश्येत्याहस्माद्भुतरूपाणिदर्शयिष्यामितेसावधानोभवेत्यर्जुनमभि
मुखीकरोतिभगवान् शतशोथसहस्रशःअमितानिचनानाविधा
न्यनेकप्रकाराणि दिव्यान्यद्भुतानि नानाविलक्षणवर्णानीलपी
तादिप्रकारास्तथाकृतयश्चावयवसंस्थानविशेषायेषांतानि·
नानावर्णाकृतीनिचममरूपाणिपश्यपार्थहेलोकेदृष्टुमर्होभवेत्सर्वः
ना° यथाषोडशसहस्रस्त्रीणांविवाहेस्वस्यसदेवादृश्येकस्मिन्नेवका
लेतावद्रूपत्वमन्येषांतावद्रूपाज्ञानेअघटघटनापटीयस्याचिन्त्यश
ना° क्त्योपपन्नंतथात्रापिएकस्यैवममानेकरूपत्वमुपपद्यतइतिभावः ५

उत्तमवैजयन्तीटीका· ९

इत्येवंभगवतोविश्वरूपदर्शनेच्छुनाभगवत्सपत्नेनपरमप्रियेणा
र्जुनेनसम्प्रार्थितःस्वाभाविकानवधिकातिशयाचिन्त्यानन्तगुणशा
लकोभक्तवात्सल्यतयातिप्रसन्नोत्फुल्लवारिजवदननयनोभक्तके
रवपूर्णेन्दुराजोभक्तिविवशोभक्तकामपरिपूरकोभगवानर्जुनं
प्रत्युवाचचतुर्भिःपश्यमेपार्थेति श्लोकचतुष्टयेषुपुनःपुनःपश्ये·
त्युक्त्यादर्शनीयानांरूपाणामद्भुतत्वंविविधानेकविधत्वमप्राकृतत्वं
चसूचितं हेपार्थमेनन्दनत्वंमेसित्वंसखेयोममातीवप्रियोस्य
तस्त्वामि अनन्तासुरनरादिभिरपिदर्शनायोग्यमलौकिकमिदंरू
पंदर्शयामित्वद्व्यतिरेकःकोपीदृशंद्रष्टुंनशक्नोतीतिसूचितम् मेस
र्वेश्वरस्यसर्वनियन्तुर्विभूतिमतोममशतशःशतानि अथचसह
स्रशःसहस्राणिनानाविधान्यनेकप्रकारकाणिचपुनर्नानावर्णाकृ
तीनिनानानेकवर्णाःश्वेतकृष्णरक्तपीतादयः आकृतयोऽवयवसं
निवेशभूताआकारायेषांतेषुवातानि नन्वेतादृशाविधाकृतानामपि
स्वरितिचेत्तत्राहदिव्यानिप्राकृतिकार्यतत्त्वसंबंधगंधरहितानि नित्य

स्वाभाविकानीत्यर्थः इत्यनेनैतेषां शुद्धमायाकार्यत्वमपि सूच-
तो निराकृतम् रूपाणि मम विश्वविग्रहाकाराणि मदेकदेशस्थे
कदेशस्थितानीत्यर्थः मम देहे गुडाकेश तत्रैकस्थं जगत्कृत्स्न
मिति वक्ष्यमाणात् रूपाणां भगवद्विग्रहादपृथक्स्थितिप्रद ५ग
र्शिकत्वान्मे रूपाणीत्युक्तं वेमङ्कोमत्त्विश्वपश्यपश्यमत्तविष-
याकुरु योग्यार्थः इत्रलोदमत्कृपयावमेतानि दृष्टुं योग्यो भ
वेत्यर्थः पार्थसारथेर्विश्वविग्रहस्य भगवतो विग्रहस्यैकत्वे
पि रूपाणीति बहुवचनमङ्गप्रत्यङ्गादीनां वैविध्यवैचित्र्यकथ
नाभिप्रायेणोक्तं ५

मधुसूदनीटीका ९

एवमत्यन्तभक्तार्जुनेन प्रार्थि
तः सन् अनुक्रमेण श्लोकचतुष्टयेपि पश्यपश्येत्यावृत्त्या अत्यद्भुतरूपाणि
दर्शयिष्यामि त्वं सावधानो भवेत्यर्जुनमभिमुखीकरोति भगवा
न् शतशोथ सहस्रशः इत्यपरिमितानि तानि च नानाविधानि
अनेकप्रकाराणि दिव्यान्यद्भुतानि रूपाणि नानाविलक्षणाव
र्णा नीलपीतादिप्रकाराः तथा आकृतयश्चावयवसंस्थान
येषां ^ तानि विशेषा यानि नानावर्णाकृतीनि च मम रूपाणि पश्य अहैलोकद्र
ष्टुमर्हो भव पार्थ [illegible]
[illegible]

सदानंदटीका टी॰ ११

एवमत्यन्तभक्तेन प्रार्थितो हरिरब्रवीत् अत्यद्भुतानि रूपाणि
दर्शयिष्यामि सर्वशः १ सावधानो भवेत्येवमाभिमुख्याय त
न्य^ स्य च पश्य पश्येति तावृत्तिरत्र श्लोकचतुष्टये २ अनन्तानि स्वरू
पाणि दिव्यान्यद्भुतानि मे तथानेकप्रकाराणि द्रष्टुमर्हो
भवार्जुन ३ वर्णा नानाविधा येषां नीलपीतारुणादयः त
थावयवसंस्थानभेदो येषामनेकधा ४ तानि मे पश्य रूपाणि
सावधानेन चेतसा ५ ५

नीलकंठटीका १२

एवं प्रार्थितः सन् भगवानुवाच पश्य मे इति शतशः इत्यादिना
अनंतानीत्युक्तं नानावर्णानि नानाकृतीनि च ॥५॥

हे पार्थ मे ममैकस्यैव परमार्थसतः परमात्मनः स्वैश्वर्यातिशयात्स्वशक्तित्वेन संबद्धानि रूपाणि रूपाण्याकृतिविशेषात्मकानि पश्यावलोकय कीदृशानि नानाविधानि विचित्राणि अत एव नानावर्णाकृतीनि विविधावभाससंस्थानानि तथा दिव्यान्यमानुषीयाणीति ५

२ श्री. गी. टी. ५

आनंदीटीका

स्पष्टम् एतत्सामान्यतउद्दिष्टरूपविशेषणोत्तानार्थं ५

रामकंवीटीका स्पष्टार्थम् ५

लासिकी [illegible]टीका

हे पार्थ शतशः सहस्रश इति असंख्यातानि नानाविधान्यनेकप्रकाराणि दिव्यानि रूढंतया वभासमानत्वेपि दृष्टाणि हेतानि मया लोकेत्तराणि नानाविलक्षणवर्णाः शुक्लादयस्त्वाकृतयोवयवसंस्थानविशेषा येषां तानि रूपाणि पश्य द्रष्टुमर्होभव अर्हे लोट् [illegible] ५॥

पंचोलीटीका

एवं प्रार्थितो भगवान् अत्यद्भुतं स्वकीयं रूपं दर्शयिष्यन् सावधानत्वसंपादने नार्जुनमभिमुखीकरोति पश्य मे इति हे पार्थ मे मम शतशः अथ सहस्रशः नानाविधान्यनेकप्रकाराणि दिविभवानि दिव्यानि अप्राकृतानि च पुनः नानावर्णाकृतीनि नानाविधानि लक्षणानि नीलपीतप्रकारा वर्णा स्तथा आकृतयश्च अवयवसंस्थानविशेषा येषां रूपाणां तानि नानावर्णाकृतीनि पश्य ५

रणवीरसमिद्धोयिनी॥

स्पष्टार्थोयं श्लोकः ५॥

मधुभाष्य

५॥

भाष्य अनुवाद

जब ऐसी प्रार्थना अर्जुनने किया तब भगवान श्रीकृष्ण अपने रूप
देखावने का मनोरथ करके अर्जुन को सावधान होउ यह कहिक
रि चारि श्लोक मे कहते हैं कि हे पार्थ अर्जुन अपरिमित नाना प्रका
र के अलौकिक मेरे रूप देखो और वर्ण कहे शुक्ल कृष्ण आदि आ
कृति कहे कर चरण अङ्ग सब यथा योग मेरा दिव्य रूप नाना वर्ण
नाना आकृति तुम देखो जो देखा चाहते हो ५

दोहा

मोरे पार्थ रूप कहं सत सहस्र तं देष बहु विधनके दिव्य बहुव
र्ण प्रकार विशेष ५

16

पश्यादित्यान् वसून् रुद्रानश्विनौ मरुतस्तथा
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ६

शाङ्करभाष्यटीका १

पश्यादित्यानिति पश्य आदित्यान् द्वादश वसूनष्टौ रुद्रानेकादशाश्विनौ द्वौ मरुतः सप्त सप्तगणान् एतान् तथा च बहून्यन्यान्यपि अदृष्टपूर्वाणि मनुष्यलोके त्वया त्वत्तोऽन्येन वा केनचित् पश्याश्चर्याणि रूपाण्यद्भुतानि भारत ६

आनन्दगिरिकृतटीका २

दिव्यानि रूपाणि पश्येत्युक्ते तान्येव लेशतोऽनुक्रामति पश्यादित्यानिति तान् मरुतस्तथा पश्येति सम्बन्धः नानाविधानीत्युक्ते तदेव स्फुटयति बहूनीति अदृष्टपूर्वाणि पूर्वमदृष्टानि नानावर्णाकृतीनीत्युक्ते व्यनक्ति आश्चर्याणीति ६

स्वामिकृतटीका ३

तान्येवाह पश्येति आदित्यादीन्मम देहे पश्य मरुत एकोनपंचाशद्देवविशेषाः अदृष्टपूर्वाणि त्वयाऽन्येन वा पूर्वमदृष्टानि रूपाण्याश्चर्याण्यद्भुतानि ६

पैशाचभाष्यटीका ४

स्पष्टार्थं ॥

रामानुजभाष्यटीका ५

पश्येति मयि एकस्मिन् रूपे पश्यादित्यान् द्वादश वसूनष्टौ रुद्रानेकादशाश्विनौ द्वौ मरुत एकोनपंचाशान् प्रदर्शनार्थमिदं इह जगति प्रत्यक्षदृष्टानि शास्त्रदृष्टानि च यानि वस्तूनि च तानि सर्वाण्यप्यपि सर्वेषु कालेषु सर्वेषु शास्त्रेष्वदृष्टपूर्वाणि बहून्याश्चर्याणि पश्य ६

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ॥ ६ ॥ ॥ ॥

परमार्थप्रपाटीका ७

अधुनाप्याह पश्येति द्वादशादित्यान् अष्टवसून् द्वावश्विनौ प

कोनपंचाशन्मरुतः तथा अश्विनौ बहून्यदृष्टपूर्वाणि पूर्वमदृष्टान्यत
एवाश्चर्यजनकानि मद्रूपाणीति पूर्वेणोक्तेन हि मतः इत्यनुवृत्ति
हनीति [illegible]

वनमाली टीका ८

दिव्यानि रूपाणि पश्येत्युक्तानामेवानुक्रामति पश्येति पश्यादित्या
न्द्वादशवसूनष्टौ रुद्रानेकादश अश्विनौ द्वौ मरुत एकोनपंचाशत्
तथान्यान्यपि देवानित्यर्थः बहून्यप्यन्यान्यदृष्टपूर्वाणि पूर्वमदृष्टानि
मनुष्यलोके मयापि त्वया मेनवा केनापि न दृष्टानीत्यर्थः पश्याश्च
र्याण्यद्भुतानि आश्चर्यमयानि अद्भुतानि त्रयस्थितानि द्यादिलोकत्रया पा१
लोकोऽस्य पश्येति भावः ६

अस्मद्वैजयन्तीटीका· ६

स्वदेहस्थानि नानाविधरूपाण्याह द्वाभ्याम् पश्यादित्यानिति आदित्या
न दितेः पुत्रान् द्वादश सूर्यांनि इन्द्रप्रमुखान् आद्यशादिकपालांश्च वसू
नष्टौ रुद्रानेकादश अश्विनौ द्वौ नासत्यौ मरुतः एकोनपंचाशद्वायू
न् मय्येकस्मिन्नेव देहे इन्द्रावरेण सम्बन्धः तथा पश्य सावधानतया व
लोकय तथा तथा हे भारत अदृष्टपूर्वाणि त्वयान्येनापि केनचिदप्य
दृष्टमितः प्राक्कालेन दृष्टानि नतु त्रिविक्रमावतारे मत्स्यादिभिर्ब्रह्मणा
ज्ञायशोदयासभायां दुर्योधनादिभिश्च दृष्टानि कथमदृष्टपूर्वाणीत्य
त्रिकत्वं च घटते इति चेत्सत्यं तेषां भयोत्पादनाय मोहनाय च किं चित्का
रके परिछिन्नेन तन्न रूपं मया तेन दर्शितं इदानीं तथा त्वं न तत्प्रकारका १न
एवापरिछिन्नानि तथा दृष्टान्यनिःसृतानि तेन सदितैरन्यैर्ब्रह्मादिभिः
सर्वैः केश्चिदपि दृष्टपूर्वाणि न भवंत्यतो मदुक्तिस्संगच्छते एवं च ना
संभवेति बोध्यम् अदृष्टपूर्वत्वमेव द्रढयति बहून्यनन्तानि आश्चर्या
ण्यद्भुतानि तेऽस्मैव आश्चर्याणि कानिचिद्दृष्टान्यपि बहून्याश्चर्याणि
त्वं न दृष्टानि एवंभूतानि रूपाणि मत्प्रसादेन मदनुग्रहभाजनस्त्वमेव
पश्य मद्रूपदर्शनार्हो भवेत्यर्थः ६

मधुसूदनीटीका· ६

दिव्यानि रूपाणि पश्येत्युक्तानान्येव लेशतो
नुक्रामति द्वाभ्यां पश्यादित्यान्द्वादशवसूनष्टौ रुद्रानेकादश अश्विनौ द्वौ मरुतः स

सप्तसप्तकानेकोनपंचाशत् तथान्यानपि देवविशेषान् बहून्यन्या-
नि अदृष्टपूर्वाणि पूर्वमदृष्टानि मनुष्यलोके त्वया त्वत्तोऽन्येन वाके-
नचित् पश्याश्चर्याण्यद्भुतानि हे भारत अथ शतशोऽथ सहस्रशः
नानाविधानीत्यस्य विवरणं बहूनीति आदित्यानित्यादि च अदृष्ट-
पूर्वाणीति दिव्यानीत्यस्य आश्चर्याणीति नानावर्णाकृतीनीत्यस्य इ-
ति द्रष्टव्यं [illegible]
[illegible] ॥

सदानंदीटीका· ११

पश्येत्यनुक्रोशतो ह्यात्मानामनुकामतीश्वरः पश्य त्वं द्वादशादित्या-
न्वसून्नष्टावश्विनावुभौ रुद्रानेकादशैकोनपंचाशन्मरुतस्तथा
तथान्यानपि देवांस्त्वं दृष्टमहो भवार्जुन २ बहूनि यान्यदृष्टानि त्व-
या वान्येन केनचित् अत्यद्भुतैकरूपाणि पश्य भारतभूषण ६

नीलकंठी कारी· १२

दिव्यानि तावदाह पश्यादित्यानिति अदृष्टपूर्वाणि आश्चर्याणि
अद्भुतानि चतुर्मुखपंचमुखषण्मुखादीनि ६

आनंदीटीका

प्राक्सभायां दृष्टपूर्वानादित्यादीन्पश्यैवमदृष्टपूर्वाण्यन्यान्याश्च-
र्याणि पश्य [illegible] ६॥

रामकंठीटीका ^सर्वार्थम् ६

ल्लासिकी वल्लभीटीका एवं सामान्यतउक्तान्विशेषतो निर्दिशति ॥

आदित्यादिग्रहणमुपलक्षणार्थम् ये पूर्वं विभूतियोगे आदित्यादयो
व्याख्यातेनोक्ताः तानिदानीं पश्य महात्म्यात्मासादात्तरुः तथान्यान्यपि
बहून्यपरिमितान्यदृष्टपूर्वाणि त्वयान्येन वा केनचित् पूर्वमदृष्टान्या-
श्चर्याण्यद्भुतानि च पश्य [illegible] ६ ॥

१ सामान्येनोपक्रम्य विशिष्टान्युद्दिश्याह आदित्यान् द्वादशसंख्यान्देवविशेषांस्तथा वसूनष्टसंख्यान्
रुद्रानेकादशसंख्यानश्विनौ मरुतस्सप्तकोनपंचाशतं देवविशेषान्पश्येति प्राधान्यादेवतादृशान्युद्देशमात्रे-
ण संक्षेपत आह एतानि तावत्त्वया मनुष्यलोकवासिना सता दृष्टानि यान्यपि बहून्यपरिमितान्यदृष्टपूर्वाणि
न कदाचिदालोकितानि आश्चर्याणि तान्यपि सर्वाणि पश्य ६ ॥

पंचोलीटीका

किंच पश्येति हे भारत तथा आदित्यान् वसून् रुद्रान् अश्विनौ मरुत

पश्य बहून्यदृष्टपूर्वाणि आश्चर्याणि आश्चर्यकराणि पश्य ६

रणवीरसमिद्धोधिनी ॥

अथ नानाविधानि दिव्यानि रूपाणि दर्शयति पश्येति भारत पश्य आदित्यान् आदित्यगणान् सूर्यलोकव्यापिनस्तथा रुद्रान् रुद्रगणान् अंतरिक्षचरान् सोमलोकव्यापिनस्तथा च वसून् वसुगणान् भूलोकव्यापिनो अस्मदादिकान् पश्येत्येन नानुषंगः अश्विनौ सूर्यचंद्रप्रतिरूपकौ अश्विनीसुतौ तथा मरुतो मरुद्गणान् वातरूपान् देवसंज्ञकांश्च पश्य किंच बहूनीति बहून्यदृष्टपूर्वाणि पूर्वं केनचिद्दृष्टानि यान्यदृष्टपूर्वाद्भुतदर्शनान्यलौकिकचमत्कारकाणि महद्रूपाणि तान्यपि साक्षात्कुर्वित्यर्थः ६ ॥

मधुभाष्य

६ ॥

भाषा अनुवाद

अब सोई आप कहते हैं कि हे भारत सब आदित्य औ वसुगण रु
द्रगण तथा अश्विनीकुमार औ मरुतगण ये सकल देवता को
मेरी देह मे देखो और हे अर्जुन जो मेरा रूप न तुम ने न और
किसीने कभी देखा है ऐसा अद्भुत मेरा रूप देखो ६

दोहा

देखरवि वसु रुद्र कहुं अश्विनि मरुमारुत सर्व अदृष्ट बहु देख
हु आचरज मय भारत ६॥

इहैकस्थं जगत् कृत्स्नं पश्याद्य सचराचरं ।
मम देहे गुडाकेश यच्चान्यद् द्रष्टुमिच्छसि ७

शाङ्करभाष्यटीका· १

नकेवलमेतावदेव इहैकस्थमिति इहैकस्थं एकस्मिन् स्थि
ते जगत् कृत्स्नं समस्तं पश्याद्येदानीं सचराचरं सह चरेणाचरेण
वर्त्तते मम देहे गुडाकेश यच्चान्यज्जयपराजयादि यच्छंकसे य
द्वा जयेम यदि वा नोजयेयुरिति यदवोचः तदपि द्रष्टुं यदीच्छ
सि ७

आनन्दगिरिकृतटीका· २

न केवलमादित्यवस्वाद्येव मद्रूपं त्वया द्रष्टुं शक्यं किन्तु समस्तं
जगदपि मद्देहस्थं द्रष्टुमर्हसीत्याह नेत्यादिना सप्तमीद्वयं मिथः
सम्बध्यते समासान्तर्गतापि सप्तमी तत्वे वानीता यदीच्छसि तर्हि
इहैव पश्येति सम्बन्धः ७

स्वामिकृतटीका· ३

किंचेहेति तत्रतत्र परिभ्रमता वर्षकोटिभिरपि द्रष्टुमशक्यं कृत्स्नमपि
चराचरसहितं जगदिहास्मिन्मम देहे अवयवरूपेणैकत्रैव स्थितं पश्याद्य
नैव पश्य यच्चान्यत् जगदाश्रयभूतं कारणस्वरूपं जगतस्त्वावस्थाविशे
षादिकं जयपराजयादिकं च यदन्यत् द्रष्टुमिच्छसि तत्सर्वं पश्य ७

पैशाचभाष्यटीका ४

इह मम देहे गुडाका निद्रा तस्या ईश्वरः स्वामी गुडाकेशः जितनिद्रस्त्व
र्थः ७॥

रामानुजभाष्यटीका· ५

इहेति इह ममैकस्मिन् देहे तत्राप्येकदेशस्थं सचराचरं कृत्स्नं जगत्स
पश्य यच्चान्यद् द्रष्टुमिच्छसि तदप्येकदेश एव पश्य ७

अभिनवगुप्तकृतटीका· ६

स्पष्टार्थं ६

परमार्थप्रपा टीका· ७ यासोनास्तीत्याह इहैकस्थं इति॥
तान्यन्ये एकदेशात् कालतोव्याप्त
इह पुरोवर्त्तिनि वीजे मामसर्वभूतानां तथा वमस्य विश्वस्य परनिदानमि
जः॥ ति उक्तत्वात् सकलवीभूते मन्त्रष्याकृतिके मम देहे कृत्स्नं सर्वं जगदेक
स्थमेकत्र स्थितमग्राभूते नैव परूपेत उक्तं पार्थीरथस्याहिभुजस्वरूपेद
७

श्री १
गी टी
प

दर्शिदेहेविलेविश्वरूपं नविश्वरूपेद्रष्टा शेरणस्य यद्विश्वरूपस्यनिरा
नेमेनदितियतः पूर्वेस्वशरीरान्तर्मार्कण्डेयमुनयेश्रनंतरे शरीरैक
देशेजननमेविश्वरूपंदर्शितवान् तदुक्तमारण्यकेपर्वणिकाम्यकव
धि १ नोपविष्टंश्रीकृष्ण सहितंयुधिष्ठिरंप्रतिमार्कण्डेयेन ततःकदाचिमश्ण
मितस्मिन्कांक्षितनृसंप्लवे न्यग्रोधमहांतंवैतच्छाखायांनराधिप उप
विष्टंनपर्यंके पूर्णेन्दुसदृशाननं फुल्लपद्मविशालाक्षंबालंश्रीवत्सला
छनं ततोबालेनतेनत्वंसहसाविहृतंमुने तस्याहमवशोवक्त्रेदैवयो
गात्प्रवेशितः तत्रप्रविष्टस्त्सकलंवपश्यंनिखिलंजगत् यःसदेवो
मयादृष्टः पुरापद्मनिभेक्षणः सएषपुरुषव्याघ्रसंबंधीतेजनार्दनः
प्रसादेववरोदानेनस्मृतिर्नप्रजहातिमां दीर्घमायुश्चकौंतेयस्वछंदम
मरणंचवै सएषकृष्णोवार्ष्णेयः पुराणपुरुषोत्तमः श्रास्तेहरिरचिंत्या
त्माक्रीडन्निवमहाभुजः तथाश्रमेधिकेपर्वणिपांडवपदाभिषेका
नंतरंद्वारिकाभिगाउत्तंकमुनेरूपदेशायभगवताविश्वरूपंदर्शितं
तद्विलरभयाकिंचित्त्रिपर्यंत उत्तंकः प्रभिजानाभिजगतः कर्तारं
हं १ त्वांजनार्दन यदित्वनुग्रहंकिंचित्वत्तोहेहिजनार्दन द्रष्टुमिच्छामितेरूपं
वं १ वैस्वरूपंतन्निदर्शय वैशंपायनः ततःसतस्मैप्रीतात्मादर्शयामासतद्व
पुः शाश्वतंविश्वरूपंहिदृष्टंयद्धनंजयेनइति भागवतेपि मातत्र
दृष्टे विश्वंजगत्स्थास्नुचखंदिशः साद्रिद्वीपाब्धिभूगोलंसवाय्वग्नी
डतारकमिति एवंसति किंपुनःसकलदेहस्यार्थः अथकिंपुनर्भूत
जातमिहस्था यंच्छति पश्यामितकारणीभूतंब्रह्मादिदेवता विशेषा
दिकंवाद्रष्टुमिच्छसितदपिपश्येत्यर्थः अथशतशोथसहस्रशश्चस्पष्ट
श्रुतिरपि सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात् भूमिंविश्वतो
वृत्वात्यतिष्ठद्दशांगुलमिति भाष्यं सहस्रशीर्षेतिषोडशर्चस्य
नारायणोनामऋषिः श्रेष्टात्रिष्टुप् शेषाअनुष्टुभः अव्यक्तमहदा
दिवेनजातोयः पुरुषःसदेवतेतिसर्वानुक्रमः तत्रप्रथमासहस्रशीर्षे
ति सर्वप्राणिनांसमष्टिरूपोब्रह्माण्डदेहोविराडाख्योयःपुरुषःसोयंस
हस्रशीर्षा सहस्रशब्दस्योपलक्षणत्वादनंतैःशीर्षैःशिरोभिः युक्तइत्य
र्थः यानिसर्वप्राणिनांशिरांसितानिसर्वाणितद्देहांतःपातित्वात्तदी
यान्येवेतिसहस्रशीर्षत्वं एवंसहस्राक्षत्वंसहस्रपात्त्वंच सपुरुषः

भूमिं ब्रह्माण्डगोलरूपां विश्वतः सर्वतः कृत्वा परिवेष्ट्य दशां
गुलपरिमितं देशं अत्यतिष्ठत् अतिक्रम्य व्यवस्थितः दशाङ्गुलमि
त्युपलक्षणं तेन ब्रह्माण्डाद्बहिरपि सर्वतो व्याप्यावस्थित इत्यर्थः
यद्वा सप्तव्याहृतिकेषु प्राणायामेषु दशप्रणवा एव दशाङ्गुलानीति
केचित् ७

वनमालीटीका ८

न केवलमेतावदेव समस्तं जगदपि मद्देहे द्रष्टुमर्हसीत्याह
इहेति इहास्मिन्मद्देहे एकस्थमेकस्मिन्नेव यत्र क्वचिदवय
वे स्थितं कृत्स्नं समस्तं जगत् चराचरं जङ्गमस्थावरसंहितं तत्र त-
त्र परिभ्रमता वर्षकोटिसहस्रैरपि द्रष्टुमशक्यं अद्याधुनैव
पश्य हे गुडाकेश आलस्यशून्य यच्चान्यज्जयपराजयादिकं द्रष्टु
मिच्छसि तदपि सन्देहोच्छेदाय पश्य ७

कृष्णवैजयन्तीटीका ९

किंच हे गुडाकेश जितनिद्र मम सर्वेश्वरस्येह तव दृश्ये एकस्मिन्ने
व देहे शरीरे एकस्थं तत्रापि एकदेशे स्थितं सचराचरं चराचरस
हितं कृत्स्नं समग्रं जगद्ब्रह्माण्डात्मकं अद्याधुनैव त्वं पश्य यत्तत
च कस्यापि वर्षेण परिभ्रमता तानेव साधनवतापि त्वयायु
तायुतैर्वर्षैरपि द्रष्टुमशक्यं तदेवैकत्रैव मदनुग्रहान्मद्देहेऽव
लोकयेत्यर्थः च पुनः कालस्वभावप्रकृतिमहदहंकारादिकं
जगत्कारणरूपं ब्रह्मेशमरीच्यादिप्रजापतिरूपं चतुर्दशलो
कात्मकं ब्रह्माण्डं च अनन्तरमेदमाकृतेर्यद्भूतं तदपि यद्द्रष्टुमिच्छसि त
त्सर्वं त्वं पश्य इदमिश्यमिमीयतावच्छेदेन धारयितुमशक्यम
पि मत्कृपयैवमवलोकयेत्यर्थः ७

न केवलमेतावदेव समस्तं मधुसूदनीटीका ९ जगदपि मद्देहे द्रष्टुमर्हसी
त्याह — इहास्मिन्मद्देहे एकस्थमेकस्मिन्नेवावयवरूपेण स्थितं जगत्
कृत्स्नं समस्तं सचराचरं जङ्गमस्थावरसहितं तत्र तत्र परिभ्रमता
त्वा वर्षकोटिसहस्रेणापि द्रष्टुमशक्यं अद्याधुनैव पश्य हे गुडा
केश यच्चान्यज्जयपराजयादि यत् शंकसे यद्वा जयेम यदि
वा नो जयेयुरिति यदवोचस्तदपि द्रष्टुं यदीच्छसि तदपि संदेहे

श्री॰
गी टी॰
ए

छेदायपश्य [illegible]
[illegible] ७

श्रीधरी टीका॰ ११

तंममास्मिञ्छरीरे एकस्मिन्नकलंजगत् एकावयवरूपेण
स्थितंसचराचरंगमं वर्षकोटिसहस्रेणभ्रमतातत्रतत्रच अ
शक्यंद्रष्टुमद्यैवतत्पश्य जितनिद्रक २ जयाजयादिकंयद्य
न्दिद्रष्टुमिच्छसि पश्यसंदेहनाशायतत्सर्वमच्छरीरगं
३। ७

नीलकंठीटीका॰ १२

हेगुडाकेशजितनिद्र इहममदेहेएकस्थंएकस्मिन्नेवावय
वेनव्याप्यमात्रेस्थितंकृत्स्नंवर्तमानंजगत्पश्य यच्चान्यत्
अतीतमनागतंविप्रकृष्टंव्यवहितंस्थूलंसूक्ष्मंवातत्सर्वमि
हपश्य ७

आनंदीटीका

अहष्टपूर्वाण्येवाह — एवंसामान्यतःप्रोक्तेपियन्नान्यदितितत्स्वयंधनारीत्मयापूर्वमेव
हतानित्यर्थः [illegible] ७ ॥

रामकंठीटीका

[illegible] ह माह आदि [illegible]
[illegible] किंबहुनेहममसंबंधिनिदेहेएकस्मिन्नेवरूपेएकत्र

स्थितं कृत्स्नमखिलं चराचररूपतात्संलयेणाद्विप्रकारं यद्यद्यन्य
किंचिद्यद्यदभिलषितं द्रष्टुमभिवांछसि तद्देकस्यमेव पश्य पश्येत्येक
स्येव परमार्थसतः परमकारणस्यात्ममायाशक्त्यावभासितानं
तान्योन्याभिन्नभावात्मकत्वमिदमत्यद्भुतं पश्येत्यत्र तात्पर्यं [illegible]
[illegible] ७ ॥

लासिकी [illegible]टीका

किंच — हे गुडाकेश इहानुभावयिष्यमाणोऽस्मिन्मम स्वस्य देहे स्वरूपे चराचरं स्थावर
जंगमादि चेतनाचेतनभेदभिन्नं कृत्स्नं वर्षकोटिभिरपि द्रष्टुमशक्यं जगदिदं ता
स्वदीभूतं जडजातम् अद्य मत्प्रसादेनैकस्यमेकत्वेन मप्यभेदेन स्थितं
विश्रान्तं पश्य एकेत्यत्र भावो विवक्षितः द्येकेया [illegible]र्द्ध वचनैकवचने इति
वत् यच्चान्यज्जगतो वस्याविशेषादिकं जयपराजयादिकं च द्रष्टुमिच्छसि
तदपि सर्वं मे देहोऽक्षेदाय पश्य [illegible] ७

पंचोलीटीका

न केवलमेतावदेव च किंच इहेति हे गुडाकेश इह मम देहे अ
द्यापुनैव कृत्स्नं समग्रं चराचरं चरेणाचरेण सह वर्तमानः इति
सचराचरं स्थावरजंगमं एकस्थं जगत्पश्य यच्च अन्यदपि जयपरा
जयादिकं द्रष्टुं ज्ञातुमिच्छसि तदपि पश्य ७

रणवीरसमिद्धोधिनी

न केवलमेतावदेव मत्स्वरूपमपि वित्याद इहैकस्थमिति अत्र
गुडाकेशेति संबोधनं लोकत्तविवेकित्वयोतनार्थं इहास्मिन्मम
देहे भौतिके रूपावतारे यद्यतस्मिन्नेव काले सचराचरं कृत्स्नं सर्वं
जगद्रूपप्रजातं यन्तदेकस्थमेकत्र स्थितं पश्य मद्देहांतः स्थितं पः
पश्येत्यर्थः किंच यद्यदि अन्यस्य रूपांतरं द्रष्टुमिच्छसि तदपि प
पश्येति वाक्य शेषः ७ ॥

भाषा अनुवाद

और इस ब्रह्माण्ड के बीच हर एक स्थानोमे भ्रमण करते हुये जो
सूर्य चन्द्र ग्रह नक्षत्रादि समस्त चराचर जिन को कोटि वर्ष मे
भी कोई नहीं देखि सके है सो सब स्थावर जङ्गम समेत सम्पूर्ण
जगत इस मेरी शरीर मे अवयव करि है अर्जु. रूप देखो और हे गुडा
केश अर्ज्जुन जगत का आश्रय औ संसार की अवस्था तथा जय परा
पराजय आदिजो कुछ और देखा चाहो सो सब मेरे रूप मे देखो ७

दोहा

इहं एकठा सभ जगत देष चराचर याह   पार्थ अब मम देह म
हिं जो औरहि देषन चाह ७॥

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा। दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरं ८॥

शाङ्करभाष्यटीका १

किन्तु न तु मामिति। न तु मां शक्यसे न स्वकीयेन चक्षुषा मां विश्वरूपधरं शक्यसे द्रष्टुमनेन प्राकृतेन स्वचक्षुषा स्वकीयेन चक्षुषा येन तु शक्यसे द्रष्टुं दिव्येन तद्दिव्यं ददामि ते तुभ्यं चक्षुस्तेन पश्य मे मम योगमैश्वरं ईश्वरस्य ममैश्वरं योगं योगशक्त्यतिशयमित्यर्थः ८

आनन्दगिरिकृतटीका २

मन्यसे यदीत्युक्तमनुवदति किन्त्विति मत्प्रपञ्चमनवच्छिन्नं मां स्वचक्षुषा न शक्नोषि द्रष्टुमित्याह न त्विति कथं तर्हि त्वां द्रष्टुं शक्नुयामित्याशंक्याह येनेति दिव्यस्य चक्षुषो वक्ष्यमाणयोगशक्त्यतिशयदर्शने विनियोगं दर्शयति तेनेति ८

स्वामिकृतटीका ३

यदुक्तमर्जुनेन मन्यसे यदि तच्छक्यमिति तत्राह न त्विति अनेनैव त्वदीयेन चर्मचक्षुषा मां द्रष्टुं न शक्यसे शक्तो न भविष्यसि अतोहं दिव्यमलौकिकं ज्ञानात्मकं चक्षुस्तुभ्यं ददामि ममैश्वरमसाधारणं योगं युक्तिमघटितघटनासामर्थ्यं पश्य ८

पैशाचभाष्यटीका ४

स्पष्टार्थं

रामानुजभाष्यटीका ५

न तु मामिति अहं मम देहैकदेशे सर्वं जगद्दर्शयिष्यामीति त्वनेन नियमेन परिमितग्राहिणा प्राकृतेन स्वचक्षुषा मां तथाभूतं सकलेतरविसजातीयमपरिमेयं द्रष्टुं न शक्यसे त्वदिव्यमप्राकृतं मद्दर्शनसाधनं चक्षुर्ददामि पश्य मे योगमैश्वरं मम असाधारणं योगं पश्य ममानेन ज्ञानादियोगमनन्तविभूतियोगं च पश्येत्यर्थः ८

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ८ ॥ ॥ ॥ १

श्री·
गी·टी·
५

अथैतादृगद्भुतरूपदर्शनं चर्मचक्षुषां कथं स्यादित्याह नत्विति अने
न वर्तमानेन स्वचक्षुषा मे ऐश्वरमलौकिकं रूपं द्रष्टुं न शक्यसे तर्हि
त्वत्पमहमतत्थामीदिव्यं सत्ताकारान्तःकरणवृत्तिसदृक्षं तेजो नालं
केवलं ददामि ततः पश्य ... योगजनसंस्कारेणातीन्द्रियमपि निधानं
दृश्यत इत्यर्थः देयाः सकलांजनं दिव्यदृष्टिरिति पूर्वमेवोक्तं दि
व्यताकामपि देवकीतनयसेवकीकृतैर्येमनागपि मनो विनोद
नः अंजनं भवति सम्यग्लोचनस्य दृग्योगीति निधानसाधनं इति त
दुक्तं यावत्त्वं विश्वरूपं निजवपुषि परं दृष्टवान्न सव्यसाचीनावत·
सामान्यभावस्थितस्तं हि भगवान् दिव्यदृष्टिदत्तोऽभूत् नायं धपदिस्य - - - - - - -
रूपे रथगत ... मपरं वार्जुनस्य हि - - - - - - - -
- - - - उतस्थिथिषुः - - - - - - - - - - - - - - - स्थामितिप
वमेवाप्येरपि दिव्यदृष्टिदानपूर्वकं कृष्णदेहावयवेषु विश्वरूपं द
ष्टमिति कथायोगपर्वणि पाण्डवदौत्येन कौरवसभां प्राप्तो भगवद्यानेप्रा
क्तं विदुरेणैवमुक्ते तु केशवः परवीरहा दुर्योधनं पार्श्वस्थमभ्यभा
षत वीर्यवान् एकोऽहमिति यन्मोहान्मन्यसे मां सुयोधन परिभूय
चडुर्बुद्धे ग्रहीतुं मां चिकीर्षसि इहैव पाण्डवाः सर्वे तथैवान्धकवृष्ण
यः इहादित्याश्च रुद्राश्च वसवश्च महर्षयः एवमुक्त्वा जहासोच्चैः केश
वः परवीरहा तस्य संस्मयतः शौरेर्विद्युद्रूपा महात्मनः अंगुष्ठमा
त्रास्त्रिदशा मुमुचुः पावकार्चिषः तस्य ब्रह्मा ललाटस्थो रुद्रो वक्षसि
चाभवत् प्रादुरासंस्तथा दोर्भ्यां संकर्षणधनंजयौ भीमो युधिष्ठिरश्चैव
माद्रीपुत्रौ च पृष्ठतः अंधकावृष्णयश्चैव प्रद्युम्नप्रमुखास्तथा आवि
३४ र्बभूवुः कृष्णस्याग्रे समुद्यतमहायुधाः शंखचक्रगदाशक्तिः शा
र्ङ्गलांगलनंदकाः अदृश्यन्त धृतान्येव सर्वप्रहरणानि च नानावा
र्णेषु कृष्णस्य दीप्यमानानि सर्वशः नेत्राभ्यां वत्सस्यैव श्रोत्राभ्यां च
समंततः प्रादुरासन्महारौद्राः सधूमाः पावकार्चिषः रोमकूपेषु च त
थासूर्यस्येव मरीचयः तं दृष्ट्वा महद्भयं केशवस्य महात्मनः न्यमी
लयत नेत्राणि राजानः सर्वतश्चेतसः ऋते भीष्मं च द्रोणं च विदुरं संज
यं तथा ऋषयस्तेषां स भगवान् दिव्यचक्षुर्जनार्दनः तं दृष्ट्वा महदा

स्वर्ग्यमापवस्यसमातले देवदुंदुभयो नेदुः पुष्पवर्षं पपात चेति

अथ प्रकृतमनुसरामः ८

वनमाली टीका ८

इंद्रियप्रवर्तकस्य मनसोप्यगम्यस्य मम मायया परोक्षे मत्कृपया विना
न भवति मत्कृपया चानायासेन भवतीत्याह नत्विति अनेनैव
प्राकृतेन मत्प्रसादशून्येन चक्षुषा मां दिव्यालौकिकानंतैश्व
र्यविशिष्टं द्रष्टुं न शक्यसे न शक्तोपि अतो दिव्यमप्राकृतं मम
दिव्यरूपदर्शनक्षमं ददामि तेन दिव्यं चक्षुषा पश्य मे यो
गमघटद्घटनासामर्थ्यातिशयमैश्वर्यमीश्वरस्य मम असाधारणं
यद्यपि यावद्धर्मविशिष्टं भगवद्रूपं स्वस्योपास्यं यत्तावन्मात्र
स्यावद्धर्मविशिष्टरूपमर्जुनः सर्वदा साक्षात्करोति तथाप्यमि
तगुणालयस्य महैश्वर्यलतोधिकमैश्वर्यमर्जुनेन भगवन्मुखात्
श्रुतं तद्देवापरोक्षतो ज्ञातुमिष्टं तद्धानेन चक्षुषा द्रष्टुमशक्य
तादृशैश्वर्यदर्शनयोग्यभगवत्प्रसादस्याभावात् यथायथा
हि भगवत्प्रसादाधिक्यं तथा तथा तादृगधिकैश्वर्यस्य ज्ञाने नायमा
त्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन यमेवैष वृणुते तेन
लभ्य इति श्रुतेरिति भावः ८

कृष्णसेवैजयन्तीटीका ८

मम मे यदि नेच्छसि मर्जुनप्रार्थितं मे पादितं स्वस्याप्राकृत
रूपदर्शनयोग्यं दिव्यं चक्षुर्दत्वैव रूपमेव ददामीत्याह नतुमा
मिति अनेनैव प्राकृतरूप ग्राहिणा प्राकृतेन स्वचक्षुषा स्व
कीयेन चर्मचक्षुषा मामपरिमेयगुणपद्द्वयगतानंतं प्रचेद्व
र्गसुप्रसन्नं सकलेतरविसजातीयमत्यद्भुतरूपं द्रष्टुं न शक्य
सेन शक्तोपि समर्थो न भविष्यसि समर्थः अतस्ते तुभ्यं दिव्यमप्रा
कृतं मद्दर्शनसाधनभूतं चक्षुर्ददामि यथाहं निरतिशयप्रभा
क्रांतमात्मानं ध्यानस्तिमितधीर्वत्वत्तरपि तद्दर्शनक्षमं ददामी
त्यर्थः मे मम सर्वेश्वरस्येश्वरं योगमसाधारणमनंतज्ञानादि

श्री॰
गी॰ टी॰
५

२५

योगमनेनविभूतियोगंचपश्यपश्याद्याश्चर्यतेःनेनेतिश्रुत्यतेयोगोरू
पंपरमंरूपमैश्वरमितिवक्ष्यमाणात् मदृष्टेनैवदिव्येनचक्षुषाम
मैश्वरंरूपंपश्येत्यर्थः ननुयथार्जुनेनस्वभगवतादिव्यंचक्षुर्दत्तेन
शामनेपिदिव्यमदादितिचेन्नतस्यतद्रूपेणयुष्मदर्शनादस्यथा
नेदवमेदर्शयदेवरूपं किरीटिनंगदिनंचक्रहस्तमिच्छामित्वांद्र
ष्टुमहंतथैवरूपेणचतुर्भुजेनसहस्रबाहोभवमूर्तेवक्ष्यमाण
स्यैवपर्य्यापनेः नचपार्थसारथिरूपात्सहस्रशिरसोविश्वरूप
स्याधिक्यंभवेद्दृष्टिप्रदानरूपलिङ्गादितिवाच्यंतस्यैवदे
वाकारस्यहिभुजचतुर्भुजादिनराकाराधीनत्वात्निरतिशाय
तेजःप्रभावेवासंक्रांतेसहस्रशीर्षरूपेनिरतिशयतेजःप्रभा
वेनासंक्रांतेचदृष्टिर्ग्राहिणीयुक्तानत्वातिसौंदर्यलावण्यमाधु
र्य्यादिगुणशालिवनराकृतिकृष्णस्वरूपानुभवविनीदृष्टिस्तत्रग्राहि
णीभवेदतस्तस्मात्तस्याभिन्नत्वेनाधिकत्वंनास्त्येवयथासहस्रशी
र्षोविचित्रविश्वरूपस्सर्वपरमेतत्त्वैवमस्तदेवसूनोःपार्थसार
थेरपिश्रूयतेतथाहिसच्चिदानंदरूपायकृष्णायाक्लिष्टकारिणे
नमोवेदांतवेद्यायगुरवेबुद्धिसाक्षिणेकृष्णोवैपरमंदैवतमेको
वशीसर्वगःकृष्णईड्यएकोपिसन् बहुधायोविभातिईश्वरःप
रमःकृष्णःसच्चिदानंदविग्रहः अनादिरादिर्गोविंदःसर्वकारण
अत्रापिस्वयमेवोक्तमन्नःपरतरंनान्यत्किंचिदस्तिधनंजय अहंस
र्वस्यप्रभवोमत्तःसर्वंप्रवर्ततेमयिसर्वमिदंप्रोतं अहमादिर्हिदेवा
नाम् अर्जुनेनाप्युक्तंपरंब्रह्मपरंधामपवित्रंपरमंभवान्नित्यादिश्रु
तिस्मृतिसंधानप्रमाणानिसंतितस्मादुभयोरूपयोराधिकन्यून
तामत्राप्युक्त्याभासेनवदंतिनतत्तत्त्वज्ञाइत्यलंकुतराशेः
८ र्क

यत्कंमन्यसेयुदिनछक्यंमया मधुसूदनीटीका ९ द्रष्टुमितितत्रविशेषमाह॥

अनेनैवप्राकृतेनस्वचक्षुषास्वभावसिद्धेनचक्षुषामांदिव्यरूपंद्र
ष्टुंनतुशक्यसेनशक्नोषिचेत्यर्थःशक्ष्यसेइतिपाठेशक्तोनभवि
ष्यसीत्यर्थः सौवादिकस्यापिपाठोनेः देवादिकःशकन्धाद्भर
तिवा दिवादेःपाठोवैमेवमाप्यपरस्मैपदिकं तर्हिकेनाद्दृष्टुंकेवलंशक्नु
यामतआह दिव्यमप्राकृतंममदिव्यरूपदर्शनक्षमंददामिते॰

तु मां चक्षुः तेन दिव्येन चक्षुषा पश्य मे योगं घटनचटनासामर्थ्या-
तिशयं मे ऐश्वरम् ईश्वरस्य मम असाधारणं

न...

मरानंदीटीका ११

अनेन प्राकृतेन त्वं न शक्नोषि स्वचक्षुषा दिव्यं विश्वात्मकं द्रष्टुं स-
र्वाश्चर्यमयं हि मां १ ददाम्यप्राकृतं चक्षुः तमैश्वर्यदर्शने दिव्ये-
न चक्षुषा तेन महामायाश्रयं परं ममासाधारणं रूपं पश्य त्वं चाद्भु-
तोपमं १८

नीलकंठीटीका १२

यत्तूक्तं मन्यसे यदि तच्छक्यं मया द्रष्टुमिति तत्राह नत्विति शक्यसे
शक्नोषि पदविकरणव्यत्यय आर्षः अनेन प्राकृतेन दिव्यमप्रा-
कृते ऐश्वरं ईश्वरसंबंधि नियोगं विश्वाश्रयत्वलक्षणं सामर्थ्यं ८

मन्यसे यदि तच्छक्यमिति यदुक्तं त- आनंदीटीका

त्राह- अनेनैव मर्त्यजन्मानुगुणापरिमितदर्शिना चक्षुषा ऐश्वरं योगमी-
श्वरस्य फणिकिमविस्तं ... चटनतां पश्यन् यथावत्तत्ते निरूपाधानसंभा-
रसभितावेव तत्त्वे जगद्विचित्रं ममत्वमेकालाज्ञाच्छाय स्थलि नेइति
अथ च दर्शमाने अस्मिन्नेकत्र भूतसंघे ममैश्वर्ये गास्ते एवं पश्य

८ ॥

रामकंठीटीका

अतएवात्यद्भुतत्वादस्यार्थस्य ॥

अनेनैव मर्त्यभावात्परिमितदर्शिनैव चक्षुषा गोलकाधिष्ठानयादृक-
रूपाद्युन्मेषप्रदर्शयिष्यमाणं चर्यरूपं द्रष्टुमालोकयितुं न शक्य-
से न त्वमोभविष्यसि ततो दिव्यं सर्वदर्शि शक्तियोगात्परमात्मरूपपर-
माकाशभवं प्रकृष्टज्ञानात्मकं चक्षुस्तेऽहं ददामि ते पारमैश्वर्याख्यशक्त्या-
निश्रयतत्त्वसैवाविर्भावयेयम् तेन ममैश्वरमीश्वरस्य संबन्धि प्रदर्शया-
यिष्यमाणं रूपं पश्य मानात्तिरूपयेति

[illegible] ८॥

लाक्षिकी [illegible]टीका

किंच — तुःपतोनरे यथामांवसुदेवात्मजमनेनस्ववक्षुषापश्यामि तथा
मामीश्वरमत्नलक्षणंद्रष्टुंसाक्षात्कर्तुमनेनैनैववक्षमयेनस्वकीयेनव
क्षुषानशक्नोसि अतोहेतोर्दिव्यंलोकोत्तरंवक्षुरिवक्षुर्मदीयैश्वररूपसा
क्षात्कारक्रियाकारणंज्ञानंवक्षुस्तेतुभ्यंददामितेनैवममैश्वरंयोगं म
हाव्याप्तिसहितंममाधानेपश्यसाक्षात्कुरु [illegible] ८

पंचोलीटीका

विद्यमानवक्षुषाअनधिकारित्वंदर्शयन्‌वक्षुरंतरंदातुंप्रतिजा
नीते नत्विति तुपुनःमांविश्वरूपमनेनप्राकृतेनवक्षुषाद्रष्टुं ना
शक्यसेनशक्नोषितेतुभ्यंदिव्यंवक्षुषीददामियेनदिव्येनवक्षुषा
द्रष्टुंशक्नोषिमेममपेश्वरसंबंधिनंयोगंशक्त्यातिशयंपश्य ८

रसावीरसमिद्धोधिनी ॥

ननु किंपुनर्भवद्रूपंचर्मादृतेनवक्षुषैव द्रष्टव्यंभवेदित्यतआह
नत्विति तुशब्दो विशेषद्योतकः त्वयामांमत्स्वरूपंद्रष्टुमनेनैव
वक्षुषानशक्यसे तस्मातेतदिव्यंवक्षुःप्रज्ञानात्मिकांदृष्टिं
ददामि येनसाधनभूतेनमेममैश्वरंयोगंपश्यसाक्षात्करोषी
त्यर्थः ८॥

मधुभाष्य

८॥

भाषा अनुवाद

और जो अर्जुन ने कहा कि वह रूप मेरे देखने जोग्य होय तो दे
खावो इस पर कहते हैं कि हे अर्जुन इन अपने चर्म चक्षु करके
चमड़े की आँखों से हमारे उस रूप को न देख सकोगे इस सेह
म तुम को अलौकिक दिव्य ज्ञानचक्षु देते हैं सो मेरा ईश्वर रूप
अघटन घटना समर्थ्य दर्शन करो ८

दोहा

मोहि याकें नहि देषतें इन चक्षु निज सेंह दिव्य नयन तोहि
देत हौं मम ऐश्वरयोग लषेह ८

97

सञ्जय उवाच एवमुक्त्वा ततो राजन् महायोगे
श्वरो हरिः दर्शयामास पार्थाय परमं रूपमै
श्वरं ९

शाङ्करभाष्यटीका· १

एवं ते यथोक्तप्रकारेणोक्त्वा ततोऽनन्तरं राजन् धृतराष्ट्र महांश्चासौ योगेश्वरश्चेश्वरो हरिर्नारायणः दर्शयामास दर्शितवान् पार्थाय पृथासुताय परमं रूपं विश्वरूपमैश्वरं ९

आनन्दगिरिकृतटीका· २

इमं वृत्तान्तं धृतराष्ट्राय सञ्जयो निवेदितवानित्याह सञ्जय इति स्वकीये विश्वरूपाख्ये रूपे न प्राकृतेन चक्षुषा निरीक्षितुं क्षमं किन्तु दिव्येन इत्यादि यथोक्तप्रकारः अनन्तरं दिव्यचक्षुषः प्रदाना दित्यशेषः हरत्यविद्यां सकार्यामिति हरिः यदीश्वरस्य मायोपहितस्य परमुत्कृष्टं रूपं तद्दर्शयाम्बभूवेत्याह परममिति ९

स्वामिकृतटीका· ३

एवमुक्त्वा भगवानर्जुनाय स्वरूपं दर्शितवान् तद्रूपं दृष्ट्वार्जुनः श्रीकृष्णं विज्ञापितवानित्येतमर्थमेवमुक्त्वेत्यादिभिः षड्भिः श्लोकैः धृतराष्ट्रं प्रति सञ्जय उवाच एवमिति राजन् हे धृतराष्ट्र महांश्चासौ योगेश्वरश्च हरिः परमं पैश्वरं रूपं दर्शितवान्

पैशाचभाष्यटीका· ४

सञ्जय उवाच एवमुक्त्वेति राजन्निति धृतराष्ट्रस्य सम्बोधनं योगा विद्यन्ते येषां ते योगाः महायोगानामीश्वरो हरिः ९

रामानुजभाष्यटीका· ५

सञ्जय उवाच एवमिति एवमुक्त्वा सारथ्ये वस्थितः पार्थमातुलजो महायोगेश्वरो हरिः महाश्चर्ययोगानामीश्वरः परब्रह्मभूतो नारायणः परमैश्वरं स्वासाधारणं रूपं पार्थाय पितृष्वसुः पुत्राय दर्शयामास ९

अभिनवगुप्तकृतटीका· ६

स्पष्टार्थं ९

परमार्थप्रपाटीका· ७

एवमुक्त्वा भगवानर्जुनाय रूपं दर्शितवान् तच्च रूपं दृष्ट्वार्जुनः श्रीकृ
ष्णं विज्ञापितवानितीमं वृत्तान्तं धृतराष्ट्रं प्रति संजय उवाच एवमुक्त्वेति
षड्भिः श्लोकैः भो राजन् धृतराष्ट्र महायोगेश्वरो हरिः महांतश्च ते योगेश्व
राश्च महायोगेश्वराः योगो हि जीवब्रह्मैक्यं तत्र ईश्वराः समर्थाः शुकवामदे
१॰ वयाज्ञवल्क्यप्रभृतयस्तेषामपीश्वरः कृष्णः पार्थाय परमं पारमार्थिकं रूप
मैश्वरमघटनघटनापटीयो दर्शयामास [illegible] ९

वनमालीटीका॰ ८

भगवानर्जुनाय दिव्यं रूपं दर्शितवान् स च तद्दृष्ट्वा विस्मयाविष्टो भगवंतं
विज्ञापितवानितीमं वृत्तान्तमेवमुक्त्वेत्यादिभिः षड्भिः श्लोकैर्धृतराष्ट्रं प्र
त्याह संजयः एवं न तु मां शक्यसे द्रष्टुमित्याद्युक्त्वा दिव्यचक्षुः प्रदानानं
तरं हे राजन्महान् जगद्गुरुर्यद्दिकर्तृत्वेन सर्वान्तर्यामित्वेन च सर्वोत्कृष्टत्वा
त्सोऽयं योगेश्वरश्चेति महायोगेश्वरः योगानामघटघटनापटीयोऽनन्तशक्तीना
मीश्वरो भक्तानां सर्वक्लेशापहारी दर्शनायोग्यमपि कृपया दर्शयामा
स पार्थायैकान्तभक्ताय परमं दिव्यं रूपमैश्वरम् ९
१०

ॐ श्रीमद्वैजयन्तीटीका॰ ९

पार्थसारथिर्भगवान् पार्थमेवमेवोक्त्वा तस्मै स्वकं रूपं दर्शितवान् तद्
रूपदर्शनेनार्जुनोऽत्यन्तविस्मयमनाभवत्तमेव विज्ञापितवानित्येवम
र्थं संजयो धृतराष्ट्रमत्रवाच षड्भिः एवमुक्त्वेति ततो दिव्यचक्षुः प्रदाना
नंतरं हे राजन् धृतराष्ट्र महायोगिन् योगेश्वरो [illegible] महा
त्मा सौ योगेश्वरश्च महतामस्मा[illegible]श्चर्यरूपाणां योगानां मदसाधारण
रूपाणामनेन ज्ञानादियोगरूपाणामनेन विभूतियोगरूपाणां चेश्वरो
नियतेतिवासः हरिः [illegible]ष्णः परब्रह्मभूतः पार्थाय मातुलेयः श्रीकृष्णः पा
र्थरथ्य एवावस्थितस्तन्न एवमुक्तप्रकारेणोक्तोऽहमद्य तवतत्परिहासमिष
णाज्ञस्य ध्यानवत्त्वामिकिंतसमसमेवेत्याशयेनोक्तेस्वकः पार्थाय पितृष्व
स्रीयाय परममिश्राय परमे सर्वोत्कृष्टमैश्वरं स्वस्वाभाविकासाधारणं रू
पं विविधविविज्ञानन्तावियात्विलचेतनाचेतनात्मकविश्वाश्रयभूतं
विग्रहं दर्शयामास दर्शितवान् ९

मधुसूदनीटीका ९
१॰ एवं न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा दिव्यं ददामि ते चक्षुरित्यु
क्त्वा ततो दिव्यचक्षुः प्रदानादनंतरं हे राजन्धृतराष्ट्र स्थिरो भव श्रवण

१॰ भगवानर्जुनाय दिव्यं रूपं दर्शितवान् स च तद्दृष्ट्वा विस्मयाविष्टो भगवंतं विज्ञापितवानितीमं वृत्तां
तमेवमुक्त्वेत्यादिभिः षड्भिः श्लोकैः धृतराष्ट्रं प्रति संजय उवाच ॥

यमहात्मसर्वीतकृष्णस्यासौ योगेश्वरश्चेति महायोगेश्वरो हरिः भक्तानां
सर्वक्लेशापहारी भगवान् दर्शनायोग्यमपि दर्शयामास पार्थाय ए
एकान्तभक्ताय परमं दिव्यं रूपमैश्वरं

सदानंदी टीका ॥

समस्ताश्चर्यनिलये समस्तैश्वर्यसंयुते भगवान्प्रार्थितो रूपं दर्शयामा
सजिस्नवे १ तद्दृष्ट्वा विस्मयाविष्टः स विज्ञापितवान्हरिं इतीमं सर्ववृ
त्तान्तं धृतराष्ट्रं नृपं प्रति २ उवाच संजयः षड्भिः श्लोकैरैश्वर्यतन्मयैः दि
व्यं ददामि ते चक्षुरेवमुक्त्वार्जुनं प्रति ३ सर्वात्मकश्चाखिलयोगलक्ष्या
सौ परमेश्वरः दिव्यचक्षुःप्रदायादौ दर्शयामास तद्वपुः ४ भक्तक्ले
शहरः स्वामी दर्शनानर्हमप्यसौ दर्शयामास पार्थाय दिव्यं तत्पारमे
श्वरं ५ ९

नीलकंठीटीका ॥

एवमुक्त्वा भगवानर्जुनाय दिव्यं रूपं दर्शितवान् स च दृष्ट्वा विस्म
याविष्टो भगवन्तं विज्ञापितवानितीमं वृत्तान्तमेवमुक्त्वेत्यादि षड्
भिः श्लोकैर्धृतराष्ट्रं प्रति संजय उवाच एवमुक्त्वेत्यादि ततः दिव्यच
क्षुःप्रदानानन्तरं राजन् हे धृतराष्ट्र महात्मासौ योगेश्वरश्चेति वि
ग्रहः महतो योगस्य वा ईश्वरः परमं दिव्यं रूपं ऐश्वरं मायाविम
बेधिनं तमायातीतं दर्शयामास ९

श्रानंदीटीका स्पष्टार्थम् ९

रामकंठीटीका स्पष्टार्थम् ९

अथ भगवता परमसमाधिना नि
रतिशयनिजरूपयोग्यतादानायार्जुनाय यथा उप
स्थिते तथैव सर्वं भगवद्व्यासमुनिप्रसादापादित
दिव्यचक्षुर्धृतराष्ट्राय प्रति
पादयितुं संजय उवाच॥

अथ व्यासमुनिप्रसादाल्लब्धदिव्यदृष्टिर्हि लासिकी [illegible]टीका

तिनः श्र
स्थितं धृत
राष्ट्रं प्रति
श्रुत्वैन हृतं
वोधयितुं

हे राजन् धृतराष्ट्र महात्मा सर्वज्ञात्मतया व्याप्तिलक्षणो योगस्तेन समर्थो यो
तमीश्वरः ममर्थो हरिः श्रीकृष्णः एवं दिव्यं ददामि ते चक्षुरित्युक्त्वा ततः
पूर्तिज्ञानत्वं पार्थायार्जुनमनुगृहीतं परममत्यन्तोत्कृष्टमैश्वरं रूपं दर्शया
मास प्रदर्शितं प्रबुद्धे पार्थस्य दृष्टतया तत्त्वेनैश्वरं रूपं ज्ञानविषयीचका
रेत्यर्थः तदैश्वरं रूपं त्रिधा एकमहं तावदितास्फुटेदं तामयमहमिदमि
ति एवं सदाशिवतत्त्वमिति नाम्ना तत्त्ववादिभिर्व्यवहृतम् द्वितीयं स्फु
टेदं ताहंता सामानाधिकरण्यात्मकमिदमहमिति यत्नेश्वरतत्त्वमित्युक्तं
तृतीयं समस्ततत्त्वावन्यायेनाहमिदं चियोः सामानाधिकरण्यं तत्

गीं
टीं
प

त्वबलंस्थहविथायस्यमिति ... ९॥

29

पंचोलीटीका

एवमुक्त्वा भगवान् अर्जुनाय यत्स्वरूपं दर्शितवान् तत्स्वरूपं यादृशं दृष्टमर्जुनेन तादृशं धृतराष्ट्रं प्रति संजयः एवमुक्त्वेत्यादिभिः षड्भिः श्लोकैः प्रतिपादयति एवमितिहेराजन् महायोगेश्वरः महांश्चासौ योगेश्वरश्च महायोगेश्वरो हरिः एवं यथोक्तेन प्रकारेण उक्त्वा ततः अनंतरं पार्थायार्जुनाय परमं पेश्वरं रूपं दर्शयामास ९

रणवीरसमिद्योधिनी॥

एवं भगवतार्जुनं प्रति यदनुग्रहलक्षणं वचनं यथोपदिष्टं तत्तथैव धृतराष्ट्रं प्रति संजय उवाच एवमुक्त्वेति निगदव्याख्यातमेतच्छ्लोकद्वयं ९॥

मधुभाष्य

समर्थश्चेत्यादि वाभिधानं हरिः सर्वयज्ञादिभागहारित्वात् यज्ञोपहृतं गोदेषु हरेभागं कल्पयंद वर्णोमेहरितः श्रेष्ठत्त्वाहरिरिति स्मृतः अनिमोदयथर्मे सर्वाश्चर्यमयं सर्वाश्चर्यात्मकं सहस्र

भाषा अनुवाद

इस प्रकार से कहिकर भगवान ने अर्जुन को अपना विराट रूप देखाया तो वह रूप देखि अर्जुन श्रीकृष्ण को जैसा जाना औ देखा सोई छः श्लोक से राजा धृतराष्ट्र के प्रति सञ्जय कहते हैं कि हे राजन् धृतराष्ट्र महात्मा श्रीकृष्ण योगेश्वरने अर्जुन से ये स बातें करके अपना ऐश्वर्य विशिष्ट परम रूप अर्जुन को दर्शन कराया ९

दोहा

ऐसें कहि फिर नृप महायोगेश्वर हरि सोय परम रूप ऐश्वर तवे
दर्शाइ पार्थ कोय ९

अनेकवक्त्रनयनमनेकाद्भुतदर्शनं अने
कदिव्याभरणं दिव्यानेकोद्यतायुधं ॥

शाङ्करभाष्यटीका ॥ १

अनेकेति अनेकवक्त्रनयनं अनेकानि वक्त्राणि नयनानि च यस्मिन् रूपे तदनेकवक्त्रनयनं अनेकाद्भुतदर्शनं अनेकान्यद्भुतानि विस्मापकानि दर्शनानि यस्मिन् रूपे तदनेकाद्भुतदर्शनं रूपं तथानेकदिव्याभरणं अनेकानि दिव्याभरणानि यस्मिंस्तदनेकदिव्याभरणं तथा दिव्यानेकोद्यतायुधं दिव्यानि अनेकानि उद्यतानि आयुधानि यस्मिंस्तद्दिव्यानेकोद्यतायुधं दर्शयामासेति पूर्वेण सम्बन्धः ॥

आनन्दगिरिकृतटीका ॥ २

तदेव रूपं विशिनष्टि अनेकेति दिव्यान्याभरणादीनि भूषणान्यु-
द्यतानि उत्क्षिप्तानि ॥

स्वामिकृतटीका ॥ ३

कथंभूतं तदित्याह — अनेकेति अनेकानि वक्त्राणि नयनानि च यस्मिंस्तत् अनेकानामद्भुतानां दर्शनं यस्मिन् तत् अनेकानि दिव्याभरणानि यस्मिंस्तत् दिव्यान्यनेकान्युद्यतान्यायुधानि यस्मिंस्तत् ॥

पैशाचभाष्यटीका ॥ ४

अनेकवक्त्रनयनं [illegible] अनेकानि वक्त्राणि नयनानि अनेकाद्भुतानां दर्शनमुपलब्धिर्यत्र रूपे तद्रूपमनेकाद्भुतदर्शनं दिव्यान्यनेकान्युद्यतान्यायुधानि यत्र रूपे तद्दिव्यानेकधा प्रविभक्तमेकस्थमपश्य-
दिति व्यवहितेन संबंधः ॥

रामानुजभाष्यटीका ॥ ५

स्पष्टार्थम् अनेकेति [illegible] तमानताविशानवि ॥

अभिनवगुप्तकृतटीका ॥ ६

स्पष्टार्थं ॥

परमार्थप्रपटीका ॥ ७

तत अनेकवक्त्रनयनमित्यादितः श्लोकद्वयं रूपवर्णनार्थं स्पष्टार्थं ॥

वनमाली टीका॰ ८

अनेकवक्त्राणि नयनानि च यस्मिन् रूपे अनेकेषामद्भुतानां विस्मयहेतूनां दर्शनं यस्मिन् अनेकानि दिव्यान्याभरणानि भूषणानि यस्मिन् दिव्यान्यनेकान्युद्यतान्यायुधान्यस्त्राणि यस्मिन् तथाभूतम् १०

ऊरुमदैजयन्ती टीका॰ ९

तत्किमाकारकं रूपमित्यपेक्षायामाह अनेकवक्त्रनयनमिति अनेकवक्त्रनयनेऽत्रानेकसहस्रशब्दः असंख्यपर्यायवाची विश्वतश्चक्षुरुत विश्वतोमुख इति श्रुतेः अनेकान्यपरिमितानि संख्यावच्छेदशून्यानि वक्त्राणि मुखानि नयनानि च लक्ष्यन्ते यस्मिंस्तद्रूपं अनेकाद्भुतदर्शनं अनेकानामसंख्यानामद्भुतानामाश्चर्याणां दर्शनं यस्मिंस्तत्तथा अनेकदिव्याभरणं अनेकान्यसंख्यानि दिव्यानि शोभमानानि आभरणानि मुकुटकुण्डलकेयूरकटककौस्तुभकटिसूत्रहारनूपुरादीनि यस्मिंस्तत् दिव्यानेकोद्यतायुधम् दिव्यानामसंख्यानामनेकानामनन्तानामद्भुतानि सज्जीकृतकरोत्तोलितानि आयुधानि चक्रचर्मचापखड्गगदाहलमुसलादीनि यस्मिंस्तत्तथा अत्रायुधशब्देनोपलक्षिताः शङ्खवेणवादयो वाद्या अप्यूहनीयाः तेषामपि सांग्रामिकत्वात् १०

मधुसूदनी टीका॰ १०

तदेवं रूपं विशिनष्टि — अनेकानि वक्त्राणि नयनानि च यस्मिन् रूपे अनेकानामद्भुतानां विस्मयहेतूनां दर्शनं यस्मिन् अनेकानि दिव्यान्याभरणानि भूषणानि यस्मिन् दिव्यानि अनेकान्युद्यतानि आयुधान्यस्त्राणि यस्मिन् तत्तथाभूतं १०

सदानन्दी टीका॰ ११

तदेव रूपं श्रीविष्णोर्विशिनष्टि संजयः यस्मिन् वक्त्राण्यनेकानि नेत्राणि तत्तथाविधम् १ अद्भुतानामनेकेषां यस्मिन् रूपे स्थित दर्शनं यस्मिन् दिव्यान्यनेकानि भूषणानि च तत्तथा २ यस्मिन् दिव्यान्यनेकानि प्रोद्यतान्यायुधानि तत् १०

नीलकण्ठी टीका॰ १२

तदेव रूपं विशिनष्टि द्वाभ्याम् अनेकेत्यादिना अनेकान्यनन्तानि वक्त्राणि नयनानि च यस्मिन् तदनेकवक्त्रनयनं अनेकान्यद्भुता-

निदर्शनानियस्मिंस्तदनेकाद्भुतदर्शनं अनेकानिदिव्यान्याभ
रणानियस्मिन् दिव्यानिअनेकानिउद्यतानिआयुधानिवज्रा
दीनियस्मिन् ९

आनंदीटीका स्पष्टार्थम् ९

रामकंठीटीका स्पष्टार्थम् ९

लासिकी [illegible]टीका

तत्र कीदृशं तं देवं स्वरूपमि तिविशेषणद्वारेण सदाशिवतत्वास्फुरद्विधानंतमैश्वरं रूपंविशि नष्टि ॥ अनेकानिवक्त्राणिनयनानिचयस्मिंस्तत् अनेकवक्त्रनयनम्
अनेकानामद्भुतानांविस्मयहेतूनांदर्शनंयस्मिंस्तत् अनेकानिदि
व्यानिलोकोत्तराणिआभरणानिभूषणानियस्मिंस्तत् दिव्यान्यनेका
न्युद्यतानिआयुधानियस्यतत [illegible] ९

पंचोलीटीका

कथंभूतंतदित्याह अनेकेति अनेकानिवक्त्रानिनयनानिचयस्मिन्
रूपेतदनेकवक्त्रनयनं अनेकानिअद्भुतानिविस्मयकानिदर्श-
नानियस्मिन्रूपेतदनेकाद्भुतदर्शनमनेकानिदिव्यान्याभरणा
नियस्मिन्रूपेतदनेकदिव्याभरणंदिव्यान्यनेकानिवज्रादीनि-
उद्यतानिआयुधानियस्मिन्रूपेतद्दिव्यानेकोद्यतायुधं १० ॥

रणवीरसमिद्धोपिनी

स्पष्टः १० ॥

मधुभाष्य

१० ॥

32

भाषा अनुवाद

अब किस प्रकार का वह रूप है सो कहते हैं कि अनेक हैं वक्र
कहे मुख औ नेत्र तथा अनेक अनेक हैं अद्भुत वस्तवों का दर्शन
जिसमे और अनेक दिव्य आभरण औ दिव्य अनेक आयुध धारण
हैं जिसमे ऐसा रूप भगवान ने अर्जुन को देखाया ९

दोहा

मुख अनेक अरु नयनहूं अद्भुत दर्श अनेक भूषण दिव्य अनेक
सो धारे दिव्य लसैं नैक १०

दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनं स
र्वाश्चर्यमयं देवमनन्तं विश्वतोमुखं ॥

शाङ्करभाष्यटीका १

किञ्च दिव्येति दिव्यमाल्याम्बरधरं दिव्यानि माल्यानि पुष्पाणि अम्बराणि वस्त्राणि च ध्रियन्ते येनेश्वरेण तं दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनं दिव्यगन्धानुलेपनं सर्वाश्चर्यमयं सर्वाश्चर्यप्रायं देवमनन्तं नास्यान्तोऽस्तीति अनन्तस्तं विश्वतोमुखं सर्वभूतात्मत्वात् तं दर्शयामासार्जुनोददर्शेति वा अध्याह्रियते ॥

आनन्दगिरिकृतटीका २

तदेव रूपं विशिनष्टि अनेकेति दिव्यान्याभरणानीति हारकेयूरादीनि भूषणान्युद्यतानि शस्त्राणि उक्तरूपवन्तं भगवन्तं प्रकारान्तरेण विशिनष्टि किञ्चेति अध्याहारोऽपि पदसंघटना सम्भवात् ॥

स्वामिकृतटीका ३

किंच दिव्येति दिव्यानि माल्यान्यम्बराणि धारयतीति तथा दिव्यो गंधो यस्य तादृशमनुलेपनं यस्य तत् सर्वाश्चर्यमयमनेकाश्चर्यप्रायं देवं द्योतनात्मकमनन्तमपरिच्छिन्नं विश्वतः सर्वतो मुखानि यस्मिंस्तत् ॥

पैशाचभाष्यटीका ४

स्पष्टार्थं ॥

रामानुजभाष्यटीका ५

दिव्येति द्योतमानं देवमनन्तं कालत्रयवर्तिनिखिलजगदाश्रयतया देशकालपरिच्छेदानर्हं विश्वतोमुखं विश्वदिग्वर्तिमुखं दिव्यमाल्याम्बरगंधमाल्याभरणायुधान्वितं ॥ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ॥ ॥ ॥ ॥

परमार्थप्रपाटीका ७

स्पष्टार्थं ॥ ॥ ॥

वनमालीटीका ८

दिव्यानि माल्यानि पुष्पमयानि रत्नमयानि च तथा दिव्यान्यम्बराणि वस्त्रा

श्री
गी टी

णि च ध्रियंते येन तत् दिव्यमाल्यांबरधरं दिव्यगंधोस्येति दिव्यगंधयस्तद्
नुलेपनं यस्य तत् सर्वाश्चर्यमयमनेकाद्भुतप्रचुरं देवं द्योतनात्मकं
अनंतं देशकालाद्यपरिच्छिन्नं विश्वतः सर्वतोमुखो नियस्मिन् तत्
रूपं दर्शयामासेति पूर्वेण संबंधः ददर्शेत्यध्याहारो वा ॥

रामवैजयन्ती टिका ९

किंच दिव्यमाल्याम्बरधरमिति दिव्यान्यत्युज्ज्वलनूतनादि माल्यानि वै
जयन्त्यादीन्यम्बराणि शुक्लपीतरक्तनीलवर्णकानि च यथ वृत्तीति तत्र यथा
तत् दिव्यः कालाद्यवस्थाभावरहितः सकलसुरनरादिमनोहरो गंधो
यस्य तादृशमनुलेपनं मृगमदचंदनकुंकुमादिपंकं यस्य तत्तथा सर्वा
श्चर्यमयमनेकाद्भुतप्रचुरं देवं द्योतनात्मकं अनंतं देशकालादिप
रिच्छिन्नस्वरूपं विश्वतोमुखं विश्वतः सर्वतोमुखानि यस्मिन् तत्तथा तद्रूपं
दर्शयामासेति संबंधः पार्थो ददर्श सख्याहारो वा पूर्वस्मोके अनेकव
क्त्रनयनमित्युपलक्षितानां सर्वेषां श्रोत्रादीन्द्रियाणां सर्वव्यापरिच्छेद
रूपं दर्शितं अत्र तु सर्वमित्युपलक्षितानां सर्वेन्द्रियाणां सर्वेन्द्रियार्थ
ग्रहणसामर्थ्यं दर्शितं मत्तो वक्त्रमुखेषोरुभावेण न पुनरुक्तिदोषगं
धावकाश इति भावः ॥

मधुसूदनी टीका ९

दिव्यानि माल्यानि पुष्पमयानि रत्नमयानि च तथा दिव्यान्यंबराणि व
स्त्राणि च ध्रियंते येन तद्दिव्यमाल्यांबरधरं दिव्यो गंधोस्येति दिव्यगंधयस्य
तदनुलेपनं यस्य तत् सर्वाश्चर्यमयमनेकाद्भुतदर्शनकमूर्त्यादि द्रव्यप्र
चुरं देवं द्योतनात्मकं अनंतमपरिच्छिन्नं विश्वतः सर्वतोमुखानि यस्मि
न् तद्रूपं दर्शयामासेति पूर्वेण संबंधः अर्जुनो ददर्शेति अध्याहारो वा ॥
[illegible] ॥

सदानंदी टीका ११

ध्रियंते येन दिव्यानि माल्यानि वसनानि तत् दिव्यो गंधो यस्य तेनानुले
पनं यस्य तत्तथा अनेकाश्चर्यप्रचुरमनंतं द्योतनात्मकं तद्रूपमपरि
च्छिन्नं सर्वतोमुखं विसंयुते २ दर्शयामास पार्थाय येन मनेनान्वयः कृत्ते ॥११॥

नीलकंठी टीका १२

विश्वतोमुखमिति पूर्वोक्तस्य पकत्वेन एकश्लोकेनवक्रया विश्वतोमुख

मित्यस्याग्रेपरामर्शः अनंतेसर्वतःपरिच्छेदरहिते ॥

आनंदटीका स्पष्टार्थम् ॥

रामकंठटीका

ग४ गतार्थमेतच्छ्लोकत्रयं किंत्वेकमेवैश्वरं भगवत्संबंधि विशुद्धसंवित्मात्रं परमार्थतो यद्रूपं तदेव सकलजीवलोकविविधाकृतिभेदेन तन्मायाशक्त्यैवावभासते ततो विश्वमेव भगवद्रूपमित्येतावन्मात्रतात्पर्याणि रूपविशेषणान्यवगंतव्यानि येन रूपसामानाधिकरण्येनानंतं विश्वतोमुखं देवमिति ग्रंथः संबध्येत [illegible] ॥ ॥

लासिकी[illegible]टीका

किंच दिव्यानि माल्यान्यम्बराणि च धारयतीति दिव्यो गंधो यस्य तादृगनुलेपनं यस्य तत् सर्वाश्चर्यमयमनेकाश्चर्यप्रचुरं देवं द्योतनात्मकमनंतमपरिच्छिन्नं विश्वतः सर्वत एव मुखं ज्ञानशक्तिर्यस्य तत् दर्शयामासेति पूर्वेणान्वयः [illegible] ॥

पंचोलीटीका

दिव्यानि माल्यानि पुष्पाण्यम्बराणि वस्त्राणि च बिभर्तीति दिव्यमालाम्बरधरस्तं दिव्या गंधाः अनुलेपनानि च यस्य तं दिव्यगंधानुलेपनं सर्वैराश्चर्यकारिभिः वस्तुभिः बहुलं सर्वाश्चर्यमयं देवं अनंतं देशतः कालतो वस्तुतश्चान्तो यस्य नेत्यनंतस्तमनंतं विश्वतोमुखं सर्वतोमुखं सर्वद्रष्टारं ॥

रसणवीरसमिद्धोधिनी

स्पष्टोर्थः ॥

मधुभाष्य

सर्वाश्चर्यमयं सर्वाश्चर्यात्मकं महत्सप्रकाशो ऽनंतवाची तदपि

भाषा अनुवाद

और दिव्य माल्य कहे पुष्प औ दिव्य अम्बर कहे वस्त्र तथा दिव्य गन्ध लेपन हैं जिस रूपमे और नाना आश्चर्य युक्त तथा अनन्त अपरिछिन्न औ सर्वत्र हैं मुख जिस मे सोरूप देखाया ॥

दोहा

दिव्यमाल अंबरधरे दिव्यगंध अतिसेव सभ अचर्य मय अनं
तहि सर्वत्रमुखदेव ॥

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता य
दि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः
१२

शाङ्करभाष्यं १

या पुनर्भगवतो विश्वरूपस्य भासस्तस्या उपमोच्यते दिवीति दिवि
अन्तरिक्षे तृतीयस्यां वा दिवि सूर्याणां सहस्रं सूर्यसहस्रं तस्य
युगपदुत्थितस्य युगपदुत्थिता भाः सा यदि सदृशी स्यात् तस्य
महात्मनो विश्वरूपस्य भासो यदि वा स्यात् ततोऽपि विश्वरूपस्यैव
भाः अतिरिच्यत इत्यभिप्रायः १२

आनन्दगिरिकृतटीका २

ननु प्रकृतस्य भगवतो रूपस्य दीप्तिरस्ति न वा नचेत् काष्ठा
दिसाम्यं यद्यस्ति कीदृशी सेत्याशंक्याह या पुनरिति सा यदि
स्यात्तद्भासः सदृशी सेति योजना असम्भाविताभ्युपगमार्थो यद्
िशब्दः स्याच्छब्दो निश्चयार्थः सा कथं सदृशी सम्भवति न तस
वस्यैवेति विवक्षित्वाह यदि वेति १२

स्वामिकृतटीकाटी ३

विश्वरूपदीप्तेर्निरुपमत्वमाह दिवीति दिवि आकाशे सूर्यसहस्रस्य
युगपदुत्थितस्य यदि युगपदुत्थिता भाः प्रभा भवेत् तर्हि सा तस्य महा
त्मनो विश्वरूपस्य भासः प्रभायाः कथंचित्सदृशी स्यात् नान्योपमाऽस्ती
त्यर्थः तथाभूते रूपे दर्शयामासेति पूर्वेणैवान्वयः १२

पैशाचभाष्यटीका ४

स्पष्टार्थं १२ ॥ ॥ ॥

रामानुजभाष्यटीका ५

स्पष्टार्थं १२ नामेव देवशब्दनिर्दिष्टं घातनन्तो विशिनष्टि दिवीति तेजसोऽपरिमितत्वप्रदर्शनार्थमिदमत्यन्ततेजस्तस्य रूपमित्यर्थः १२

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं १२ ॥ ॥ ॥

परमार्थप्रपा टीका ७

अथ वैश्वरूपतेजसोऽदृष्टान्ताभावं दर्शयति दिवीति ॥
तस्य महात्मनो विश्वरूपस्य भासो दीप्तेः सदृशी समाना भा दीप्तिस्तर्हि एव स्यात् तर्हि कथं यदि दि
व्याकाशे सूर्यसहस्रस्य युगपदेकवारं उत्थितः उदयः स्यात् इत्यभूतोपमालंकारः १२ ॥

वनमाली टीका ८

देवमित्युक्ते विहृणोति दिव्यंतरिक्षे सूर्याणां सहस्रापरिमितसूर्यसमूहस्य
युगपदुदितस्य युगपदुत्थिता भाः यदि भवेत् तदासा तस्य महात्मनो वि
श्वरूपस्य भासो दीप्तेः सदृशी तस्याः यदि स्यात् यदि वा न स्यात् ततोपि नूनं वि
श्वरूपस्यैव भासो ऽतिरिच्यते इत्यहं मन्ये अन्यान् उपमानाभावमर्थः १२

उत्तमवैजयन्ती टीका ९

देवमित्युक्तेन तस्य दीप्तेने रूपमेव वस्तुविवरणमाह दिवीति दिवि व्याकाशे
सूर्याणां सहस्रस्य युगपदुत्थानं होदिनाणां प्रचण्डस्य उदितस्य युगपदु
त्थिता भा प्रभा यदि भवेत् सा प्रभा तस्य महात्मनो विश्वरूपस्य भ
गवतो भासो दीप्तेः सदृशी तस्यास्ता भवेति संभावनायां लिङ् अभूतो
पमेयमतिशयोक्तिरलंकारेणानन्यतिसर्वथा निरूपमत्वमेव व्यनक्ति
उभौ यदि व्योम्नि पृथक् प्रवाहाविमौ दिवनाद रूपं दर्शयामासेति पूर्वे
णान्वयः १२

मधुसूदनी टीका ९
देवमित्युक्ते विहृणोति दिव्यंतरिक्षे सूर्याणां सहस्रापरिमितसूर्यसमूहस्य युगपदुत्थितस्य यु
गपदुत्थिता भाः प्रभा यदि भवेत् तदासा तस्य महात्मनो विश्वरूपस्य
भासो दीप्तेः सदृशी तस्याः यदि स्यात् यदि वा न स्यात् ततोपि नूनं विश्वरूपस्यै
व भासो ऽतिरिच्यते इत्यहं मन्ये अन्यान् उपमानाभावमर्थः अत्राविद्यमाना
ध्यवसायात् उभाभावेनोपमाभावपरादभूतोपरूपेयमतिशयोक्तिक मा
त प्रतीतो व्यजनीतिसर्वथा निरूपमत्वमेव व्यनक्ति उभौ यदि व्योम्नि पृथ
क् प्रवहतावाकाशगंगापयसा यमेनाभिमा दिवत [illegible]
[illegible] १२

सदानंदी टीका ११

अंतरिक्षे सहस्रस्य समूहस्य विवस्वतां युगपदुत्थितस्य सा प्रभा युग
पदुत्थिता १ तदासा विश्वरूपस्य दीप्तस्य सा भवेन्नवा ततोपि विश्व
रूपस्य प्रभा सैवातिरिच्यते इत्यहं स्वधियामन्ये नामाली हो पमैव हि
१२

नीलकंठी टीका १२

दिवि अंतरिक्षे भाः दीप्तिः भासः दीप्तेः अभूतोपमेयं निरुपमत्वामेव
तस्य दीप्तेर्दर्शयति उभौ यदि व्योम्नि पृथक् प्रवाहाविमौ दिवत १२

आनंदीटीका स्पष्टार्थम् १२

रामकंठीटीका

अनन्यैकस्य परमार्थो हेतुचित्स्वकाशात्मनो वै स्वरूपेणावभासमानस्वरूपं प्रतिपादयितु
माह ॥ यद्यन्तरिक्षे समुदितस्य भास्करसहस्रस्य समकालमेव समुत्थिता
प्रसृता भा दीप्तिः कदाचिद्भवेत् सा तस्यैकस्य परप्रकाशस्वभावस्य
महात्मनः पुरुषस्य सदृशी स्यात्तुल्या भवेदिति काक्वा व्याख्येयं ये
न सदृशी स्यादित्येवं पर्यवस्येत् न त्वनन्यप्रकाश्यसकलवस्तुप्र
काशकनिरतिशयप्रकाशात्मनस्तस्य कोटिशोप्युदिता नो भगव
दिनकराणां दीप्तिस्तत्प्रकाशमात्रस्य लेशमप्यासादयितुमर्हतीति
एवमनुत्तमप्रकाशात्मनि १२

लासिकी वल्लभीटीका

अथुनैश्वररूपस्योपमानभावं द
र्शयति ॥ दिव्याकाशे समुदितस्य सूर्यसहस्रस्य समकालं प्रसृता दीप्तिः यत्
कदाचिद्भवेत्तावत्तस्य महात्मनो महान्व्यापकात्मा यस्य विश्वरूपे
श्वरस्य भासः प्रभायास्तुल्या स्याद्वेतीति संभाव्यते नान्योपमास्तीत्य
र्थः अथवा स्यादिति काकाव्याख्येयं न भवेदित्यर्थः विश्वात्मन उप
माभावपराः भूतोपमारूपेयमतिशयोक्तिरत्येनालंकारो जयंतीसर्व
थानिरुपमत्वमेवमनक्ति [illegible] १२

पंचोलीटीका

याधुनः भगवतो विश्वरूपस्य भास्त्वस्योपमां कुर्वन्नतस्यातिरूप
त्वनिरतिशयत्वं चाह दिवीति दिव्यंतरिक्षे द्युलोके वा युगपदु
त्थितस्य सूर्यसहस्रस्य युगपदुत्थिता भाः कांतिः सा तस्य महात्म
नो विश्वरूपस्य भासः भासा कांत्या यदि सदृशी स्यात् भगवतो
भासस्ततो प्यधिका इत्यर्थः १२

रत्नावीरसमिद्धोपिनी

इदानीं महत्त्वलक्षणं प्रतिपादयति दिवीति यदि प्राह्णोत्रकालवा
चको यदि येस्मिन्कालांतरे सूर्यसहस्रस्य भा युगपदेककाल मुत्थि
ता प्रसरंती भवति तदैव सा भास्तस्यानल्पकृहगम्यस्य महात्मनो ब्र
ह्मणो भासः स्वप्रकाशस्य सदृशी समाना स्यात्काकान स्यादिति
भावः १२

पाकशासनविक्रमइत्यादिवत्सार्थनामैव तथास्य
श्वेदाश्विलेषु अनंतशक्तिः परमोनंतवीर्यः सोनंततेजाश्चेत
तस्ततोपीति महत्तात्पर्याद्ध प्राबल्यम् नचपरिमाणेनोका
किंचित्प्रयोजनं अनेकपाद्गोऽनंतबाहो अनंतबाहुमि
तिचवक्ष्यति विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबा
हुरुत विश्वतस्पात् संबाहुभ्यांधमति संपतत्रैर्द्यावाभूमीज
नयन्देवएक इति ऋग्वेदे विश्वतश्चक्षुरुत विश्वतोमुखो
विश्वतोबाहुरुत विश्वतस्पात् संबाहुभ्यांनमति संपतत्रै
र्द्यावापृथिवीजनयन्देवएकः यजुर्वेदे विश्वबाहुश्चानंत
बाही सर्वसत्वं विश्वंचसनंतरूपमेव चेत्यभिधानात्
अनंतबाहुमनंतरूपं पुरुषवक्त्रमेकमितिच बाभ्रव्यशा
खायां महत्वाच्छक्तिस्तु तदात्मकत्वेनापि भवति अन्यथा
नादिमत्त्वंब्रह्मणोन्यायप्रयुक्तं स्यात् एकत्वेनंतान्यस्य रूपा
णीत्यनंतरूपः अन्यत्रत्वपरिमाणइति उक्तत्सुभय[illegible]
मपि

भाषा अनुवाद

और उस रूपकी निरूपम प्रभा प्रकाश करते हैं कि आकाश मे जो एक काल सहस्र सूर्य के उदय की प्रभा हो उठे तो कदा चित उन महात्मा कान्ति के कोई अंश की उपमा होय तो होय न हीं तो उस रूप की उपमा नहीं है १२

दोहा

नभ सहस रवि उदित हि एकबार जो होय आभास मतेहिं रूपके
तेज बराबर सोय १२

39

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा १३

शाङ्करभाष्यटीका· १

किञ्च तत्रैकस्थमिति तत्रास्मिन् विश्वरूपे एकस्मिन् स्थितमे
कस्थं जगत् कृत्स्नं प्रविभक्तमनेकधा देवपितृमनुष्यादिभे
दैरपश्यत् दृष्टवान् देवदेवस्य हरेः शरीरे पाण्डवोऽर्ज्जुनस्तदा १३

आनन्दगिरिकृतटीका· २

न केवलं प्रकाशमेवार्ज्जुनो दृष्टवान् किन्तु तत्रैव विश्वरूपे स
र्वं जगदेकस्मिन्नवस्थितमनुभूतवानित्याह किञ्चेति तदावि
श्वरूपस्य भगवद्रूपस्य दर्शने दशायामित्यर्थः १३

स्वामिकृतटीका· ३

ततः किं वृत्तमित्यपेक्षायामाह संजयः तत्रेति अनेकधा प्रविभक्तं
नानाविभागेनावस्थितं जगत् देवदेवस्य शरीरे तदवयवत्वेनैक
त्रैव पृथक् पृथगवस्थितं तदा पाण्डवोऽर्जुनोऽपश्यत् १३

पैशाचभाष्यटीका· ४

स्पष्टार्थं १३ ॥ ॥

रामानुजभाष्यटीका· ५

तत्रेति तत्रानन्तायामितविस्तारे अनन्तबाहूदरवक्त्रनेत्रे अपरिमित
दिव्यायुधोपेते स्वोचितापरिमितदिव्यभूषणभूषिते दिव्यमाल्याम्ब
रधरे दिव्यगन्धानुलेपने अनन्ताश्चर्यमये देवदेवस्य दिव्यशरीरे अ
नेकधा प्रविभक्तं ब्रह्मादिविविधविचित्रदेवतिर्यङ्मनुष्यस्थाव
रादिभोक्तृवर्गपृथिव्यन्तरिक्षस्वर्गपातालवितलसुतलादिभोगस्था
नभोगोपकरणभेदभिन्नप्रकृतिपुरुषात्मकं कृत्स्नं जगत् अहं सर्व
स्य प्रभवो मत्तः सर्वं प्रवर्तते इति तत्कथयिष्यामि दिव्या ह्यात्मविभू
तयः अहमात्मा गुडाकेश सर्वभूताशयस्थितः आदित्यानामहं वि
ष्णुः इत्यादिना न तदस्ति विना यत्स्यान्मया भूतं चराचरं विष्टभ्याहमिदं
कृत्स्नमेकांशेन स्थितो जगत् इत्यन्तेनोदितं एकस्थमेकदेशस्थं पा
ण्डवो भगवत्प्रसादलब्धतद्दर्शनानुगुणदिव्यचक्षुरपश्यत् १३

श्री·
गी· टी·
५

अभिनवगुप्तकृतटीका· ९ ॥

स्पष्टार्थं १३ ॥

परमार्थप्रपा टीका· २

तत्रेति तत्र देवदेवस्य शरीरे अनेकधा प्रविभक्तं भिन्नभिन्ननाममहरूपाकर्मात्मकं कृत्स्नं समग्रं जगदेकस्थमेकाश्रयं तदा तस्मिन्नवसरे पाण्डवोऽर्जुनः अपश्यत् १३ ॥

वनमाली टीका ८

एकस्थमेकत्र स्थितं जगत् कृत्स्नं प्रविभक्तं सावकाशमनेकधा देवमनुष्यादिप्रकारैः अपश्यद्देवदेवस्य भगवतस्तत्र विश्वरूपे शरीरे पाण्डवस्तदा विश्वरूपाश्चर्यदर्शनदशायां १३

प्रमेयवैजयन्तीटीका· ५

ततः किमभूदित्यपेक्षायामाह तत्रैकस्थमिति देवदेवस्य देवान्ब्रह्मरुद्रेन्द्रादीन् देवयते क्रीडयते स्वविग्रहे निरतिशयसौन्दर्यवात्सल्यादिगुणैरिति देवदेवः यद्वा देवेषु दीव्यति तत्तद्रूपेण स्वामिरूपेण तत्र दैवतार्थैर्वा क्रीडतीति तथा सः यद्वा देवानिन्द्रादिपालान् देवयते तद्विषयेषु क्रीडयतेति तथा सः यद्वा देवान् केशवेशादीन् दीव्यति तन्मावात्सल्यशान्तिकान्त्यादिगुणैर्विजिगीषतेऽनैरिति देवदेवः यद्वा देवेषु
५धि दीव्यति तत्तद्धिसेवार्थकरणे तत्तदाकारेण च व्यवहरतीति तथा सः यद्वा देवेभ्यो दीव्यति स्वस्वरूपगुणशक्त्यादिभिर्द्योतत इति देवदेवः यद्वा देवान्स्वस्वरूपगुणादिभिर्देवयते द्योतयतीति तथा सः तेषां प्रकाशक इत्यर्थः यद्वा देवैर्दीव्यते स्वस्वकामावाप्त्यर्थं स्तूयते इति तथा सः यद्वा देवान् दीव्यति तत्तद्दशारणायतान् गच्छतीति सः यद्वा देवैः सह दीव्यति आनन्दमूर्त्यामोदते इति देवदेवः तादृशस्य देवदेवस्य तत्रानेकवक्त्रनयने अनेकाद्भुतदर्शने अनेकदिव्याभरणे दिव्यानेकोद्युतायुधे दिव्यमाल्याम्बरधरे दिव्यगन्धानुलेपने अपरिमिताश्चर्यमये अनुपमापरिमिततेजस्के दिव्यानन्तातिविस्तरे शरीरे सहस्रशिरस्कविश्वविग्रहे एकस्य एकदेशे स्थितमनेकधा विविधविविधानन्ताकारैः केशवरुद्रेशादिसुरासुरनरपितृपशुपतित्रगपिपीलिकान्तैः अपरिमितानन्ताकारैर्ब्रह्माण्डगुल्मलतौषधि

स्थानैः अगणितानंतनगनदीसिंधुपत्तनग्रामिणीभिः असंख्येया
तलवितलसुतलमहातलरसातलतलातलपाताल
भूर्भुवःस्वर्महर्जनस्तपःसत्यात्मकचतुर्दशलोकगर्भकपंचभूता
हंकारमहत्प्रकृतिकालाद्यात्मकचेतनाचेतनरूपानंतापरिमिता
संख्येयब्रह्मांडैरप्रविभक्तं पृथक्पृथक्स्थितम् कृत्स्नं सर्वं जग
त् तदा यदा दिव्यदृष्टिं लब्धवांस्तस्मिन्नेव काले पांडवो गोविंदानु
ग्रहलब्धदिव्यदृष्टिः पार्थोऽपश्यत ददर्श १३

इहैकस्थं जगत्कृत्स्नं पश्याद्य सच राचरमिति भगवदाज्ञासमप्यनुभूतवानर्जुन इत्याह ॥

मधुसूदनी टीका १

एकस्यमेकत्रस्थितं जगत्कृत्स्नं प्रविभक्तमनेकधा देवपितृम
नुष्यादिनानाप्रकारैः अपश्यद्देवदेवस्य भगवतो विश्वरूपस्य त
स्य शरीरे पांडवोऽर्जुनः तदा विश्वरूपाश्चर्यदर्शनदशायां [illegible]
[illegible]
[illegible]
[illegible] १३

सदानंदी टीका ११

तत्रैकत्रस्थितं सर्वं प्रविभक्तं जगत्पृथक् देवपितृमनुष्यादिप्र
कारैर्भिन्नमद्भुतं । दृष्टवानर्जुनो देहे देवदेवस्य शार्ङ्गिणः तदा
श्चर्यमयानेकदर्शनावसरे किल १३

नीलकंठी काटी १२

इहैकस्थं जगत्कृत्स्नं पश्येति यद्वाक्यं भगवतोक्तं तद्दर्शय
दित्याह तत्रेति अनेकधाप्रविभक्तमपि समस्तं तत्तद्वर्षादिस्थितं ति
तिएीबीजे सूक्ष्मरूपेण तद्दृष्टं पश्यते तद्व्याभूदिति दर्शयितुं साव
काशं अनेकधाविभागयुक्तं विविक्तं अपश्यत् एकस्य एकावय
वस्थं अयमर्थः यदा भगवतस्त्वन्मुखे रूपं विस्मितेन तत्र च चेतसि
लब्धपदे सतिक्रमशस्तदीयावयवांस्पष्टं कामं विस्मितेवापदन
विवाचितं ध्रियते तत्रापि लब्धपदे तस्मिंस्तदपि समस्तं विश्वरूप
मारोहति दिवं च तत्र पिपवेत्स्वतत्तामापादितं मन एव मनोऽस्य
दैवं चक्षुः स एतेन दैवेन चक्षुषा मनसैतान् कामान्पश्यन्रम
त इति श्रुतेः कामान् विषयान् एतान् हार्दाकाशाख्ये ब्रह्मपुराणत्र

श्री॰ गी॰ टी॰

स्थगतानीति श्रुतिपदयोरर्थः यथोक्तं श्रीभागवते तत्र लब्धपदं
चित्तमाकृष्य एकत्र धारयेत् नान्यानि चिंतयेद्भूयः सुस्मितं भावयेन्
मुखं तत्र लब्धपदं चित्तमाकृष्य व्योम्नि धारयेत् तच्च त्यक्त्वा मदा
रोहो न किंचिदपि चिंतयेदिति तत्र मूर्तौ एकत्रस्थोरो व्योम्निका
रणे मदारोहो निर्विकल्पे ब्रह्मण्यारूढः तदिदमुक्तं देवदेवस्य
शरीरे कृत्स्नं जगदेकस्थं पांडवोऽपश्यदिति १३

आनंदीटीका

अनेकधा चराचरादिवत्तद्देशभूतसर्गाणां नानाप्रकारैः प्रविभक्तं
विभागप्रकर्षेण युक्तं तत्संकीर्णमित्यर्थः १३ ॥ [illegible]
[illegible] १३

रामकंठीटीका

तदा तादृगानंदघनभगवद्रूपवैश्वरूप्यदर्शनकारणभक्तदिव्यज्ञाना
नात्मकचक्षुर्दानलक्षणानुग्रहरूपकाले तत्र तादृशविश्वरूप
काशात्मनि देवदेवस्य सर्वेश्वरस्य शरीररूपे एकस्थमेकत्रैवाश्रये
स्थितमथ चानेकधा प्रविभक्तं विश्वभावरूपैर्भेदैर्विप्रकीर्णं कृत्
स्नमखिलं जगदर्जुनोऽपश्यत् साक्षात्कृतवानिति संजयो दिव्येन चक्षु
षा पारमेश्वरमनुग्रहमर्जुनस्य दृष्ट्वा तदुक्तवान् [illegible]
[illegible] १३

अथार्जुनस्येश्वररूपसाक्षा लासिकी [illegible]टीका

त्कारमाह ॥— देवदेवस्य विश्वरूपेश्वरस्य शरीरे स्वरूपेऽनेकधा प्रविभक्तं नानाविभा
गेन स्थितं कृत्स्नमखिलं जगदेकस्थमेकेनाभेदेन स्थितं सोऽर्जुनस्तु
देश्वररूपसमाधानकाले पश्यन् तेन साक्षात्कृतवान् प्रविभक्तपदेने
श्वररूपे सदाशिवतत्त्वाद्यावर्तितम् एकपदेन सुदृढविज्ञाततत्त्वरूपवम
त र्जुनस्य तर्कलगोचरं विश्वरूपेश्वरसाक्षात्कारमभिधाय अधुनाऽस्य स्थि
तिनस्यहृत्तमाह १३ ॥

पंचोलीटीका

ततः किं वृत्तमित्यपेक्षायामाह संजय उवाच तत्रेति पांडवः तदा त
स्मिन् देवदेवस्य शरीरे विश्वरूपे एकस्थं एकत्रस्थितं अनेकधा देव
पितृमनुष्यादिभेदैः प्रविभक्तं भिन्नं कृत्स्नं जगत् अपश्यत् १३

अथार्जुनो भगवद्रूपमपश्यदित्याह तत्रैकस्थमिति तदा तस्मिन्भ
गवदनुग्रहावसरे कृत्स्नं जगत्स्थावरजंगमात्मकं विश्वमनेकधाने
काश्रयादिभेदैः स्वभावादेव प्रविभक्तं विभिन्नावभासमानमपि
तत्सर्वं देवदेवस्य शरीरे भौतिके रूपावतारे तत्रैवैकस्थं युगपदेक॰
स्मिन्नेवावकाशे स्थितमपश्यत्साक्षाद्दृष्टवानर्जुन इत्यर्थः ॥१३॥

मधुभाष्य

भाष्य अनुवाद

तिस के वादि क्या भया सो कहते हैं कि उस समय अर्जुन को नाना प्रकार शरीर के अनेक भागोमे स्थित समस्त जगत श्री कृष्ण एक अपनी शरीर मे एक वारगी देखाया ११

दोहा

तहां एकस्थ जगत सभ भिन्न अनेक प्रकार देव देव की देह महिं
लखें पांडव तेहि वार १२

ततःसविस्मयाविष्टोहृष्टरोमाधनञ्जयः
प्रणम्यशिरसादेवंकृताञ्जलिरभाषत १४

शाङ्करभाष्यटीका १

ततइति ततस्तं दृष्ट्वा सविस्मयेनाविष्टोविस्मयाविष्टोहृष्टानि रोमाण्यस्य सोयं हृष्टरोमा चाभवद्धनञ्जयः प्रणम्य प्रकर्षेण नमनं कृत्वा प्रह्वीभूतः सन् शिरसा देवं विश्वरूपधरं कृताञ्जलिर्नमस्कारार्थं संपुटीकृतहस्तः सन्नभाषतोक्तवान् ॥ ॥ १४॥

आनन्दगिरिकृतटीका २

विश्वरूपधरस्य भगवतस्तस्मिन्नेकीभूतजगतस्त्रैलोक्यविशेषणस्य दर्शनानन्तरं किमकरोदित्यपेक्षायामाह ततइति आश्चर्यबुद्धिर्विस्मयः रोम्णां हृष्टत्वं पुलकितत्वं प्रकर्षोभक्तिश्रद्धयोरतिशयः १४

स्वामिकृतटीका ३

एवंदृष्ट्वाकिंकृतवानित्यतआह ततइति ततोदर्शनानन्तरंविस्मयेनाविष्टोव्याप्तःसन् हृष्टान्पुलकितानिरोमाणियस्यसधनंजयोदेवंतमेवशिरसाप्रणम्यकृतांजलिःसंपुटीकृतहस्तोभूत्वा अभाषतउक्तवान् १४

पैशाचभाष्यटीका ४

स्पष्टार्थः १४ ॥ ॥

रामानुजभाष्यटीका ५

ततइति ततोथधनंजयोमहाश्चर्यस्यकृत्स्नस्य जगतस्तस्यदेहैकदेशेदर्शनात् विस्मयाविष्टःकृत्स्नजगदाश्रयभूतंकृत्स्नस्यप्रवर्तयितारमाश्चर्यतमज्ञानादिकल्याणगुणंदेवंदृष्ट्वाहृष्टरोमाशिरसादेवंप्रणम्यकृतांजलिरभाषत १४

अभिनवगुप्तकृतटीका ६

स्पष्टार्थः १४ ॥ ॥

श्री
गी टी ५

परमार्थप्रपा टीका १

ततोदर्शनानन्तरं धनञ्जयोऽर्जुनः अद्भुतदर्शनोत्पन्नेन विस्मयेनत्रा
विष्टोव्याप्तः एवमद्भुतरसस्याविर्भावेन हृष्टरोमः रोमाञ्चितःसन् ।
देवं कृष्णं शिरसाप्रणम्य कृताञ्जलिः सन्नभाषत १४ ॥

वनमाली टीका २

एवमद्भुतदर्शनेऽप्यर्जुनोन विभयाञ्चकार नापिनेत्रेसंववार नापि
संभ्रमात्कर्तव्यं विसस्मार नापितस्माद्देशादपससार किन्तु निधीर
त्वात्तत्कालोचितमेवार्जुनहारमरतिविचित्रलोभपीस्माद्दृतनतरश्निति
तत्दर्शनानन्तरं विस्मयेनाद्भुतदर्शनप्रभवेनालौकिकचित्तचम
त्कारविशेषेणाविष्टोव्याप्तः अतएवहृष्टरोमापुलकितःसन्तस्
मप्यातमहादेवसग्रामादिप्रभावोपनेनयोदेवतमेवाद्भुतानं
तैश्वर्यविशिष्टनारायणं शिरसाभूलग्नेनप्रणम्यभक्तिश्रद्धाति
शयेनननाकृताञ्जलिरभाषत १४

ज्ञानमैत्रेयपत्नीटीका ३

एवं श्रद्धे सर्वस्वप्रभवो मत्तः सर्वं प्रवर्तते इत्यनेकधाविष्यामिदि
व्यात्मविभूतयः अहमात्मा गुडाकेश सर्वभूताशयस्थितः
आदित्यानामहं विष्णुरित्यादिनानन्तदक्षिविनायत्सात्मयाभूत
चराचरं विष्टभ्याहमिदंकृत्स्नमेकांशेन स्थितो जगदिमत्त्रेतादि
तेविश्वाकारके भगवद्रूपे कृत्स्नतत्त्वेऽसौ जेनोऽयमेव दिदृक्षमिदं
नीतहृष्यार्जुनः किं कृतवानिमयेलायातत्री स्वाद्भुतेरसमग्नभूः
दिस्माह ततइति ॥ ततो विश्वरूपदर्शनानन्तरं ज्ञानितेनरूपेतेकृतम
गवंतेविलोकयतः योविस्मापितः समवकतेजोऽत्रपियनेनयः सुधिरोजन
मूर्येगंधर्वनिवातकवचादियुद्धेवानररगादेवाः रातिसिरोभूषण
दिरूपंधनंजयनीतितष्यामः तादृशो वीरशिरोमणिरतिधीरोपिवि
स्मयाविष्टः विस्मयेनालौकिकाद्भुतदर्शनजन्येनालौकिकचित्तच
मत्कारविशेषेणाविष्टोव्याप्तस्सन् अतएवहृष्टरोमाहृष्टानिउत्पुल
कितानिरोमाणियस्यसतथा तादृशः सन् प्रथमं देवं अखण्डलते
जःपुञ्जत्वाज्ज्वलमानं ज्वलनोपमदीप्तिमन्तं सर्वकारणं सर्वनिय
न्तारं सर्वपितरं सर्वगुरुं तमेवविश्वरूपधरं श्रीकृष्णं शिरसाप्रलति
तेनदंडवत्साष्टाङ्गप्रणिपातेनप्रणम्यप्रकर्षेणकायवाङ्मनोभिर्नीना

गी
टि

मेकभावेननमनेकृत्वापश्चात्कृतोञ्जलिःसम्पुटीकृतकरयुग
लम्प्रभाषतोक्तवान् अत्रार्जुनस्यभयेनेवसम्बरणादिकंनाभू
त्किंत्वद्भुतरसोऽभुदेवेतिव्यज्यतेतथाहि इद्भुताद्दर्शनाद्धरिरालम्ब
नःसुहृत्सुस्नलहीततासुद्दीपनम् प्रणातिपातियोगरोमांचा
द्यनुभावःसात्विकःतेरातिग्रामतिधृतिहर्षादयःसंचारिणःएते
रालंबनादिभिःपुष्टोविस्मयस्थायिभावोद्भुतरसइतिभावः तथा
हिंवंशलोके आलंबनोद्दीपनात्मविभावःकारणंहियाकार्यानु
भावोभावस्सहायोव्यभिचार्यपिअद्भुतोविस्मयस्थायीमाया
दिकविभावभूःरोमांचाद्यनुभावोयस्मात्स्यादिव्यभिचारिकइति १४

मधुसूदनीटीका १९

+ एवमद्भुतदर्शनेप्यर्जुनोनविभक्ता वकारनापिनेत्रेसंबबारनापिसंभ्रमात्कर्तव्यंविसस्मा
रनापितस्माद्देशादपससार
किंत्वतिधीरत्वात्तत्कालोचित
मेवव्यवजहारमहतिचित्ततो
भेपीत्याह ॥+

+ ततस्तद्दर्शनानन्तरंविस्मयेनाद्भुत दर्शनप्रभवेनालौकिकचित्त
चमत्कारविशेषेणाविष्टः अतएवहृष्टरोमापुलकितःस
न्सव्यसाचीमहादेवसंग्रामादिप्रभावः धनंजयःयुधिष्ठिररा
जसूयेउत्तरगोग्रहेसर्वान्वीरान्जित्वाधनमाहृतवानितिप्रसि
तमहापराक्रमोतिवीरःसात्त्वाद्यग्निरिवमहातेजस्वित्वात् देवत
मेवविश्वरूपधरंनारायणं शिरसाभूमिलग्नेनप्रणम्यप्रकर्षेण
भक्तिश्रद्धातिशयेननत्वानमस्कृत्यकृतांजलिः संपुटीकृतहस्त ह्या
युगः सन्नभाषतोक्तवान् अत्रविस्मयाख्यस्थायिभावस्यार्जुनग
तस्यालंबनविभावेनभगवताविश्वरूपेणउद्दीपनविभावेनास
कृद्दर्शनेनानुभावेनसात्विकरोमहर्षेणनमस्कारेणांजलिक
रणेनचव्यभिचारिणाचानुभावान्तिमेनधृतिमत्ति हर्षवितर्का
दिनापरिपोषात्स्ववासनावतांश्रोतॄणांतादृशः चित्तचमत्कारोपि
नद्वेदानव्यवसायात्परिपोषंगतः परमानंदास्वादरूपेणाद्भुत
रसोभवतीतिसूचितं [illegible]
[illegible] ॥१४

सदानंदीटीका ११

एवंदिव्याद्भुतरूपंदृष्ट्वाभगवतोर्ज्जुनः नबिभियांचकारसोपिच
चारमवत्सली १ विसस्मारनकर्तव्यस्थानानाप्रसंसारह कि
मधीरतयाचकैश्वव्यवहारैर्यथोचितं चिन्तितोभेपिमहतिप्रहेरि
वेससंजयः तद्रूपदर्शनाज्जातविस्मयेनाहतत्ततः ३ हृष्टरो
माचनोभूत्वाविश्वरूपधरंहरिं भूमिलग्नेनशिरसाभक्तिश्रद्धा
समन्वितः ४ प्रकर्षेणनमस्कृत्यस्वाभिमानेविहायच संपुटी
कृतहस्तःसन्नुवाचानतकंधरः ४ १४

नीलकंठी टीका १२

हृष्टरोमारोमांचितगात्रः १४

अथचभगवतोवैश्वरूप्यंदृष्ट्वार्जुनकृतमाह॥ आनंदीटीका

ततोविश्वरूपदर्शनानंतरंविस्मयेनालौकिकेनचित्तचमत्कारेणा
विष्टोतएवहृष्टरोमार्जुनोदेवपरस्थितंश्रीकृष्णंवैश्वरूप्यदर्शनार्थं
ज्ञानभक्तिप्रायः मूर्ध्नाप्रणम्यकृतांजलिरिदंवचनमाह १४

रामकंठीटीका

अथदृष्टपरमेश्वरवैश्वरूप्योर्जुनःकिंचकारे
त्याह॥ ततस्तादृग्गत्यद्भुतभगवद्रूपसाक्षात्करणादनंतरंधनंजयोनुषभा
वाविर्भावेप्यननुभूतपरतत्त्वस्फुरणजनितेनविस्मयेनाविष्टः आ
क्रांतचित्तवृत्तिरतएवहृष्टरोमासंजातपुलकोपनंजयोदेवकी
पुत्रंपुरोवर्तिनंसाक्षात्कृतनिरतिशयप्रभावमात्मसंजातंतंविष
यवदृश्यमानांतिप्रायोमूर्ध्नाप्रणम्यकृतांजलिःसन्निदंवचनमात्म
भाषतोवाच

लालिकी [illegible]टीका १५

ततोविश्वरूपेश्वरदर्शनानंतरंसर्वेश्वरानुग्रहाद्दीप्ततोर्जुनोवि
स्मयेनयोगभूमिकालब्धगौरवेनचुर्थ्योनेपिपरनतचमत्कारेणा
विष्टश्चाचिन्त्यचिंतहवितयाप्यामसात्मसात्कृतः हृष्टरोमापरमात्मने

दानुभवेनोत्पुलकितरोमा कृतांजलिः संपुटीकृतहस्तः देवं शरीरवर्तिनं देव
कीपुत्रं श्रीकृष्णं समालात्कृतप्रभाववात्स्वेजातहिषयवर्द्धमानो मूर्ध्ना प्र-
णम्याभाषतोवाच [illegible] १४

पंचोलीटीका

एवं दृष्ट्वार्जुनः किं कृतवानित्याह ततइति सधनंजयोऽर्जुनः तत-
स्तद्दर्शनानंतरं विस्मयाविष्टः उत्पन्नविस्मयः हृष्टरोमा कृतांजलिः
सन्देवं शिरसा प्रणम्याभाषत वक्ष्यमाणमब्रवीत् १४

रणवीरसमिद्धार्थिनी

अथ साक्षाद्दृष्टाद्भुतपारमेश्वररूपोऽर्जुनः किं कृतवानिति तदाह
ततइति ततो भगवद्रूपस्य साक्षात्करणानंतरं धनंजयः धनं
जयोऽर्जुनः स विस्मयाविष्टो हृष्टश्चाद्भुतो नयवानंदस्पर्शेन वा हृष्ट
रोमा पुलकांकितत नुरेवंभूतः ततः किं कृतवानित्याह प्रणम्ये
ति देवं भगवंतं सर्वं प्रणम्य तदनु कृतांजलिः सन् उत्तरं वाक्यमभा
षतेति १४॥

मधुभाष्य

भाषा अनुवाद

तबतो अर्जुनवह आश्चर्य रूप भगवान का रूप देखि अतिशय कौतकयुक्त होय आनन्द से पुलकित भये और मस्तक झुकाय प्रणाम करि हाथ जोरि यह वचन बोलते भये ४

दोहा

ताते विस्मययुक्त सो अर्जुन पुलकित देह अंजलिजोड निवा
य शिर कृष्ण दि भाषत यह १४

अर्जुन उवाच पश्यामि देवांस्तव देव देहे स
र्वांस्तथा भूतविशेषसंघान् ब्रह्माणमी
शं कमलासनस्थमृषींश्च सर्वानुरगांश्च दि
व्यान् १५

शाङ्करभाष्यटीका १

कथं यत्त्वया दर्शितं विश्वरूपं तदहं पश्यामीति स्वानुभवमा
विष्कुर्वन् अर्जुन उवाच पश्यामीति पश्याम्युपलभे हे देव दे तव१
हे देवान् सर्वांस्तथा भूतविशेषसंघान् भूतविशेषाणां स्थाव
रजङ्गमानां नानासंस्थानविशेषाणां संघाः भूतविशेषसंघास्ता
न् किञ्च ब्रह्माणं चतुर्मुखमीशमीशितारं प्रजानां कमलासनस्थं
पृथिवीपद्ममध्ये मेरुकर्णिकासनस्थमित्यर्थः ऋषींश्च वशिष्ठा
दीन् सर्वानुरगांश्च वासुकिप्रभृतीन् दिव्यान् दिवि भवान् १५

आनन्दगिरिकृतटीका २

कथं भगवन्तं प्रत्यर्जुनो भाषितवानिति पृच्छति कथमिति त
त् प्रश्नमपेक्षितं पूरयन्नवतारयति यत्त्वयेति भूतविशेषसं
घातेषु देवतानामन्तर्भावेपि पृथक् करणमुत्कृष्टत्वाद्ब्रह्मणः
सर्वदेवतात्मत्वेपि तेभ्यो भेदकथनं तदुत्पादकत्वादिति मत्वाह
किञ्चेति ऋषीणामुरगाणाञ्च किञ्चिद्वैषम्यात् पृथक्त्वं दि
व्यानीत्युभयेषां विशेषणं १५

स्वामिकृतटीका ३

भाषणमेवाह पश्यामीति सप्तदशभिः अर्जुन उवाच हे देव तव दे
हे देवानादित्यादीन् पश्यामि तथा सर्वान् भूतविशेषाणां जरायुजा
ण्डजादीनां संघांश्च तथा दिव्यान् ऋषीन् वसिष्ठादीन् उरगांश्च तक्ष
कादीन् तथा तेषां देवादीनामीशं स्वामिनं ब्रह्माणं च कथंभूतं क
मलासनस्थं पृथ्वीकर्णिकायां मेरौ स्थितं यद्वा तन्नाभिपद्मासन
स्थम् १५

उवाच पैशाचभाष्यटीका ४

स्पष्टार्थं अर्जुन १५

रामानुजभाष्यम् ५

अर्जुनउवाच पश्यामीति हे देव [illegible] तव देहे सर्वान् देवान्पश्या मि तथा सर्वान्प्राणिविशेषाणां संघान् तथा ब्रह्माणं चतुर्मुखं अंडा धिपतिमीशं कमलासनस्थं कमलासने ब्रह्मणि स्थितमीशं तन्म ते अवस्थितं तथा देवर्षिप्रभृतीन् सर्वान्दृषीन्‌ उरगांश्च वासुकितक्ष कादीन्सर्पान् १५

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं १५ ॥ ॥

परमार्थप्रपा टीका ७

[illegible] किमभाषत हे मा

दृ पश्यामीतिसमद शभिः भोदेवदीप्यमानतव देहे स्वर्गस्थान् दे वान्पश्यामि तथा भूमिस्थान्सर्वान् भूतविशेषाणां जरायुजांडजा दीनां संघानसमूहान्‌ तथा दिव्यान् दिव्यं तरिले वर्तमानान् ऋषी न् पुलस्त्यक्रतुवादीन् तथा पाताले स्थितानुरगांश्च पश्यामि किंच स त्यलोकनिवासिनं ब्रह्माणं तथा कैलासवासिनमीशामीश्वरं पश्या मि किंच कमलयालक्ष्म्या सहआसने गरुडासने स्थितो विष्णुमपि वैकुंठवासिनं पश्यामीति दिव्यदृष्टिदानस्य फलमुक्तं शामिणी १५

वनमाली टीका ८

यद्भगवता दर्शितमनेनैश्वर्यं तद्भगवद्दत्तेनैव दिव्येन चक्षुषा सर्वज्ञ नाद्दृश्यमपि पश्याम्यहो मम भाग्यप्रकर्ष इति स्वानुभवमाविःकु र्वन्नर्जुन आह पश्यामीति पश्यामि चक्षुषा विषयीकरोमि हे देव तव देहे देवानिंद्रादीन्सर्वान् तथा भूतविशेषसंघान्‌ स्थावरजंगमानां जरायुजस्वेदजोद्भिज्जांडजानां संघान्समूहान्‌ तथा ब्रह्माणं चतुर्मुखमीशं रुद्रं कीदृशं कमलासनस्थं कमलमासनं यस्य सः कमलासनस्तत्र स्थितं दर्शनमात्रेण धर्मा ऋषीश्च सर्वान्वसिष्ठादीन् ब्रह्मपुत्रान् उरगांश्च दिव्यान्वासुकिप्रभृतीन् पश्यामीति सर्वत्रान्वयः

॥१५॥

जयरामवैजयन्तीटीका · ९

किमभाषतेत्यपेक्षायांतस्यभाषणमेवाहसप्तदशभिःपश्यामिदे·
वानितिहेदेवद्योतमानतवदेहेविश्वात्मकेविग्रहेसर्वान्देवानिं
द्रवरुणादीन्तथासर्वान्भूतविशेषसंघान्भूतविशेषाणांज
रायुजादीनांसंघान्समूहान्पश्यामितथाब्रह्माणंचतुर्मुखंतथा
ईशंसर्वनियंतारंगर्भोदशायिनंकीदृशंकमलासनस्थंकमला
सनेचतुर्मुखेतदंतर्यामिरूपेणास्थितंयद्वाब्रह्माणमेवविशेष
णे·लः ईशंसर्वेश्वरंविसृजन्तेयमेधांसर्वेषामीशामीशितारमि
त्यर्थः कमलासनस्थमलयावृधिशेषशायिनोविष्णोर्नाभिकम
लासनेस्थितंभूकमलमध्यमेरुकर्णिकासनेस्थितंवातथासर्वा
न्दिव्यानदितिभवान्ऋषीन्देवर्षीन्तथासर्वान्उरगान्वासु
किकर्कोटकतक्षकादीन्सर्पान्पश्यामीत्यस्यभगवतादर्शितं
विश्वाकारंयत्स्वरूपंतत्सर्वलोकादृष्टपूर्वमपिभगवदनुग्रहेणोवदि
व्यचक्षुषाः हेपश्याम्यहोममभाग्यप्रकर्षइतिस्वानुभावमाविष्कुर्व
न्पश्यामिचाक्षुषज्ञानविषयीकरोमीत्यभिप्रायः ९५

यद्भगवतादर्शितंविश्वरूपंतद्भग मधुसूदनीटीका · ९ वद्दत्तेनदिव्येनचक्षुषासर्वलोकादृष्टपूर्वमपिपश्या
म्यहोममभाग्यप्रकर्षइति
स्वानुभवमाविष्कुर्वन्॥

पश्यामिचाक्षुषज्ञानविषयीकरोमिहेदेवतवदेहेविश्वरूपेदेवा
न्वस्वादीन्तथाभूतविशेषाणांस्थावराणांजंगमानांचनाना
संस्थानानांसंघान्समूहान्तथाब्रह्माणंचतुर्मुखंईशमीशि
तारंसर्वेषांकमलासनस्थंपृथिवीपद्ममध्येमेरुकर्णिकासनस्थं
भगवन्नाभिकमलासनस्थमितिवातथाऋषींश्चसर्वान्वसिष्ठा
दीन्ब्रह्मपुत्रान्उरगांश्चदिव्यान्नाभाकृतान्वासुकिप्रभृतीन्
पश्यामीतिसर्वत्रान्वयः [illegible]
[illegible] १५

सदानंदीटीका · ११

दर्शितंविश्वरूपंयच्छ्रीमद्भगवताद्भुतं तद्दृष्ट्वैवदिव्येनसर्वादृ
ष्टपूर्वमपीहतत् १ अहोपश्यामिनेत्राभ्यांममभाग्यप्रकर्षतः इति
स्वानुभवंप्राहकुर्वेन्नावाचपांडवः २ पश्यामितवदेहेस्मिं
न्विश्वरूपेसुरानहं समस्तानेववस्वादीन्दृष्ट्वैवचक्षुषा ३
तथाभूतविशेषाणांस्थाणुजंगमरूपिणां नानासंस्थानयुक्ता
नांसमूहानहंवगोवरान् ४ चतुर्मुखंसमस्तानामीशितारंतथा·

२ श्री॰ गी॰ टी॰ ५

स्थितं भूपद्ममध्ये मेरौ कर्णिकासनं संस्थितं ५ तथैवर्षींश्च
सिद्धादीन्समस्तान्मंत्रदर्शिनः वासुकिप्रभृतीन्सर्पान्दिव्यान्विभवो पाल्हि॰
स्तथा ६ १५

नीलकंठी टीका १२

देवानग्न्यादित्यादीन् भूतविशेषास्थावरविधाजरायुजादयस्तेषां
संघान्समूहान् ब्रह्माणं चतुर्मुखं ईशं ईशितारं कमलासन-
स्थमिमनेन हरदर्शनमुक्तं उरगान्पातालस्थाननंतादीन्
दिव्यान्कैलासादौ स्थितान्वासुकिप्रभृतीन् एतेन व्यवहित
दर्शनमुक्तं १५

आनंदी टीका

भूतविशेषाणां चराचराणां संघान्साधून् ब्रह्मणो दर्शनादूर्ध्वंम
त्यलोकांतं दर्शनमुक्तं मूलार्थदर्शनाद्वा महो लोकांतम् उरगादर्श
नात्सप्तपातालदर्शनम् नानाविधभक्ताश्रितसप्तलोकदर्शनेपित्वा
मेवैकं सर्वलोकाश्रयं पश्यामीत्याह १५

रामकंठी टीका

किमित्याह॥— हे देव परमेश्वर तव देहे सकलजगदाधारे कार्यभूतेऽस्मिन्वपुषि दे
वादिदिवौकसस्तथा स्थान पिचराचराणां भूतविशेषाणां प्राणिनंतरा
णां सहस्राणि पश्यामीति देवादिप्राधान्येनैव हि जगदिति समस्त
विश्वदर्शनं भगवद्वपुषि पूर्वं प्रतिपाद्य क्रमेणातद्विशेषदर्शनं प्रति
पादयितुमाह ब्रह्माणं प्रजापतिमीशं प्रभुं कमलासनस्थं पुंड
रीकविष्टरसंनिविष्टं पश्याम्यनेन ब्रह्मलोकांतमूर्ध्वभुवनदर्श म^
नमुक्तवान् ऋषींश्च सर्वान्पश्यामीत्यनेन प्राधान्यापेक्षया ऋषि
जनोपलक्षितं मध्यमलोकदर्शनमुक्तवान् उरगांश्च दीप्तान्पश्य
मीत्यनेनानंतवासुकिप्रमुखभुजगेशोपलक्षितपातालदर्शनं च
एवं त्वद्वपुषि भुवनत्रयं लीनं पश्यामीति स्वानुभवं प्रतिपादितवान् १५

[illegible]

लाक्षिकी[illegible]टीका

किमिति अर्जुनउवाच ॥

हेदेवश्रीशशीलेश्वर तवदेहेसर्वान्देवान्ब्रह्मादीन्पश्यामिसालोक्यो
मि पेश्वरूपसमाधिसंस्कारवैवश्येनपश्यामिइतिवर्तमानेनोक्तिः
एवंसामान्येनोक्त्वाविशेषतोनिरूपयति तथासर्वान्भूतविशेषाणां
चराचराणांप्राणिभेदानांसमूहांश्च तथेशंदेवनामपिप्रभुंपद्मासना
सीनम् ब्रह्माणमूर्ध्वभवनवासिनंच तथासर्वान्दिव्यानृषीन्मर्त्यलोक
वासिनोवसिष्ठादींश्च उरगांश्चदिव्यान्प्राकृतानधोभवनवासिनोवा
सुकिप्रभृतींश्च तवेश्वरस्यव्यापकेदेहेतिलेतैलमिवव्याप्यत्वमापन्नान्
पश्याम्युपलभे एतेनभुवनत्रयंतवदेहविलीनंपश्यामीतिस्वानुभवं
प्रतिपादितवान् १५ ॥

पंचोलीटीका

अर्जुनस्यभाषणप्रकारमेवसंजयआह पश्यामीतिहेदेवअहंतव
देहेसर्वान्देवानिंद्रादीन्तथाभूतविशेषसंघान्भूतविशेषाणांस्था
वरजंगमानांविविधाकारविशिष्टानांसंघाःभूतविशेषसंघास्तान्
ब्रह्माणंचतुर्वक्त्रंईशंप्रजानांईशितारंकमलासनस्थंपृथ्वीपद्ममध्येमे
रुकर्णिकासनस्थंऋषीन्वसिष्ठादीन्सर्पान्वासुकिप्रभृतीन्उरगा
न्दिव्यान्पश्यामि १५

भगवीरसमिद्धोधिनी ॥

पश्यामीति हेदेव तवदेहे सर्वं प्रपभूते सर्वान्देवानिदानीमेवप
श्याम्युपलभे तथा भूतविशेषसंघान्भूतविशेषाणांप्राणिविशे
षाणांचयेसंघास्तानपिसर्वान्पश्यामितथाव कमलासनस्थमी
शंब्रह्माणमपि पश्यामीत्येवं ब्रह्मलोकांतमूर्ध्वलोकदर्शनं
तथ ऋषींश्चवसिष्ठादीन्पश्यामीति मध्यमलोकदर्शनं तथासर्वा
नुरगांश्चपातालवासिनः पश्यामीत्यधमलोकदर्शनं इतिसर्वे
व्याप्यव्यापकत्वंसर्वात्मत्वेनभगवद्विग्रहंप्रतिपादितं १५ ॥

मधुमाध

१५॥

भाषा अनुवाद

अब सञ्जय सत्रह श्लोक मे अर्जुन के कहे वचन कहते हैं कि
हे कृष्ण आप की शरीर मे आदित्य औ तावत् भूत समूह अर्थात्
जरायुज मनुष्य पशु और अण्डज पक्षी सर्प आदि औ स्वेदज जू
आ मच्छड़ प्रभृति तथा उद्भिज्ज लता वृक्ष आदि ये सब देखता
हौं और हे देव देवता सकल और नाभि कमल मे ब्रह्मा बैठे त
था ईश महादेव और दिव्य ऋषि वशिष्ठ आदि औ उरग तक्षक
आदिकों को देखता हूं पद्मासनस्थ ब्रह्मा किस प्रकार सो कह
ते हैं कि पृथिवी रूप नाभि से उठा जो कमल स्वरूप सुमेरु
गिरि तिस पर बैठे देखो हौं १५

चौपई

लखों देवतन देवहिं देहा त्यों सम भूत विशेष हिं नेहा ब्रह्मा
ईश कमलासन स्थित ऋषि सर्व अरु सर्पहिं दीस ॥१५॥

50

अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वा सर्व
तोऽनन्तरूपं नान्तं न मध्यं न पुनस्तवा
दिं पश्यामि विश्वेश्वर विश्वरूप १६

शाङ्करभाष्यटीका १

किञ्च अनेकेति अनेकबाहूदरवक्त्रनेत्रं अनेके बाहव उदराणि
वक्त्राणि नेत्राणि च यस्य तव स त्वमनेकबाहूदरवक्त्रनेत्रस्तम
नेकबाहूदरवक्त्रनेत्रं पश्यामि त्वा त्वां सर्वतः सर्वत्र अनन्त
रूपमनन्तानि रूपाणि अस्येत्यनन्तरूपस्तं अनन्तरूपं नान्त
मन्तोऽवसानं न मध्यं मध्यं नाम द्वयोः कोट्योरन्तरं न पुन
स्तवादिं तव देवस्य न अन्तं पश्यामि न मध्यं पश्यामि न पुन
रादिं पश्यामि हे विश्वेश्वर हे विश्वरूप १६

आनन्दगिरिकृतटीका २

यत्र भगवद्देहे सर्वमिदं दृष्टं तमेव विशिनष्टि अनेकेति आदि
शब्देन मूलमुच्यते नान्तं न मध्यमित्यत्रापि पश्यामीत्यस्य प्र
त्येकं सम्बन्धं सूचयति नान्तं पश्यामीति १६

स्वामिकृतटीका ३

किंच अनेकेति अनेकानि बाह्वादीनि यस्य तं तादृशं त्वां पश्यामि अने
न्तानि रूपाणि यस्य तं त्वां सर्वतः पश्यामि तव तु अन्तं मध्यमादिं च
न पश्यामि सर्वगतत्वात् १६

पैशाचभाष्यटीका ४

स्पष्टार्थे १६ ॥ ॥ ॥ ॥ ॥

रामानुजभाष्यटीका ५

अनेकेति अनेकबाहूदरवक्त्रनेत्रं अनन्तरूपं त्वां सर्वतः पश्यामि
विश्वेश्वर विश्वनियन्तः विश्वरूप विश्वशरीर यतस्त्वमनन्तः अत
स्तवान्तं न मध्यं न पुनस्तवादिं न पश्यामि १६

अभिनवगुप्तकृतटीका ६

अनेकेति॥

श्री·
गी· टी·
५

51

संख्यार्थ १६ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका· ३

अथ विश्वरूपं वर्णयति, द्वाभ्यां भो विश्वेश्वर ते विश्वरूपं विश्वात्म
कं रूपं यद्वा विश्वं विश्वं वैष्णवद्वारहस्यादिना विश्वं विश्वस्वरूपं रूप
शरीरं यस्य तथाविधं ते इति त्वां पश्यामि किं भूतं अनेकबाहूद
रवक्त्रनेत्रं अनेकानि बाहूदरवक्त्रनेत्राणि बाहूदरवक्त्रनेत्राणि
यस्य सर्वतः समंततः अनंतरूपम् असंख्यातरूपं एवं सर्वं पश्या
मि पश्चैव न तवांतं न पश्यामि किं तेऽन्ते पर्यवसानं मध्यं स्थि
तिमवस्थानं आदिमाविर्भावं [illegible]
[illegible]
[illegible]
[illegible]
[illegible]

वनमाली टीका ८

यत्र भगवद्देहे सर्वमिदं दृष्टवान् तमेव विशिनष्टि अनेकेति बा
हवउदराणि वक्त्राणि नेत्राणि वा नेकानि यस्य तमनेकबाहूदरव
क्त्रनेत्रं पश्यामि त्वां सर्वतः सर्वत्रानंतानि रूपाणि यस्येति तं न तवांत
नांतमवसानं न मध्यं नाप्यादिं पश्यामि सर्वगतत्वात् हे विश्वेश्व
र हे विश्वरूप संबोधनद्वयमतिसंभ्रमात् रथस्थस्य परिच्छिन्नत्वे
न दृश्यमानस्यापि व्यापकत्वस्य दृष्टत्वमिति भावः १६

क्रममदेवज्ञपत्नीटीका· ९

पार्थो यत्र भगवद्देहे दृष्टवान् तमेव भगवद्विश्वात्मकं देहं वर्ण
यति अनेकबाहूदरवक्त्रनेत्रमिति हे विश्वेश्वर विश्वनियंतः अ
तिसंभ्रमात्संबोधनं विश्वरूप विश्वशरीर त्वां त्वामेव सर्वतः सर्वत्र
दिक्षु पश्यामि प्रमत्तविषयीकरोमि कीदृशं अनेकबाहूदरवक्त्रने त्रमने
कानि संख्यावच्छेदशून्यानि बाहूदराणि वक्त्राणि च यस्य तेन
प्रायः पुनः अनंतरूपं अनंतमवधिरहितं निर्णयरहितं वा रूपं स्व
रूपं यस्य सम तथा तं अत एव विश्वरूपस्य तव अन्तं पादावस्थानं न प
श्यामि मध्यं कटिप्रदेशभागं न पश्यामि पुनः आदिं शिरोभागं न पश्या
मि इदमित्थमिति निर्णयपूर्वकं त्वां न जाने अमीमर्थः १६

मधुसूदनी टीका १

यत्र भगवद्देहे सर्वमिदं दृष्टवानर्जुनस्तमेव
विशिनष्टि बाहवश्च उदराणि वक्त्राणि नेत्राणि चानेकानि यस्य तमनेकबाहू-
दरवक्त्रनेत्रं पश्यामि त्वां सर्वतः सर्वत्र अनंतानि रूपाणि य-
स्येति तं त्वमनंतरूपं अंतमवसानं न मध्यं नाप्यादिं पश्यामि त्वा
सर्वतः सर्वत्र अनंतानि रूपाणि यस्येति तं त्वमनंतरूपं
अंतमवसानं न मध्यं नाप्यादिं पश्यामि सर्वगतत्वात् हे विश्वे-
श्वर हे विश्वरूप सर्वोपनिषदमतिसंभ्रमात्
१६

सदानंदी टीका ११

बाहवश्चोदराणीह वक्त्राणि नयनानि च यस्यानेकानि तं त्वा-
हं पश्यामि विश्वरूपिणं १ सर्वत्रानंतरूपं चापरिछिन्नमहत्त्व
रं नावसानं न मध्यं च नादिं पश्याम्यहं तव २ हे विश्वेश समस्त
लात्मन्निति संभ्रमाद्वचः ३ १६

नीलकंठी टीका १२

अनेके अनंताः बाहवः उदराणि वक्त्राणि नेत्राणि च यस्मिंस्तद-
नेकबाहूदरवक्त्रनेत्रं सर्वतस्त्वत्कर्तृकं उपर्यधश्च अनंतमप-
रिच्छिन्नरूपमस्य तं अंतं त्वमेवाह नांतमिति दीर्घरज्वा इव
तवाद्यंतौ देशिको नस्त इत्यर्थः १६

आनंदी टीका

विश्वस्येश्वरो नियंता विश्वानि कार्यकारणाद्यात्मकानि रूपाणि य-
स्य हे इदमेव च भवतो रूपं सर्वदापरिवितं पुरो वस्थितं भगवदनुग्रहा-
त्त्वं बलिते जो मयेय पश्यामीत्याह १६ ॥

रामकंठी टीका श्रीने पित्वामेवैकं सर्वाश्रयं पश्यामीत्याह ॥

पर्वदेवादिविविधरूपाधिष्ठितभुवनत्रयद
स्पष्टार्थः श्लोकः किंत भुवनत्रयगतानां भूतानां येनानाविधा ज-
रवदनलोचनादयोऽवयवास्तेन तथैव सर्वतोऽनवच्छिन्नमाहात्म्यस्यैक
स्यावयवतेन पश्यामीत्यनंतानार्यम
१६ ॥

गी
टी॰ प॰

लालकीवनगतीटीका

किंच सर्वेषांप्राणिनामवयवास्तएवतवावयवा इत्यवशिष्टत्वामेकंपश्या
मि हेविश्वेश्वरहेविश्वरूपेतिसंबोधनद्वयमदृष्टपूर्वानुभूतत्वाद्गतो
द्भ्रांतिवशात् १६॥

पंचोलीटीका

अनेकेतिहेविश्वेश्वरविश्वरूपंत्वांअनेकबाहूदरवक्त्रनेत्रंअनेका
बाहवः उदराणिवक्त्राणिनेत्राणिचयस्यसः सर्वतोनंतरूपंसर्वतः
सर्वत्रानंतानिरूपाणियस्यतंत्वांपश्यामिचपुनः पुनरादिमध्यंअं
तंनपश्यामिसर्वगतत्वात् १६

स्मावीरसमिद्धोधिनी॥

एवंत्रिभुवनदर्शनेपि भगवंतमेवैकं सर्वाश्रयत्वेन पश्या
मीत्याह अनेकेति गतार्थमेतच्छ्लोकद्वयम् १६॥

मधुभाष्य

परात्परंयन्महतोमहांतं यदेकमव्यक्तमनंतरूपमिति
यजुर्वेदे अव्यक्तस्यानंतत्वादेवमहतो महत्वेनापरिमेयत्वं
सिद्धति महांतंचसमाहृत्यप्रधानंसमवस्थितं अनंतस्य
नतस्यांतः संख्यानंचापिविद्यतइत्यादिस्मृतयोनानिवि
वेकानिरूपाण्यनंतानीतिविवेकश्चभवति असंख्यातानांज्ञा
नकास्तस्यदेहाः सर्वेप्रलीनाममृष्टिवर्जिताश्चेत्युक्तंखिल
याचान्वाअपमाकाशांतानानेवांतर्हृदयाकाशः उभे

भाषा अनुवाद

और अनेक बाहु अनेक उदर अनेक मुख अनेक नेत्र तुम
को सर्वत्र मै देखता हूं परन्तु हे विश्वरूप तुमारा आदि म
ध्य अन्त नहीं देखता हूं १६

चौपई

बाहुअनेकउदरमुखनेत्र लखों अनंत तोहि रूप सर्वत्र॥ न
हि तव अंतमध्य अरुआदि लखों सर्वविश्वेश अनादि १६

किरीटिनं गदिनं चक्रिणञ्च तेजोराशिं
सर्वतोदीप्तिमन्तं पश्यामित्वांदुर्निरी
क्ष्यं समन्ताद्दीप्तानलार्कद्युतिमप्रमेयं १७

शाङ्करभाष्यटीका १

किञ्च किरीटिनमिति किरीटिनं किरीटोनामशिरोभूषणवि
शेषः तद्यस्यास्तीति सकिरीटी तं किरीटिनं तथा गदिनं गदा
यस्य विद्यतइति गदी तं गदिनं तथा चक्रिणं चक्रमस्यास्ती
ति चक्री तं चक्रिणं च तेजोराशिं तेजःपुञ्जं सर्वतोदीप्तिमन्तं
सर्वतोदीप्तिमांस्तं सर्वतोदीप्तिमन्तं पश्यामि त्वां दुर्निरीक्ष्यं दुःखे
न निरीक्ष्योदुर्निरीक्ष्यस्तं समन्ततः सर्वत्र दीप्तानलार्कद्युतिं अ
नलश्चार्कश्चानलार्कौ दीप्तौ चानलार्कौ दीप्तानलार्कौ तयोर्दी-
प्तानलार्कयोर्द्युतिरिव द्युतिस्तेजो यस्य तव स त्वं दीप्तानलार्कद्यु-
तिस्तं त्वां दीप्तानलार्कद्युतिं अप्रमेयं न प्रमेयमप्रमेयमशक्यप-
रिच्छेदमित्यर्थः १७

आनन्दगिरिकृतटीका २

विश्वरूपवन्तं भगवन्तमेव प्रकारान्तरेण प्रपञ्चयति कि
ञ्चेति परिच्छिन्नत्वं व्यावर्तयति सर्वत इति दुर्निरीक्ष्यं पश्या
मीत्यधिकारिभेदादविरुद्धं पुरतोवा पृष्ठतोवा पार्श्वतोवा ना-
स्य दर्शनं किन्तु सर्वत्रेत्याह समन्तत इति दीप्तिमन्तं दृष्टान्ते
न स्पष्टयति दीप्तेति १७

स्वामिकृतटीका ३

किंचकिरीटिनमिति किरीटिनंमुकुटवंतंगदिनंगदावंतंचक्रि
णंचक्रवंतंचसर्वतोदीप्तिमंतंतेजःपुंजरूपं तथादुर्निरीक्ष्यंद्रष्टुम
शक्यं तत्रहेतुः दीप्तयोरनलार्कयोः द्युतिरिवद्युतिस्तेजोयस्यतं
अतएवाप्रमेयंएवंभूतइतिनिश्चेतुमशक्यंत्वांसमंततःपश्यामि
१७

पैशाचभाष्यटीका ४

+ एवंकमलासनस्थमितिपदेनसामान्यतोविष्णोः स्वरूपंयद्दृष्टमित्युक्तं तदेवगदाचक्रा
द्यायुधोपलक्षणपद्या पुराणेष्वुक्तंतमधुनथाइदंविष्णुर्विचक्रमेत्रेधानिदधेपदमिति
श्रुतिप्रतिपादितेत्रिविक्रमाकारेणदृष्टमित्याह॥ +

श्री· गी· टी· ५

स्पष्टार्थं १७

रामानुजभाष्यटीका· ५

किरीटिनमिति तेजोराशिंसर्वतोदीप्तिमंतंसर्वतोदुर्निरीक्ष्यंदी
प्तानलार्कद्युतिमप्रमेयंकिरीटिनंगदिनंचक्रिणंचपश्यामि १७

अभिनवगुप्तकृतटीका· ६

स्पष्टार्थं १७ ॥ ॥ ॥ ॥

परमार्थप्रपाटीटीका· ७

+ किरीटिनमिति किरीटिनंमुकुटवंतंगदिनंगदायुक्तंचक्रि
णंसुदर्शनवंतंपश्यामि अनेनोर्ध्वहस्ताभ्यांक्रमेणगदाचक्रेत
थाधरहस्ताभ्यांपद्मशंखौबिभ्राणमेवचतुर्भुजंत्रिविक्रमरूपं
पश्यामीत्युक्तं तथात्वांसर्वतस्तेजोराशिंतेजःसमूहस्वरूपंदी
प्तिमंतंप्रसरत्प्रकाशंसमंताद्दुर्निरीक्ष्यंद्रष्टुमशक्यंदीप्तानला
र्कद्युतिंज्वलदग्निसूर्ययोर्दीप्तिर्यस्य अप्रमेयमनसाप्यतर्क्यंअ
यमर्थः त्रिविक्रमरूपात्स्वरूपेणैवचरणविन्यस्तेपमात्र्याम
चलांकुशकठाहंतादृशमपितवदेहंपश्यामिकिंपुनरन्यत् यत
देवमनसिनिधायमहापुराणेप्युक्तं काहंतमोमहदहंखचरा
ग्निवार्भूःसंवेष्टितांडघटसप्तवितस्तिकायः इत्यादि १७

वनमाली टीका· ८

तमेवाचिंत्यशक्तिमंतंभगवंतंप्रकारांतरेणविशिनष्टि किरी
टिनमितिकिरीटगदाचक्रधारिणंचसर्वतोदीप्तिमंतंतेजोरा
शिंच अतएवदुर्निरीक्ष्यंभगवत्प्रसादसहकृतेन दिव्येनचक्षु
षाविनानिरीक्षितुमशक्यंसम्यक्कारपाठेदुःशकोपद्रववचनः
श्रुतिनिरीक्ष्यमितियावत् दीप्तयोरनलार्कयोर्द्युतिरिवद्युतिर्यस्य
तमप्रमेयमियत्तयमितिपरिच्छेत्तुमशक्यमियत्ताशून्यत्वात् स
मंतात्सर्वतःपश्यामि दिव्येनचक्षुषाभगवत्प्रसादसद्भावासद्भा
वाभ्यांसनिरीक्ष्यत्वदुर्निरीक्ष्यत्वेचैकस्यैवनविरुद्धमितिभावः १७

कुसुमवैजयन्तीटीका· ९

प्रकारांतरेणतमेवविश्वरूपकंविशिनष्टि किरीटिनमिति कि
रीटिनंकिरीटोपलक्षितकुंडलकटककेयूरहारकटिसूत्रनू

गदिनं तस्तोषितभूषणवत्त्वमित्यर्थः गदिनं चक्रिणं गदाचक्राभ्यामु
पलक्षितानेन विविध विविधसोषित दिव्यायुधवत्त्वं चकाराद्वेद्वव
षणादि दिव्यवायवत्त्वं तेजोराशिं तेजःपुञ्जरूपं सर्वतः सर्वत्र दीप्तिमके
शानवदेतायुधाः लक्ष्म्यादि विदीप्तमव एवतपीतनीलरक्तहरिता
दिद्युतयो विद्यते यस्य तं अतएव दुर्निरीक्षं दिव्यदृष्ट्यादि विनेतर
दृष्ट्यानिरीक्षितुमशक्यं सयकारपाठे तु दुःशब्दो निषेधवाची दिव्य
दृष्ट्याप्यनिरीक्ष्यमित्यर्थः ननु तु दुःशब्दस्य निषेधवाचित्वे पश्यामी
ति क्रियाया विरोधः स्यादिति आशंक्य प्रमेयत्वेन पश्यामीत्याह समंता
त्सर्वतः स्वरूपावयवादेः अप्रमेयं इयन्मयमितिपरिच्छेत्तुमशक्यं
दिव्यदृष्ट्या पीयत्तावच्छेदराहित्येनाहं पश्यामि तो न विरोधः कुत एवं
यतो दीप्तानलार्कद्युतिं दीप्तयोरनलार्कयोर्द्युतिरिव द्युतिर्यस्य तं
यतो दीप्तानलार्कद्युतिं दीप्तयोरनलार्कयोर्द्युतिरिव द्युतिर्यस्य तं
प्रतिप्रबलप्रचण्डप्रलयानिलोद्धूतानलतत्कालीनातिप्रचण्डमा
र्तण्डसमदीप्तित्वेनातिसंभ्रमदिव्यदृष्टेः प्रसरणानवकाशत्वात्प्र
मातुमशक्यमस्य रूपं प्राप्यो हि मे को भवान्तु यद्रूपमिति विस्म
मात् दिव्याकारेण सर्वेनियंतारं सर्वेश्वरमहं पश्यामीत्येव १७

मधुसूदनी टीका ।

तमेव विश्वरूपं भगवंतं प्रकारांतरेण विशिनष्टि—किरीटगदाचक्रधारिणं च सर्वतो दीप्तिमंतं तेजोराशिं च अत एव दु
र्निरीक्ष्यं दिव्येन चक्षुषा विना निरीक्षितुमशक्यं सयकारपाठे दुःश
ब्दोपहृदवचनः अनिरीक्ष्यमिति यावत् दीप्तयोरनलार्कयोर्द्यु
तिरिव द्युतिर्यस्य तं अप्रमेयमियन्मयमिति परिच्छेत्तुमशक्यं त्वा
समंतात् सर्वतः पश्यामि दिव्येन चक्षुषा अतोधिकारिभेदाद्दुर्नि
रीक्ष्यं पश्यामीति न विरोधः
१७

सदानंदी टीका ॥

तेप्रकारांतरेणेशं विशिनष्टि विदहयं गदाकिरीटचक्रादिधारिणं
तेजसां निधिं १ सर्वतो दीप्तियुक्तं च पश्यामीशानमद्भुतं विना दिव्य
नेत्रेणाम्मशक्यं निरीक्षितुं २ सर्वतो दीप्तयोर्वह्निसूर्ययोरि
व भायुतं अप्रमशक्यं परिच्छेत्तुमियत्ताप्रमियानिति ३ १७

नीलकंठी टीका ॥

श्री॰
गी॰ टी॰
५

किरीटगदाचक्रधारिणं दीप्तिमन्तं देवं निरीक्षे दुर्निरीक्ष्यमशक्यं समं
तात्सर्वतो दीप्तौ अनलार्कौ ययोस्तद्वत् द्युतिर्यस्य तं समन्ताद्दीप्तान
लार्कद्युतिमिमेकं पदं अनन्तत्वादप्रमेयं दुर्निरीक्ष्यमशक्यं परिच्छेदं १७

५५

आनंदीटीका

स्वगमोर्थः [illegible] १७

इदमेव वचने उपरः स्थितं रूपं त्वदनुग्रहात्परमेश्वरते। जो मयं पश्यामीत्याह॥

रामकंठीटीका

अवतरणिकयैव व्याख्यातं तात्पर्यमेतत् [illegible] ॥ १७ ॥

लासिकी

वमगलीटीका

किंच॥ किरीटिगदाचक्रफकंपरिछिन्नं त्वामेव वसुदेवात्मजमेवं विधं प्रपश्यामि कीदृशमित्याह सर्वतो दीप्तिमंतं तेजोराशिरूपम् तथा दुर्निरीक्ष्यं दुष्प्रकाशम् सर्वकाश्यादेः शास्त्रोपकृद्ववचनः अनिरीक्ष्यमिति यावत् तथा समंताद्दीप्तयोरनलार्कयोर्द्युतिरिव द्युतिर्यस्य तम् अप्रमेयं प्रमत्वादिप्रमाणागोचरं एवंविधैश्वर्ययोगदर्शनादि [illegible] मनुमिनोति १७॥

पन्य

पंचोलीटीका

किरीटिनं इति हे देव अहं त्वां एवंविधं प्रपश्यामि कथंभूतं त्वां किरीटिनं रत्नखचितमुकुटाभरणयुक्तं गदिनं गदायुधविशेषयुक्तं चक्रिणं चक्रायुधविशेषहस्तं तेजोराशिं तेजसां पुंजयुक्तं सर्वतः सर्वास्तु दिक्षु दीप्तिमंतं सुदीप्या सर्वप्रकाशिसमंतात् दुर्निरीक्ष्यं द्रष्टुमशक्यं दीप्तानलार्कद्युतिं दीप्तयोरनलार्कयोः अग्निसूर्ययोः द्युतिरिव द्युतिर्यस्य तेजो यस्य तं दीप्तानलार्कद्युतिम् अप्रमेयं सकलप्रमाणागोचरं १७

रणवीरसमिद्धोधिनी॥

स्पष्टोर्थः १७॥

मधुभाष्य

१७॥

भाषा अनुवाद

और मुकुट गदा चक्र युक्त तथा तेज पुञ्ज सर्वत्र प्रकाश
मान अति दुर्निरीक्ष्य चहूं ओर प्रदीप्त अनल अर्क के समा
न तुम को मै देखता हूं १७

चौपई

मुकुट गदा अरु चक्र धरंत तेजराशि सम भसें द्युतिवंत
तोहि कठिन दर्श सर्व दिशेषों अनल अर्क द्युति अप्रमेय वि
शेषों १७

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानं त्वमव्ययः शाश्वतधर्म्मगोप्ता सनातनस्त्वं पुरुषो मतो मे १८ ॥

शाङ्करभाष्यटीका १

इत एव ते योगशक्तिदर्शनादनुमिनोमि त्वमिति त्वमक्षरं न क्षरतीति परमं परं ब्रह्म वेदितव्यं ज्ञातव्यं मुमुक्षुभिः त्वमस्य विश्वस्य समस्तस्य जगतः परं प्रकृष्टं निधानं निधीयते अस्मिन्निति निधानं परमाश्रय इत्यर्थः किञ्च त्वमव्ययो न च तव व्ययो विद्यत इति अव्ययः शाश्वतधर्म्मगोप्ता शश्वद्भवः शाश्वतो नित्यो धर्म्मस्तस्य गोप्ता शाश्वतधर्म्मगोप्ता सनातनश्चिरन्तनस्त्वं पुरुषः परो मतोऽभिप्रेतो मे मम १८

आनन्दगिरिकृतटीका २

सप्रपञ्चे भगवद्रूपे प्रकृते प्रकरणविरुद्धं त्वमक्षरमित्यादिनिरुपाधिकवचनमित्याशंक्याह इत एवेति योगशक्तिरैश्वर्यातिशयः न क्षरतीति निःप्रपञ्चत्वमुच्यते परमपुरुषार्थत्वात् परमार्थत्वाद्वा ज्ञातव्यत्वं यस्मिन् द्यौः पृथिवी इत्यादौ प्रपञ्चायतनस्यैव ततो निर्दिष्टस्य ज्ञातव्यत्वश्रवणात् कुतो ब्रह्मणो ज्ञातव्यत्वं तत्राह त्वमस्येति निःप्रपञ्चस्य ब्रह्मणो ज्ञेयत्वे हेत्वन्तरमाह किञ्चेति अविनाशित्वात्तत्त्वैव ज्ञातव्यतातिरिक्तस्य नाशित्वेन हेयत्वादित्यर्थः ज्ञानकर्म्मात्मनो धर्म्मस्य नियतं वेदप्रमाणकत्वे धर्म्मस्थापनयनार्थाय सम्भवामीत्युक्तत्वाद्गोप्तारतिता १८

स्वामिकृतटीका ३

यस्मादेवं तवातर्क्यमैश्वर्यं तस्मात्त्वमक्षरमिति त्वमेवाक्षरं परमं ब्रह्म कण्ठभूतं वेदितव्यं मुमुक्षुभिर्ज्ञातव्यं त्वमेवास्य विश्वस्य परं निधानं निधीयतेऽस्मिन्निति निधानं प्रकृष्ट आश्रयः अत एव त्वमव्ययो नित्यः
नित्यस्य शाश्वतस्य धर्म्मस्य गोप्ता पालकः सनातनश्चिरन्तनः पुरुषो मम संमतोऽसि १८

पैशाचभाष्यटीका ४

स्पष्टार्थं १८

रामानुजभाष्यटीका॰ ५

त्वमिति उपनिषत्स्वद्वे वेदितव्ये विद्ये इत्यादिषु वेदितव्यतया निर्दिष्टं पर
ममक्षरं त्वमेव विश्वस्य परं निधानं विश्वस्यास्य परमाधारभूतस्त्वमेव त्व
य॰ मव्ययो व्ययरहितः यत्स्वरूपो यद्गुणो यद्विभवश्च त्वं तेनैव रूपेण सर्वदा
वतिष्ठसे शाश्वतधर्मगोप्ता शाश्वतस्य नित्यस्य वैदिकस्य धर्मस्य वेदादि
भिरवतारैस्त्वमेव गोप्ता सनातनस्त्वं पुरुषो मतो मे वेदाहमेतं पुरुषं म
हान्तमित्यादिषूदितः सनातनः पुरुषस्त्वमेवेति मम मतः
यदुकुलतिलकस्त्वमेवं भूतैरिदानीं साक्षात्कृतो मयेत्यर्थः १८

अभिनवगुप्तकृतटीका॰ ६

यत्संविक्रियाज्ञानयोरुभयोरपि भेदाप्रतिभासात्मके परमगुरौ महा
देवे पर्यन्ते तथा समस्तात्मके प्रकाशरूपे पूर्णे लक्ष्यते त्वं विद्यते येषां ते सा
त्वताः तेषां धर्मेण व्रतग्रहणेन सम्यक् परत्वात्स्पष्टिसंहारविषयः
सकलमार्गगामीणां त्वं गोपायते एतदेवाद्याध्याये रहस्याद्य शोदेवी
स्तोत्रविवृतौ मया प्रकाशितं तत्स्फुटदर्शैः सोपदेशैः स्वयमेवावगम्य
ते इति किं पुनः पुनः स्फुटतरप्रकाशनवाचालतया १८

परमार्थप्रपादीटीका॰ ७

अथाप्रमेयत्वमेवाह त्वमक्षरमिति न क्षरतीत्यक्षरं परं ब्रह्म त्वमे
व परमं मामेति केवेदितव्यं मुमुक्षुभिर्ज्ञातव्यं यस्मिन् ज्ञाते सर्वमि
दं विज्ञातं भवतीत्यर्थः त्वमस्य दृश्यमानस्य विश्वस्य परं उत्कृष्टं निधा
नं निधीयते यस्मिन् प्रकृष्टमाश्रयः अव्ययो नित्यः शाश्वतायेमो
त्वमापकाधर्मास्तेषां गोप्ता रक्षिता निर्वाहकः सनातनः पुरातनः
एवंविधस्त्वं पुरुषः पुरुषोत्तमो मम मतः किंबहुना तव मात्रहिंसाभया
द्दण्ड्यत्विहितेन कालरूपपरमेश्वरदर्शनप्रार्थनमार्जनयात्रैलोक्य॰
हिंसापि मयैव कारितेति निश्चिन्वानः पश्चान्नायमत्रवदञ्जाह अनादी॰
ति १८

वनमालीटीका॰ ८

सकलश्रुतिसर्वस्वं त्वमेवेत्याह त्वमिति त्वमेवाक्षरं न क्षरति स्वरू
पतो धर्मतो देहत्वनाशादिविकाररहितं परमं वेदितव्यं मुमुक्षु॰
भिर्वेदान्तश्रवणादिना त्वमेवास्य विश्वस्य परमुत्कृष्टं निधीयतेऽस्मि

ष्ठितिनिधानमाश्रयः त्वमव्ययः सदैकाकारः शाश्वतस्य नित्यवेदप्रति
पादितस्य धर्मस्य गोप्ता पालयिता अत एव सनातनश्चिरंतनः पुरु
षोन्तर्यामी पूर्णत्वेन पुरिशयः परमात्मा स एव त्वं वसुदेवतनय एव मे भू
तो मे सम्मतो विदितोसि १८

ऊसमवैजयन्तीटीका ४

एवमचिन्त्यानेकानन्तमहिमत्वेन परमेश्वराधारणेन गुणेन भग
वतो निश्चित्याह त्वमक्षरमिति श्रुत्युपनिषद्यातं तदक्षरमधिगम्य
ते यत्र तद्रूपं हि विदुर्वेदितव्योऽस्मादिवेदान्तवाक्यैर्मुमुक्षुभिर्वेदित
व्यं ज्ञातव्यं परमं सर्वपरं यद्वापरामवोत्कृष्टामालेलीणोभावि
तेयस तत् अक्षरं नित्यं ब्रह्मस्वरूपं त्वमेवासि अस्य चेतनाचेतनात्म
कस्य विश्वस्य परं प्रकृष्टं निधानं निधीयतेऽस्मिन्निति निधानमाश्रयः
त्वमेवासि अत एव अव्ययः व्ययरहितस्वरूपगुणशक्तिविभवः
त्वमेव शाश्वतस्य नित्यस्य वेदोक्तधर्मस्य गोप्ता एवमादिभिरवता
रैः पालयिता त्वमेव यद्वा हे शाश्वत नित्य नित्यं बोधनेन सनातनश्चिरं
तनः पुरुषो यः परमात्मा स इदानीं यदुकुलाम्भोधिजातो राजत्वमेव
मे मया च मतो विदितोसि १८

एवं तवातर्कणीयनिरतिशयैश्वर्यद मधुसूदनीटीका १ र्शनादनुमिनोमि ॥

त्वमेवाक्षरं परमं ब्रह्म वेदितव्यं मुमुक्षुभिर्वेदान्तश्रवणादिना त्वमे
वास्य विश्वस्य परं प्रकृष्टं निधीयतेऽस्मिन्निति निधानमाश्रयः अत ए
व त्वमव्ययो नित्यः शाश्वतस्य नित्यवेदप्रतिपादितस्य धर्मस्य गो
प्ता पालयिता शाश्वते नित्यं बोधनेवा तस्मिन्मते ब्रह्मा विनाशिरहि
तः अत एव सनातनः चिरंतनः पुरुषो यः परमात्मा स एव त्वं मे
मतो विदितोसि १८ [illegible] ॥

सदानंदी टीका ११

एवं तवामतर्क्यमतिजयैश्वर्यदर्शनात् इत्यंशास्त्रोस्यपात्वुच्चा
सम्यगनुमिनोम्यहं १ त्वमक्षरं परं ब्रह्म वेदितव्यं मुमुक्षुभिः वैरा
ग्यादिगुणैः सम्यग्वेदान्तश्रवणादिना २ विश्वस्यास्य समस्तस्य परो
त्कृष्टत्वमाश्रयः अत एवासि नित्यस्त्वं शाश्वतोऽयधर्मरक्षकः ३ धर्म
स्य नित्यवेदेन प्रतिपादितधर्मस्य च त्वं हि पालयिता नाशशून्यस्व
रूपाच्चिरंतनः ४ परमात्मासि पुरुषो विदितो मे परात्परः ५ १८

नीलकंठी टीका १२

श्री. गी. टी. टी.

एवं त्वद्योगैश्वर्यदर्शनात्त्वामेवमेवमीतिवदन्नप्रमेयत्वमेव विज्ञ
णोति त्वमिति परमं अक्षरं अक्षरं अस्थूलादिलक्षणं अक्षरं ब्रह्मप
रममिमज्ञमात्युक्तं निष्कलब्रह्मत्वदेवत्वमसि एतेन सगुणरूपस्य
निर्गुणज्ञापकत्वमुक्तं शास्त्रात्प्रस्येव वेदज्ञापकत्वं अतएव वेदित
व्यं वेदान्तप्रमाणेन ज्ञातव्योम्यन तूपासनीय सगुणब्रह्मापित्वमेव
स्माह त्वमस्येति निधानं लयस्थानं एतेन कारणत्वमुक्तं अव्ययः
अमृतः देवत्वात् शाश्वतस्य वैदिकस्य धर्मस्य गोप्ता मे सनातनकार्यब्र
ह्मभूतहिरण्यगर्भरूपत्वमुक्तं सनातनस्थिरतत्त्वोनादिपुरुषो
जीवात्मापि त्वमेवमेममततः एवं विश्वरूपदर्शनेन जीवब्रह्म
णोरैक्यं शास्त्रबोधादिवाधिगम्यत इत्युक्तं १८

यस्मात्कृष्णं तत्त्वदेवप्रत्यक्षीकृत्याह ॥ आनन्दीटीका

तस्मादितिनिर्देशात्तिव्रतमात्रोक्तेस्मादितिब्रह्मनामतत्वद्विद्यते यस्मि
न्निति सत्वात् परमेश्वरः सदेवतायेषां तेऽस्मातत्ताः ब्रह्म विद्वत्त्वेषाय
मस्य ज्ञानकर्मसमुच्चयानुष्ठानस्य गोप्ता मनोमेरति यत्त्वयातीति
यं व्याख्यातं तदयं सर्वं मयाप्रत्यक्षीकृतमित्यर्थः १८

अतएव परमेश्वरप्रतिपादकानि विशेषणानि रामकण्ठीटीका नित्यस्वरूपस्य प्रतिपादयितुमाह ॥

अक्षरं स्वरूपप्रच्युतिलक्षणलोभरहितं यत्परमं निरूतरं वेदितव्यं यत
स्तत्त्वात् तथास्याजेतस्य पञ्चस्य जगतः प्रकृष्टं निधानं तव्येवं सर्वं न४
जगन्निविशते न त्वं क्लिश्जगतो निधानं प्रधानं यद्भूतन्प्रलये निधीयते
सत्यमस्ति तन् प्रधानं तदपि परमकारणं भगवति निधीयते तत एव
च प्रभवतीति प्रधानस्यापि निधानत्वात्तवपरमं निधानं जगतः इत्युक्तं
तथा कालावच्छेदाविषयत्वादव्ययोऽव्ययः सनातनधर्मगोप्ता त्वमस्मदि
ति ब्रह्मनामपद्धत्यातिर्येतत्सदितिनिर्देशो ब्रह्मणस्त्रिविधः स्मृत इति
तद्विद्यते यस्य सत्वात् परमेश्वरः परब्रह्म सदेवतायेषां ते सात्वताब्रह्मवि
दस्तेषां धर्मो यथा प्रतिपादितज्ञानक्रियासमुच्चयानुष्ठानरूपः सदाचा
रलक्षणो गोप्ता कालापचयवशात्तिरोभवतः पुनः पुनः प्रादुर्भावनात्
हायकविज्ञविघटनाद् रक्षिता त्वमेव ॥

लाक्षिकी वनमालीटीका

अवश्यंज्ञेयंपरममक्षरं ब्रह्मत्वमेवेश्वरः तथास्येदंतावद्यथार्थस्यविश्व
स्यपरंप्रधानाश्रयेलयात्मकं निधानंपरमाश्रयास्त्रयस्त्वमेव तथा
चोक्तं यथान्यग्रोधवीजस्थः शक्तिरूपोमहाद्रुमः तथाहृदयवीजस्थंज
गदेतच्चराचरमिति तथात्वमेवशाश्वतस्यनित्यस्यधर्मस्यवैदस्यापार
र्यायस्माद्दत्ताद्रूपविसर्गाख्यस्यगोप्ता जीवदवस्थायामपिपालकः तद्रूपे
णकः अतएवाव्ययःजीवनप्रणाशावपिस्वरूपप्रच्युतिरूपविकाररहितः
तथासनातनःअनादिः पुरुषः कूटस्थआत्माचत्वमेवेश्वरोमयामतो
नुमानेनज्ञातोसि[illegible] १८ ॥

पंचोलीटीका

यस्मादेवंतवातर्क्यमैश्वर्यंतस्मादेवंवितर्कयामित्वमितिहेभगवन्मु
मुक्षुभिःवेदितव्यंज्ञेयंपरममक्षरंअविनाशिनंब्रह्मत्वमेवासिवि
श्वस्यजगतःपरंनिधानंपरमाश्रयंत्वमेवासिअव्ययंनित्यंत्वंशाश्वत
स्यधर्मस्यगोप्तापालकःसनातनःचिरंतनपुरुषःमेममत्वमेवमतः
अभिप्रेतः १८

रणवीरसमिद्धायिनी॥

भगवंस्त्वंअक्षरं नक्षरतेस्वस्वरूपान्नव्यवतेइत्यक्षरं मायीयादिक्षो
भरहितमित्यर्थः परमंप्रकृष्टंयदक्षरंतदोंकाररूपं त्वमेववेदितव्य
मतोस्यविश्वरूपस्यपरंनिधानं परमंकारणंत्वमेवासि अतएवअ
व्ययोनविकारमेतीत्यव्ययः शाश्वतधर्मगोप्ता शाश्वते नित्योद्भवे
यस्यधर्मे नक्षेपायतेइतिशाश्वतधर्मगोप्तात्वमेवासिइतीत्यंलक्ष
णोमेसनातनःपुरुषः पुराणपुरुषस्त्वमेतालक्षितोज्ञातोसीत्यर्थः
१८॥

मधुभाष्य

१८॥

59

भाष्य अनुवाद

जिस हेतु तुमारा ऐश्वर्य ऐसा अचिन्त्य है इस से तुम अक्षर जो परब्रह्म मुमुक्षु लोगों के जानने योग्य और तुम इस विश्व के निधान कहे परम आश्रय हो इस से तुम नित्य औ नित्य धर्म के पालक औ अनादि पुरुष मेरे मत मे हो १८

चौपई

परम अक्षर तुं योग्य विज्ञान तुं इस विश्व को परम निधान
तुं अखंड धर्म प्रतिपालन सो मत मे तुं पुरुष सनातन १८

60

अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुंश
शिसूर्यनेत्रं पश्यामित्वांदीप्तहुताशव
क्त्रंस्वतेजसाविश्वमिदंतपन्तं १९

शाङ्करभाष्यटीका· १

किञ्च अनादीति अनादिमध्यान्तमादिश्च मध्यञ्च अन्तश्च न वि
द्यते यस्य सोयमनादिमध्यान्तस्तं त्वामनादिमध्यान्तमनन्तवी
र्यं न तव वीर्यस्यान्तोस्तीत्यनन्तवीर्यस्तं त्वामनन्तवीर्यं तथा अ
नन्तबाहुमनन्ता बाहवो यस्य तव सत्वमनन्तबाहुस्तं त्वा अनन्त
बाहुं शशिसूर्यनेत्रं शशिसूर्यौ नेत्रे यस्य तव सः त्वं शशिसूर्यने
त्रः तं त्वां शशिसूर्यनेत्रं चन्द्रादित्यनयनं पश्यामि त्वां दीप्तहु
ताशवक्त्रं दीप्तश्चासौ हुताशश्च तद्वत् वक्त्रं यस्य तव स त्वं
दीप्तहुताशवक्त्रः तं त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वसम
स्तमिदं तपन्तं सन्तापयन्तं १९

आनन्दगिरिकृतटीका· २

भगवतो रूपं विश्वरूपाख्यं रूपमेव पुनर्विवृणोति किञ्चे
ति हुतमश्नातीति हुताशो वह्निः १९

स्वामिकृतटीका· ३

किंच अनादीति अनादिमध्यान्तमुत्पत्तिस्थितिप्रलयरहितं अनं
तवीर्यप्रभावायस्यतं अनंताबाहवोयस्यतंशशिसूर्यौ
नेत्रेयस्यतादृशंत्वांपश्यामि तथादीप्तोहुताशोमिवक्त्रेषुयस्यतंस्व
तेजसाइदंविश्वंतपंतंसंतापयंतंपश्यामि १९

पिशाचभाष्यटीका· ४

स्पष्टार्थं १९ ॥ ॥ ॥

रामानुजभाष्यटीका· ५

अनादीति अनादिमध्यान्तं आदिमध्यान्तरहितं अनन्तवीर्यं अन
वधिकातिशयवीर्यं वीर्यशब्दः प्रदर्शनार्थः अनवधिकातिशय
ज्ञानबलैश्वर्यवीर्यशक्तितेजसां निधानमित्यर्थः अनन्तबाहुम
संख्येयबाहुं सोऽपि प्रदर्शनार्थः अनन्तबाहूदरवक्त्रादिकं शशि

श्री·
गी· टी·
प

6

सूर्य्यनेत्रं शशिवत् सूर्य्यवच्च प्रसादप्रतापयुक्ते सर्व्वनेत्रं देवादीन् ।
तु कृतान् नमस्कारादि कुर्व्वाणान् प्रसादेन हि परीतान् सुरगणसादी
न् प्रतिप्रतापः रक्तोसि भीतान् दिशो द्रवन्ति सर्व्वे नमस्यन्ति च सि।
द्धसंघाः इति हि वक्ष्यते दीप्तहुताशवक्त्रं प्रदीप्तकालानलवत्संह
रणगुणवक्त्रं स्वतेजसा विश्वमिदं तपन्तं तेजः पराभिभवसामर्थ्यं
स्वकीयेन तेजसा विश्वमिदं तपन्तं त्वां पश्यामि एवं भूतं सर्व्वस्य स
ष्टारं सर्व्वाधारभूतं पूर्व्वस्य प्रशासितारं सर्व्वस्य संहर्त्तारं त्वां नाथ परि
मितगुणगणसागरं आदिमध्यान्तरहितमेवंभूतं दिव्यदेहं त्वां य।
थोपदेशं साक्षात्करोमीत्यर्थः एकस्मिन् दिव्यदेहे अनेकोदरा
दिकं कथमुपपद्यते एकस्मात् कटिप्रदेशादनन्तपरिमाणाउ
दराद्युद्गता यथोदितोदराः अनन्तयथोदिता दिव्यपादाः तत्रैकस्मि
न्नसंभवे नेत्रद्वयमिति विरोधः

अभिनवगुप्तकृतटी· ९ ॥
स्पष्टार्थं १९ ॥ ॥

किं च स्वजनमात्रहिंसाभयात् कृपाविष्टेन कालरूपपर
मेश्वरदर्शनसार्थनया
त्रैलोक्यहिंसापि मयैव
कारितेति निमन्यमानः प
श्चात्तापमनुवदत्राह
अनादीति ॥

परमार्थप्रपादीका १
न विद्यते आदिमध्यान्ता यस्य अनन्तवीर्य्यमनन्तशक्तिं अनन्ता बाह
वो यस्य शशिसूर्य्यनेत्रं सोम्यविनवृत्तमानो पूर्णो वेद सूर्य्यौ नेत्रे य
स्य यद्वा शशिसूर्य्ययोरपि नेत्रभूतं दीप्तहुताशोज्ज्वल द
प्तिवक्त्रं मुखं यस्य स्वतेजसा इदं विश्वं तपन्तं संतापयन्तं जगत्सं
हारकं हरमिव प्रहृन्तं पश्यामि १९

वनमाली टीका ८
आदिरुत्पत्तिर्मध्ये स्थितिरन्तो नाशस्तैः रहितं अनादिमध्यान्तं अ
नन्तवीर्य्यप्रभावो यस्य तं अनन्ता बाहवो यस्य तं उपलक्षणमेतत्
मुखादीनां शशिसूर्यौ नेत्रे यस्य तं यद्वा शशिवत् सूर्य्यवच्च प्रसा
दप्रतापयुक्तानि नेत्राणि यस्य तं देवादीन् भक्तान् नमस्कारादि कु
र्व्वतः प्रसादेन हि परीतान् रागसादीन् प्रति प्रतापेन रक्तोसि भी
तान् दिशो द्रवन्ति सर्व्वे नमस्यन्ति च सिद्धसंघा इति वक्ष्यति दी
प्तो हुताशो अग्निर्वक्त्रे यस्य दीप्तहुताशवद्भावक्त्रं यस्य तं स्वतेजसा
विश्वमिदं तपन्तं संतापयन्तं त्वां पश्यामि १९

कुसुमाञ्जयन्ती ९

१ ग्राह्यमथात इत्यादि नहि प्रभातामि
२ इतराम्

6

किंच अनादिमध्यान्तमिति नास्ति आदिरुत्पत्तिर्मध्यं स्थितिरन्तो विनाशो यस्य स तथा तं अनन्तवीर्य्यं अनन्तानि वीर्याणि तदुपलक्षितानि समग्रगुणशक्त्यैश्वर्याणि यस्य स तथा तं अनन्तबाहुं अनन्ता अगणिता बाहव उपलक्षिताः शिरोजठरपादादयश्चावयवा यस्य स तथा तं शशिसूर्यनेत्रं शशिसूर्य्यौ उपमानि प्रसादक्रूररूपाणि नेत्राणि यस्य स तथा तं स्वभक्तदेवादिषु प्रसन्नं नेत्रं अभक्तासुरराक्षसादिषु क्रूरं नेत्रं रक्तासिभीतानि तनोति दिशो द्रवति सर्वे नमस्यति वृद्धिं संहारं इति वक्ष्यमाणात् दीप्तहुताशवक्त्रं दीप्तहुताशोपमानि संहारानुगुणानि वक्त्राणि यस्य स तथा तं स्वतेजसा विश्वमिदं तपन्तं स्वकीयेन तेजसा पराभिभवसामर्थ्येन इदं विश्वं तपन्तं सन्तापयन्तमेवंभूतं त्वां पश्यामि अत्रानेनैव वाक्येन विस्मयज्ञानस्य विस्मयाविष्टत्वात् अनर्थ दोषाय भवति प्रमादे विस्मयहर्षे द्विस्त्रिरुक्तं न दूषणमिति वचनात् १९

मधुसूदनी टीका १९

किंच ~~[illegible]~~ आदिरुत्पत्तिः मध्यं स्थितिः अंतो विनाशः तद्रहितमनादिमध्यान्तं अनन्तवीर्यं प्रभावो यस्य तं अनन्ता बाहवो यस्य तं उपलक्षणमिदं मुखादीनामपि शशिसूर्यौ नेत्रे यस्य तं दीप्तहुताशो वक्त्रं यस्य वक्त्रेषु यस्येति वा तं स्वतेजसा विश्वमिदं तपन्तं सन्तापयन्तं त्वां पश्यामि [illegible]

१९

[illegible]री टीका ११

आदिर्मध्यं तथान्तश्च यस्य ते नास्ति कर्हिचित् अपरिच्छिन्नवीर्यमाद नन्ता यस्य बाहवः १ नेत्रे यस्येन्दुसूर्यौ प्रचण्डाग्निसमाननं स्वतेजसाखिलं विश्वं तापयन्तमिदं तथा २ त्वां पश्यामि विश्वेशमाद्यं नजगत्त्रये १९ सः

नीलकंठी टीका २२

एतदेवाह अनादीति देशतः कालतश्चादिमध्यान्तहीनत्वादनादिमध्यान्तं दीप्तो हुताशो वक्त्रे यस्येति भास्वरदेहत्वमुक्तं स्वतेजसा चैतन्यज्योतिषा इदं विश्वं विश्वरूपं तपन्तं प्रकाशयन्तं अनादित्वादिसर्वविशेषणविशिष्टं विश्वं तापकीभूतं तापयन्तं त्वां परज्योतीरूपं पश्यामि जानामि चित्रपटस्थानीयं विश्वरूपं सकलकार्यकारणात्मकमविद्यावासनोपेतं येन ज्योतिषा प्रकाशते तं देवं त्वमसीति जानामीति भावः १९

श्री॰
गी॰ टी॰
५

[illegible] आनंदीटीका

स्फुरेरोर्थः [illegible] १९॥

रामकंठीटीका

अतएव — अनंतत्वादाद्यंतमध्यरहितं अवछेदस्य हि वस्तुन आद्यादिविभागव
त्त्वमित्यर्थः जगत्प्रपंचविरचनसामर्थ्यं वीर्यमनंतं न कदाचिन्निहतं यस्य
तं तथा सर्वे ते च ज्ञानानां तन्नत क्रियासाधनभूता ये [illegible] बाहवस्य पार
मार्थिकस्यैव कर्तुः परमेश्वरस्य संभवंति न इत्यनंतबाहुत्वं तथा नेत्र
त्वा शशीरविचक्षुर्भ्यां नियतविषयप्रकाशने क्रियतं इति शशिसूर्यने
त्रत्वं तथा क्रियावञ्छिर्विविधैर्ज्ञानक्रियाविशेषैर्व्याप्तानंतो विश्वमूर्तिः
परमेश्वरस्यैवकल्पते इति तस्यैव दीप्तहुताशोग्निर्वक्त्रमिस्वकं त
था स्वतेजसा संविद्रूपेण तेजसा ज्योतिषां सर्वमिदं तपति द्योतयंतीमि
वं विधं विश्वात्मानं त्वां पश्यामीति संबंधः [illegible]
[illegible] १९॥

लासिकी [illegible]टीका

किंच — आदिमध्यावसानरहितं अपरिच्छिन्नवीर्यं अपरिच्छिन्नबाहुं शशिसू
र्यौ नेत्रे यस्य तं दीप्तहुताशो वक्त्रे यस्य तं तथेदमिदं तावत् यथार्थं विश्वं
जगत्तपंतं विद्याम्याप्रकाशयंतं एवंविधं विराजं ब्रह्म त्वामेव प्रव
रे पश्याम्युपलभे [illegible] १९॥

पंचोलीटीका

अनादीति हे भगवन् हं त्वामेवंविधं पश्यामि कथंभूतं त्वां अनादि
मध्यांतं न विद्यते आदिर्मध्यमंतो यस्य सः उत्पत्तिस्थितिविनाशर
हितमनंतवीर्यं यस्य सः अनंतवीर्यं अनंतबाहुं अनेना बाहवो यस्य
स तं शशिसूर्यौ चंद्रादित्यौ नेत्रे यस्य सः तं दीप्तहुताशवक्त्रं दीप्तहु
ताशोग्निर्वक्त्रे मुखे यस्य तं स्वतेजसा स्वकीयेन तेजसा दीप्त्या इदं स
मस्तं विश्वं तपंतं तापयंतं १९

भाषा अनुवाद

और अनादि मध्यान्त करि उत्पत्ति स्थिते लय रहित औ अन
न्त प्रभाव तथा अनन्त बाहु औ चन्द्र सूर्य है नेत्र जिस के
ऐसे तुम को हम देखते हैं और अग्नि जिस के मुख मे ज्वा
लमान है ऐसे आप अपने तेज से इस विश्व को सन्तप्त कर
ते हुये तुम को मे देखो हों १९

चौपई

आदि मध्य अंत बिन वीर्य अनंत बाहु अनंत शशी रवि नेत्र लसं
त लखों तोहि दीप्त अग्नि सम मुख को तेज दि सें निज इह ज
गत पत को १९

63

द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन ।
दिशश्च सर्वाः दृष्ट्वाद्भुतं रूपमिदं तवोग्रं
लोकत्रयं प्रव्यथितं महात्मन् २०

शाङ्करभाष्यटीका १

द्यावापृथिव्योरिति द्यावापृथिव्योरिदमन्तरं हि अन्तरिक्षं व्याप्तं त्वयैकेन विश्वरूपधरेण दिशश्च सर्वा व्याप्ताः दृष्ट्वा उपलभ्य अद्भुतं विस्मापकं रूपमिदं तव उग्रं क्रूरं लोकत्रयं लोकानां त्रयं लोकत्रयं प्रव्यथितं भीतं प्रचलितं वा हे महात्मन् अक्षुद्रस्वभाव २०

आनन्दगिरिकृतटीका २

प्रकृतभगवद्रूपस्य व्याप्तिं व्यनक्ति द्यावापृथिव्योरितीति तस्यैव भयङ्करत्वमाचष्टे दृष्ट्वेति २०

स्वामिकृतटीका ३

किंच द्यावापृथिव्योरिति द्यावापृथिव्योरिदमन्तरमन्तरिक्षं त्वयैकेन व्याप्तं दिशश्च सर्वा व्याप्ताः अद्भुतमदृष्टपूर्वं तवेदमुग्रं घोरं रूपं दृष्ट्वा लोकत्रयं प्रव्यथितमतिभीतं पश्यामीति पूर्वेणैवान्वयः २० ॥

पिशाचभाष्यटीका ४

स्पष्टार्थः २० ॥ ॥ ॥

एवंभूतंत्वांदृष्ट्वादेवादयोहंचप्रव्यथि रामानुजभाष्यटीका ५ ताभवामेत्याह ॥

द्यावेति द्युशब्दः पृथिवीशब्दश्च उभाउपरितनानामधःस्थानां च लोकानां प्रदर्शनार्थौ द्यावापृथिव्योरन्तरमवकाशः यस्मिन्नवकाशे
गी
सर्वे लोकास्तिष्ठन्ति स सर्वोऽप्यवकाशो दिशश्च सर्वास्त्वयैकेन व्याप्ताः दृष्ट्वाद्भुतं रूपमुग्रं तवेदम् अनन्तायामविस्तारमद्भुतमत्युग्रं च रूपं दृष्ट्वा लोकत्रयं प्रव्यथितं युद्धदिदृक्षयागतेषु ब्रह्मादिदेवासुरपितृगणसिद्धगन्धर्वयक्षराक्षसेषु प्रतिकूलानुकूलमध्यस्थरूपं लोकत्रयं सर्वं प्रव्यथितं अत्यन्तभीतं महात्मन् अपरिच्छेद्यमनोवृत्ते एतेषामप्यर्जुनस्येव विश्वाश्रयरूपसाक्षात्कारसाधनं दिव्यं चक्षुर्भगवता दत्तं किमर्थमिति चेत् अर्जुनाय स्वैश्वर्यं सर्वं प्रदर्शयितुमिति इद

श्री॰ गी॰ टी॰ ए॰

६५

प्रव्यथते दृष्ट्वेति २० ॥ अभिनवगुप्तकृतटी॰ ६ ॥ ॥
स्पष्टार्थो २० ॥ ॥ ॥ ॥

परमार्थप्रपाटीका॰ ७

द्यावापृथिव्योरिति द्यावापृथिव्योरन्तरमन्तरिक्षं त्वयैकेनैव व्याप्तं
तथा सर्वा दिशश्च व्याप्ताः भो महात्मन् विश्वरूप एवमेतादृशमद्भु
तं रूपं दृष्ट्वा लोकत्रयं प्रव्यथितं प्रकर्षेण संहारं यान्तमिव पश्या
मि श्रुतिरपि वाजसनेयसंहितायां परीत्य भूतानि परीत्य लोकान्
परीत्य सर्वाः प्रदिशो दिशश्च उपस्थाय प्रथमजामृतस्यात्मनात्मा
नमभिसंविवेश भाष्यं ऋतस्य सत्यस्य परब्रह्मणः प्रथमजां प्र
थमं जातं शबलत्वेनोपस्थितां तां उपस्थायाधिष्ठायात्मना स्व
रूपेण कृत्वात्मानमभितः संविवेश प्रविष्टवान् किं कृत्वा भूतानि
पृथिव्यादीनि परीत्य अभिव्याप्य लोकान् भूर्भुवः स्वरादीन् दिशः
प्रदिशश्च तिलवत् २०

वनमाली टीका॰ ८

एवमस्यापि भगवद्विग्रहस्य व्याप्तिमाह द्यावेति द्यावापृथिव्योरिदम
न्तरं हि एवं त्वयैकेन व्याप्तं दिशश्च सर्वाः व्याप्ताः दृष्ट्वाद्भुतममन्तवि
स्मयकरमिदमुग्ररूपं दुरधिगमं महातेजस्विनां तव रूपमुपलभ्य लो
कत्रयं प्रव्यथितं सत् भीतं जातं हे महात्मन् साधूनामभयप्रदायक
अणुत्वमहत्त्वाद्यनन्तपरिमाणानामावेशकत्वं लोके विरुद्धमपि
भगवत्यविमृश्यशक्त्या न विरुद्धं विचित्रशक्तिः पुरुषः पुराण इति
श्रुत्यास्मृत्या नित्यं चैवं विचित्राश्च हीति सूत्रेण च भगवत्यचिन्त्यशक्तेरु
क्तत्वात् न चास्तत्वसंसारित्वादिकमप्यविमृश्यशक्त्या समावेशयिताभि
ति वाच्यं अविरोधोपपादकैश्वर्याविरोधिनामेव समावेशाङ्गीका
रात् अज्ञत्वादीनामैश्वर्यविरोधित्वात् २०

उत्तमवैजयन्तीटीका॰ ९

अथ विश्वरूपस्य भगवतो विश्वव्याप्तिरूपत्वेनात्यन्तमद्भुतं तद्रूपमव
लोक्य सर्वे विस्मिताः सन्तः प्रव्यथिता भवन्ति तथाह त्वमपीत्याह द्यावे
ति दशभिः द्यावापृथिव्योरिति द्यावापृथिवीभ्यामुपलक्षितानामू
र्ध्वाधःस्थानां सत्यादिपातालान्तलोकानामन्तरं यच्च सर्वे पि लोका
स्तिष्ठन्ति तत्सर्वमन्तरिक्षमेकेनैव त्वया व्याप्तं तथा सर्वाः पूर्वदक्षिण

पश्चिमोत्तरादिशश्चकाराद्दग्मादिविदिशोपिव्याप्ताः तवविश्वरूपस्ये
दंनियंतावछेद्दश्यमेवउग्रभयावहं अद्भुतमदृष्टपूर्वमनेनायामवि
स्तारंरूपंविश्वकारंदृष्टोपलभ्येहे महात्मन् अपरिछिन्नवाच्यात्मो
हते यद्वा स्वभक्तानाभयकरइतः परमिदमुपसंहरस्याशयः लो
कत्रयंलोकानांस्वर्गादीनांत्रयंविपरीमिते यद्वा लोकानांमित्रामि
त्रोदासीनानांत्रयमव्यथितमस्येतपीतेदृष्टोसनेनात्र्जुनस्यैवस्व
रामस्वरगंधर्वादीनामपिभगवदेतर्द्दिव्यदृष्टित्वसूचितं २०

प्रकृतस्यभगवद्रूपस्यव्याप्तिमाह॥ मधुसूदनीटीका २०

द्यावापृथिव्योरिदमंतरमंतरिक्षं हि एवं त्वयैवैकेन व्याप्तं दिश
श्चसर्वाःव्याप्ताः दृष्ट्वाद्भुतमस्येतविस्मयकरमिदमुग्रंउग्रयिगमे
महातेजस्विनानवरूपमुपलभ्यलोकत्रयंप्रव्यथितंप्रसंतेभी
तेजाते हे महात्मन् साधूनामभयदायकइतः परमिदमुपसं
हरइत्यभिप्रायः [illegible]
[illegible] २०

महानंदी टीका ११

विश्वरूपमत्ताव्याप्तं द्यावाभूम्योर्यदंतरं दिशः सर्वास्त्वयैकेनव्या
प्तास्तेरूपमीदृशं १ अतिविस्मापकंदृष्ट्वा महातेजस्वतत्तवउग्र
रूपमिदंलोकत्रयंभीतमतीवच २ साधूनामभयंदेहि [illegible]
महात्मनयाहरे २०

नीलकंठी टीका १२

एवंस्वयंकृतविश्वरूपदर्शनेनकृतकृत्योभूत्वातदुपसंहारमभि
प्रेत्यस्तौति द्यावापृथिव्योरिति हे महात्मन् हि यस्मात्त्वयाए
केनइदंद्यावापृथिव्योरंतरंमध्यंसर्वाःदिशश्चव्याप्ताः अतस्त्वे
दंअद्भुतंउग्रंरूपंदृष्ट्वा लोकत्रयंप्रकर्षेणव्यथितं अतः परमिद
मुपसंहरेत्यभिप्रायः २०

आनंदीटीका

[illegible] स्य। सर्वसर्वव्यापकंपरमेश्वरस्वरूपंनिरूप्यजगत्संहारकंघोरं
कालरूपंदृष्ट्वाह २०॥

रामकंठीटीका

अथसर्वशक्तेःपरमेश्वरस्यशाक्तनसैन्यसं हारप्रसक्तत्वात्त्वशक्तियुक्तत्वाद्घोरत्वविशि
ष्टंरूपंवर्णयति यस्मान्महतारूपेणगगनभूम्यन्तरालेसर्वाश्चककुभस्त्वयैकेनव्याप्ताः
तमाह॥ दूरितास्त्वदिदमीदृशंघोरंरूपंदृष्ट्वालोकत्रयंत्रैलोक्यनिवासितद

गी· र्शनयोग्यदेवादिरूपंप्रव्यथितंप्रकर्षेणभीतमेवंमहात्मन्नितिरूपम
टी· प· दृष्ट्वापेतमामंत्रणं [illegible]
[illegible] ॥

65

लासिकी टीका

तथा द्यावापृथिव्योरिदमंतरमंतरिक्षम् तथासर्वादिशश्चत्वयैकेनेश्वरे
णाविराड्रूपमापन्नेनव्याप्तम् यदुक्तम् यस्याग्निरास्यं द्यौर्मूर्धा यं वना
भिश्चरणौक्षितिः सूर्यश्चक्षुर्दिशः श्रोत्रेतस्मैलोकात्मनेनमः ए
वमिहैकस्थमितिविपायाप्रतिज्ञातंभगवतोपवर्ण्य अधुनायस्त्वा
न्यद्द्रष्टुमिच्छसीतिप्रतिज्ञातंतदेवसर्वशक्तेःपरमेश्वरस्य जगत्सं
हारसमर्थंकालाख्यंघोरंरूपमनुभूतचरंवर्णयितुमाह द्
ष्ट्वेति अद्भुतंविस्मापकमिदंदृष्टपूर्वमपि अथनापिपुनःस्फुर
दिवतवघोरंरूपंदृष्ट्वामानात्कस्य लोकत्रयंप्रव्यथितमतिभीतंप
श्यामीतिपूर्वेणैवान्वयः हेमहात्मन्विश्वरूप [illegible] २॰ ॥ ॥

पंचोलीटीका

प्रकृतस्यभगवद्रूपस्यप्राप्तिमाह द्यावेतिहेमहात्मन्हियस्मा
त् द्यावापृथिव्योरिदमंतरंअंतरिक्षंमध्यभागःत्वयाएकेनवि
श्वरूपेणव्याप्तंतथासर्वादिशश्चव्याप्तास्तवइदमुग्रंक्रूरंअद्भुतं
विस्मयकरंरूपंदृष्ट्वालोकत्रयंप्रव्यथितंभीतंचालितंच २॰

रत्नावीरससिद्धान्तिनी॥

अथभगवतोघोरतरंरूपंवर्णयति द्यावेति द्यावापृथिव्योरिदं
यदंतरमवकाशस्तदेवत्वयैकेनसता सर्वतःकेवलेनव्याप्तम
पितुसर्वाश्चदिशोवकाशमर्यादा अप्येकत्वेनैवव्याप्ताइतिसर्व
व्याप्यव्यापकत्वलक्षणविशिष्टमिदमद्भुतमलौकिकचमत्का
रसंपन्नं तवोग्रंघोरतरमचिंतितदृष्टमतएवातिदृष्टमपिरूपंदृ
ष्ट्वालोकत्रयंप्रव्यथितंप्रकर्षेणभयचलितंभवतीत्यर्थः २॰॥

किंचानादिमध्यांतमनवच्छिन्नमहिमत्वादनंतवीर्यमनं
तमविनाशिवीर्यं विश्वबीजात्वेसामर्थ्यंयस्यशक्तिमत्वात्तथानं
तबाहुमनंतामर्यादरहिताबाहवोविश्वरचनात्मका यस्यतमनं
तबाहुं शशिसूर्यनेत्रं ताभ्यामेव विनादस्वरूपस्यचक्षुष्मत्वात्
दीप्तहुताशवक्त्रं दीप्तहुताशः प्रद्दुप्तवैश्वानरस्तद्वत्प्रदीप्तंवक्त्रंय
स्यतं तथेदंदेहेंद्रियादिसंघातात्मकंविश्वरूपंयत्तदपि स्वतेजसा
स्वप्रकाशेनतपंतं प्रकाशयंतमेतादृक्स्वरूपेणाविश्वात्मानंत्वामि
दानींपश्यामि साक्षात्करोमीत्यर्थः १९॥

मधुभाष्य

१९॥

65/2

अस्मिन्द्यावापृथिवी अंतरेव समाहिते उभावग्निश्च वायु
श्च सूर्याचंद्रमसावुभाविति हिरण्यस्य गर्भं जगतोभिमर्व
मन्नपालिसृष्ट्यादिकरणाक्षमात्पत्रमिति च भागवते
नवैनरश्चुके अचिंत्यशक्तिर्वादी चवस्य अचिंत्याखिलत्वे
भावाननतांस्तर्केण योजयेत् इति च श्रीविष्णुपुराणे नेवा
तर्केणमतिरापनेयेति च श्रुतिः अतिप्रसंगस्तु महातात्प
र्यवशाद्वेन्वलाद्बापनेयः नहि द्युटवकश्चिदपि पदा
र्थो न दृष्ट इत्येतावता मया न दृष्टः स निराक्रियते केभवि
त्यदार्थश्रुवाक्यव्यवस्था अचिंत्यशक्तिर्वाभावादंगीक्रियते
गुणाः श्रुताः सविकल्पाश्चदेवे संत्यश्रुता अपि नैवाचमाका
चिंत्या अचिंत्या श्रुतयैव दोषाः श्रुताश्रुतानोनेहि न यावती
ताः एवं चैत्यश्रुताश्रुतानां गुणागुणानां वक्तमाद्यवस्थे
ति ज्ञावा तत्त्विलेष्ट उपाचारत्वपरिहाराय तत्र मध्यमिति
अन्यथाः यतो भावेनैव तत्सिद्धेः विश्वरूपः पूर्णरूपः स
विश्वरूपोऽन्यन्नरूपोयतोयं सोऽनंतो नहि नाशोऽस्ति तस्येति
मुंडित्याश्वाद्वोवा अनलाके श्रुतिःऽमितश्चांका मयाकरो
ति अप्रमेयमिति प्राप्तिसूर्यनेत्रमित्यप्ययक तदित्यादि
वत् तदंगजाः सर्वेऽपरादयोपि तस्मात् दंगोत्य विभिन्नता
स्त्वन्ह वेदाविलेष्ट चंद्रमा मनसो जात श्चक्षोः सूर्यो अजा
यतेति च बहुरूपत्वात् बहुरूपत्वं च तेषाश्रुतः मातापित्रो
रंतरंगः सएव एकरूपेणावान्यैः सर्वगतः सएक इति
वारुणश्रुतेः एकेनैव रूपेण द्यावापृथिव्योरंतरव्याप्तो भ
वति यएवमेपार्श्वरूपाणि इति बहूनि रूपाणि प्रतिस्तानि
मातापितरौ पृथिवीद्यावौ मनो मता पृथिवीउभौ तो यात् म
धुचौ रत्नानः पितेत्यादिप्रयोगात् नतु नियमतो भयमदंत

स्वरूपं नारूढस्य तद्भावात् केषांचित्तथा दर्शयति भगवा
न्पुर्यंतिके वित्तस्य रूपं दृष्टौ विभेति कश्चिद्दृश्यसे त्सर्वं र
मिरिति वा रूपणमात्रवाच्यो न तत्सर्वं पश्यति अदृष्टपि
तान्निरूप्यमेयं दृश्यस्तथा प्रतिभाति तथा च गीतासु अखिले
दृष्टदेवं मोदमानाश्च दृष्टपूर्वं तदृश्याद्विभ्यतो हर्षवते प
श्यतीत्यन्यत्तत्त्वं तद्बुद्ध्वाभ्यस्तु तस्मिन्नेवैते मनसो गतत्वा
दिति यत्तांतरज्ञानार्थमेव कोऽभवादिति पृच्छति यथा क
श्चित्किंचिन्नामादिकं जानन्नपि जानाति स नानार्थं पृच्छति
कस्त्वमिति यदितदेवं न जानातीति तद्विस्वाविति संबोधनं
स्यात् त्वमसत्यमित्यादिव ॥२०॥

65/3

भाषा अनुवाद

और हे महात्मन् स्वर्ग औ पृथिवी तथा अन्तरिक्ष और सकल दिशा एक आपसे व्याप्त हैं सो यह उग्र रूप आपका देखिके त्रैलोक्य भय खाता है २०

चौपई

भूमि अकाश होइ अभिअंतर एक तोसें सब व्याप दिशांतर
लखि अपूर्व रूप तव एहा हरि भय दरवी लोकत्रय जेहा २०

66

अमीहित्वांसुरसंघाविशन्ति केचिद्भीताःप्रा
ञ्जलयोगृणन्ति स्वस्तीत्युक्त्वामहर्षि
सिद्धसंघा स्तुवन्ति त्वां स्तुतिभिःपुष्कलाभिः
२१

शाङ्करभाष्यटीका॰ १

अथाधुना पुरा यद्वा जयेम यदि वा नो जयेयुरिति अर्जुनस्य सं
शयआसीत् तन्निर्णयाय पाण्डवजयमैकान्तिकं दर्शयामीति
प्रवृत्तो भगवान् तं पश्यन्नाह अमी हीति किञ्च अमीहि युध्यमा
नायोधारस्त्वा सुरसंघा येऽत्र भूभारावतारायावतीर्णा वस्वादिदे
वसंघा मनुष्यसंस्थानास्त्वां विशन्ति प्रविशन्तो दृश्यन्ते तत्र केचिद्भी
ताः प्राञ्जलयः सन्तो गृणन्ति स्तुवन्ति त्वामन्ये पलायनेप्यशक्ताः
सन्तो युद्धे प्रत्युपस्थिते उत्पातादिनिमित्तान्युपलक्ष्य स्वस्त्यस्तु जग
त इत्युक्त्वा महर्षिसिद्धसंघाः महर्षीणाञ्च सिद्धानाञ्च संघाः स्तु
वन्ति त्वां स्तुतिभिः पुष्कलाभिः सम्पूर्णाभिः २१

आनन्दगिरिकृतटीका॰ २

अमीहीत्यादि समनन्तरग्रन्थस्य तात्पर्यमाह अथेति तं भगव
न्तं पाण्डवजयमैकान्तिकं दर्शयन्तं पश्यन्नर्जुनोऽब्रवीदित्याह तं
पश्यन्निति विश्वरूपस्यैव प्रपञ्चनार्थमनन्तरग्रन्थजातमिति द
र्शयति किञ्चेति अमरसंघा इति पदं स्थित्वा भूभारभूता योध
नादयस्त्वां विशन्तीत्यपि च वक्तव्यं उभयोरपि सेनयोरवस्थिते
षु योद्धुकामेष्ववान्तरविशेषमाह अत्रेति समरभूमौ समागतानां
द्रष्टुकामानां नारदप्रभृतीनां विश्वविनाशमाशङ्कमानानां तं प
रिजिहीर्षितां स्तुतिपदेषु भगवद्विषयेषु प्रवृत्तिप्रकारं दर्शयति
युद्धेति २१

स्वामिकृतटीका॰ ३

किंच अमीहीति अमीसुरसंघाभीताःसंतस्त्वांविशंतिशरणंप्रविश
ति तेषांमध्येकेचिदतिभीताद्दूरतएवस्थिताःकृतसंपुटकरयुग
लाःसंतोगृणंतिजयजयरक्षरक्षेतिप्रार्थयंते स्पष्टमन्यत् किंच
२१

पिशाचभाष्यटीका॰ ४

स्पष्टार्थं २१

रामानुजभाष्यटीका॰ ५

अमीहीति अमीसुर संघाउत्कृष्टांविश्वाश्रयमवलोक्यहृष्ट
मनसस्त्वत्समीपंविशंतितेष्वेवकेचिदत्यद्भुतमत्युग्रमाकारमवलो
क्यभीताःप्रांजलयस्त्वदनुगुणास्तुतिरूपाणिवाक्यानिगृणंतिउ
च्चारयंतिअपरेमहर्षिसंघाःपरावरतत्त्वयाथात्म्यविदःस्वस्तीत्यु॰
क्त्वापुष्कलाभिर्भगवदनुरूपाभिस्तुतिभिःस्तुवंति २१

अभिनवगुप्तकृतटीका ४

स्पष्टार्थं २१ ॥ ॥ ॥

परमार्थप्रपाटीका॰ २

तदेवाह अमीहीति सुरसंघादेवसमूहास्त्वामतिभीषणंदृष्ट्वा
ऽतः परंक्वगंतव्यमितिव्याकुलचित्तास्त्वामेव प्रविशंति तथापि
भीताःसंतःप्रबद्धमशकाःकेचित्स्वबद्धांजलिपुटाअस्मान् रक्षरक्षे ९॰
गृ॰ तिसकरुणंगृणंति तथामहर्षयश्चसिद्धसंघागंधर्वचारणादय
स्त्वांत्रिलोकीप्रभुमवास्वस्तीत्याशीर्वचनमुक्त्वापुष्कलाभिर्दीर्घा॰
भिःस्तुतिभिःस्तुवंति एतद्दर्शनोपसंसर्गमात्रे तंवोदस्ममृतीषह
वसोर्मंदानमंधसः अभिवत्सं न स्वसरेषुधेनव इंद्रंगीर्भिर्नवा
महइति भाष्ये नोधाऋषिःइंद्रंपरमात्मानंस्तौति हेऋत्विग्यज
मा ना दस्मंदर्शनीयंऋतीषहंऋतीषाबाधकानांतेषामभिभविता
रं पुनःकीदृशंवसोर्वसुःवसवासपितारमाह्लादके तथाअंधसः
सोमलक्षणस्यान्नस्यपानेनमंदानंमोदमानंतादृशमिंद्रंगीर्भिः
स्तुतिलक्षणाभिर्वाग्भिरभिनवामहेअभिष्टुमः अभितःप्राह्वयामः
कुत्रस्वसरेषुदिवसेषुवपमाभिष्टुमः तत्रदृष्टांतःवत्सं यथानवप्र
सूतिकाधेनवःस्वसरेषु स्वगृहेषुसंनेप्रीपंतेगावोऽत्रेतिस्वसराणिगो
ष्ठानितेषुवत्समभिलक्ष्यप्राह्वयंतितद्वत्परमेश्वरंत्वामित्यर्थः॥ २१

वनमाली टीका॰ ८

अधुनाभूभारावतरणमात्मनःप्रकटयंतंभगवंतंपश्यन्नाह अमी
हीतिअमीहिसुरसंघावस्वादिदेवगणाभूभारावतारार्थं मनुष्य॰
रूपेणावतीर्णायुध्यमानाःसंतस्त्वां त्वांविशंतिप्रविशंतोदृश्यंते
एवमसुरसंघाइतिपदच्छेदेनभूभारभूतादुर्योधनादयस्त्वांविशं

नीस्तुवन्ति। एवमुभयोरपि सेनयोः केचिद्भीताः पलायनेष्वशक्ताः सं
न्तः प्राञ्जलयो गृणन्ति स्तुवन्ति त्वां। एवं प्रत्युपस्थिते युद्धे उत्पातादिनि
मित्तान्युपलक्ष्य स्वस्त्यस्तु सर्वस्य जगत इत्युक्त्वा महर्षिसिद्धसंघा नारदप्र
भृतयो युद्धदर्शनार्थमागता विश्वविनाशपरिहाराय स्तुवन्ति त्वां स्तुति
भिर्गुणोत्कर्षप्रतिपादिकाभिः पुष्कलाभिः परिपूर्णाभिः २१

इतिमद्वैजयन्तीटीका ॥

भूभारसंहरणार्थमवतीर्णं विश्वाश्रयं भगवन्तमवलोक्य सभयः सन्नाह १
अमी हीति। अमी ये युद्धदिदृक्षयागताः स्वस्वलोक एव स्थिता वा भगव
त्स्वरूपसत्ताया पृथिव्यादिमकप्रकारेण सर्वलोकव्यापित्वात् सुरसं
घा वसिष्ठेन्द्रादिदेवसमूहाः असुरसंघा इति पदच्छेदे मरुद्वस्वादिप्र
भृतिका सुरगणाः विशन्ति नाम अनन्तवादयस्त्वां सर्वोत्कृष्टं विश्वाश्र
यमूर्तिं त्वामवलोक्य हि हर्षमनसः ... स्तो विशन्ति त्वच्छरणं प्रविश
न्ति केचित्तेषां मध्ये त्वत्स्वरूपमहत्तिकारणानभिज्ञाः भीताः अत एव वि
त्वा श्वप्रलयो भवतीति संसकम्पभययुक्ताः पलायनेष्वनवाप्यावसराः
प्राञ्जलयः कृतसंपुटकरयुगलाः सन्तो गृणन्ति पाहि पाहि प्रभो विश्व
मिति प्रार्थयन्त इत्युच्चारयन्ति विश्वविनष्टनिमित्तान्यवलोक्य सर्वस्य
जगतः स्वस्त्यस्त्वित्युक्त्वा महर्षिसिद्धसंघाः महर्षयो भृग्वादयो देवर्षिब्रह्मर्षि
राजर्ष्यादयः सिद्धा ये च धर्मपुत्रकपिलासुरवोढुपञ्चशिखादयस्तेषां
महर्षिसिद्धानां संघाः समूहास्ते पुष्कलाभिः परिपूर्णाभिः स्तुतिभि
र्भगवद्रूपगुणोत्कर्षाभिर्वाग्भिस्त्वां विश्वाश्रयं स्तुवन्ति २१

अधुना भूभारसंहारकारित्वमात्मनः मधुसूदनी टीका ॥ प्रकटयन्तं भगवन्तं पश्यन्नाह ॥

अमी हि त्वां सुरसंघा वस्वादिदेवगणाः भूभारावतारार्थं मनुष्यरूपेणा
वतीर्णाः युध्यमानाः सन्तः त्वां विशन्ति प्रविशन्तो दृश्यन्ते एवमसुरप्र
कारेण असुरसंघा इति पदच्छेदेन भूभारभूता दुर्योधनादयः त्वां वि
शन्तीत्यपि वक्तव्यं एवमुभयोरपि सेनयोः केचिद्भीताः पलायनेष्व
शक्ताः सन्तः प्राञ्जलयो गृणन्ति स्तुवन्ति त्वां एवं प्रत्युपस्थिते युद्धे उत्पा
तादिनिमित्तान्युपलक्ष्य स्वस्त्यस्तु सर्वस्य जगत इत्युक्त्वा महर्षिसिद्ध
संघाः नारदप्रभृतयो युद्धदर्शनार्थमागताः विश्वविनाशप
रिहाराय स्तुवन्ति त्वां स्तुतिभिर्गुणोत्कर्षप्रतिपादिकाभिः पु
ष्कलाभिः [illegible] २१

सदानन्दी टीका ॥ ११

अथभूभारसंहारकारित्वेस्वात्मनःपरंरूपमकटयंतंश्रीभगवंतमु
वाचह १ अर्वोभगवतावतार्थंदेवसंघाःसहस्रशः त्वद्रूपेणावतीर्णा
मेमुच्यमानाविशंतिते २ तामेवाहसुरसंघाभुवंत्यौयनमुखोत्पाः
दर्शयंतेप्रविशंतोत्रभीताःप्रांजलयोविभुंस्तुवंतिस्वापरेशकाःसंतो
पत्रपलायने असमर्था इतिनिमित्तानिमुपलभ्यमहारणे स्वस्त्यस्तु
सर्वभूतेभ्यइत्युक्त्वाथपुनःपुनःमहर्षीणांचसिद्धानांसमूहात्वांस्तु
वंतिच स्तुतिभिःपरिपूर्णाभिर्गुणैरैश्वर्यबोधकैः २१

नीलकंठी टीका: १२

अथामेवाह अमीति हियतःअमीत्वात्वांअसुरसंघाःअसुरांशाः
दुर्योधनादयःसोपतेगाःपावकमिवअदृष्टप्रेरिताःविशंतिमर
णायमर्थः केचिद्भीताःप्रांजलयोवद्धांजलयोगृणंतिस्तुवंति २१

आनंदीटीका उपक्रमे २१ लोकत्रयस्यव्यथामेवाह॥

तेषांदेवयोधानांतथाविधरूपदर्शनभ रामकंठीटीका येत्पत्राद्दुःखाःप्रतिपादयितुमाह॥
अमीयस्मात्वांउज्ज्वलयायाविष्णुतदाकृणाकारंशक्रादिदेवसमूहाविशं
तितत्रैवलीयंतेकेचिद्भीताःसंत्रस्ताःसंतोविरचितकरपुटाःगृणंति
स्तुतीःपठंति अत्रत्रमहर्षिसंघामुनिप्रवरास्यार्थाजगतःक्षेमायस्वस्ति
इत्युच्चार्यपुष्कलाभिर्महार्थाभिस्तात्त्ववहाभिःस्तुतिभिस्तत्वविरिता
दीरयोक्तात्त्वंस्तुवंतिप्रशंसंति किंच २१

लासिकी [illegible]टीका

तथाहि अमीअत्यंतंभासमानाःसुरसंघाःसमाधाननयनात्त्वांविशंतिसमा
वेशेनात्मसादयति तन्मध्येपिकेचिद्भीताःसंतःप्रांजलयोवद्धांजलय
स्त्वांकालरूपंगृणंति जयजयरक्षरक्षेतिप्रार्थयंते तथामहर्षीणां
नारदादीनांसिद्धानांकपिलादीनांचसमूहाः स्वस्त्यस्तुजगत इति उ
क्त्वापुष्कलाभिःश्रेष्ठाभिःस्तुतिभिस्त्वत्सुरितोदीरयोगौस्त्वांप्रशंसंति
२१

पंचोलीटीका

इदानींपूर्वयदिवाजयेमयदिवानोजयेयुरितिअर्जुनस्यजयाजयसं
शयविषयवचनंतत्रनिर्णयायपांडवेभ्योपेक्षजयंदर्शयंतंभगव

तं पश्यन्नर्जुन आह अमी हीति हि यस्मादमी युध्यमानाः योधाः
सुरसंघा वस्वादिसमूहा भूभारावतारायमनुष्यरूपेणावतीर्णाः
त्वां विशंति त्वयि प्रविशंतो दृश्यंते तेषां मध्ये केचिद्भीताः प्रांजलयो
गृणंति महर्षिसिद्धसंघाः महर्षीणां भृग्वादीनां सिद्धानां कपिला
दीनां संघाः समूहा उत्पातादिनिमित्तान्युपलक्ष्य जगतो विश्वस्य
कल्याणप्रसवः स्वस्तीत्युक्त्वा पुष्कलाभिः संपूर्णाभिस्त्वद्गुणकी
र्तनलक्षणाभिः स्तुतिभिः त्वां स्तुवंति २१

रणवीरसमिद्बोधिनी ॥

अथ भगवतो घोररूपस्य दैवीं स्तुतिं विवक्षोरर्जुनस्य प्रार्थनामाह
अमीति अमी सुरसंघा इंद्रादयोपि द्विषाद्वोग्रप्रसिद्धे एतद्घोरतरं
रूपं दृष्ट्वा त्वां विशंति त्वत्तेजसि प्रविशंतो दृश्यंते तत्रैके चित्त्रस्ता
भीताः प्रांजलयः पलायनेसमर्थत्वात्त्वामेव शरणंति स्तुवंति त
था महर्षयः सिद्धसंघाश्चैतद्घोरतररूपदर्शनेन भीता इव जग
तोर्थे स्वस्तीति स्वस्त्ययनमेकोच्चारयित्वेति स्वस्त्ययनपूर्वाभिः
पुष्कलाभिः संपूर्णाभिः स्तुत्यार्थप्रतिपादिकाभिस्त्वां स्तुवंति स्तुत
स्वरूपलक्षणानि प्रतिपादयंतीति भावः २१ ॥

69

भाषा अनुवाद

और ये सम्पूर्ण देवता भय पाय तुमारे शरणागत हैं और कोई अति भीत होय दूर खडे कर जोडे जय जय रत रत पुकार प्रार्थना करते हैं और महर्षि तथा सिद्ध संघ तुम को देखते स्वस्ति वचन उचारते हुये संपूर्ण स्तुति से स्तुति करते हैं २८

चौपाई

सुरसमूह यह तोहि प्रवेसें कोइक भसित कर जोड विनोसें कहें
स्वस्ति महाऋषि सिद्धसमूहा स्तुतहिं तोहि सम स्तुति कर जूहा
२९॥

70

6.

रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ
मरुतश्चोष्मपाश्च गन्धर्वयक्षासुरसिद्धसं
घा वीक्षन्ते त्वां विस्मिताश्चैव सर्वे २२

शांकरभाष्यटीका १

किं चान्यत् रुद्रेति रुद्रादित्या वसवो ये च साध्या रुद्रादयो गणाः
विश्वेऽश्विनौ विश्वेदेवाः अश्विनौ च देवौ मरुतश्च वायव ऊष्मपा
श्च पितरो गन्धर्वयक्षासुरसिद्धसंघाः गन्धर्वा हाहाहूहूप्रभृतयो
यक्षाः कुबेरप्रभृतयः असुरा विरोचनप्रभृतयः सिद्धाः कपिला
दयस्तेषां संघाः गन्धर्वयक्षासुरसिद्धसंघास्ते वीक्षन्ते पश्यन्ति
त्वां त्वां विस्मिताः विस्मयमापन्नाः सन्तस्त एव सर्वे २२

आनन्दगिरिकृतटीका २

दृश्यमानस्य भगवद्रूपस्य विस्मयकरत्वे हेत्वन्तरमाह किं चेति
त एवोक्ता रुद्रादयः सर्वे विस्मयमापन्नास्त्वां पश्यन्तीति सम्ब
न्धः २२

स्वामिकृतटीका ३

रुद्रेति रुद्राश्चादित्याश्च वसवश्च ये च साध्या नाम देवा विश्वेदेवाश्च अ
श्विनौ देवौ मरुतश्च मरुद्गणाः ऊष्माणं पिबन्तीति ऊष्मपाः पित
रः ऊष्मभागा हि पितर इति श्रुतेः स्मृतिश्च यावदुष्णं भवत्यन्नं या
वदश्नन्ति वाग्यताः पितरस्तावदश्नन्ति यावन्नोक्ता हविर्गुणा इति
यक्षा गन्धर्वाश्चासुराश्च विरोचनादयः सिद्धानां संघाश्चेते सर्वेऽप
पि विस्मिताः सन्तस्त्वां वीक्षन्त इत्यन्वयः २२

पैशाचभाष्यटीका ४

रुद्रादित्येति विश्वे हि विश्वेदेवाः ऊष्मपाः पितरः २२

रामानुजभाष्यटीका ५

रुद्रेति ऊष्मपाः पितरः ऊष्मभागा हि पितर इति श्रुतेः एते सर्वे
विस्मयमापन्नास्त्वां वीक्षन्ते २२

अभिनवगुप्तकृतटीका ६

स्पष्टार्थो २२

श्री॰ अथकेचनविचकितत्वेनस्तो परमार्थप्रपाटीका ७ नभस्पृशत्वात्सूक्ष्मीतश्चुरित्याह ॥
गी॰टी॰ रुद्रादित्या इति रुद्राएकादश आदित्याद्वादश वसवोऽष्टौ ये च साध्या
पे विश्वेदेवा अश्विनौ मरुद्गणाः ऊष्मपा इति ते ऊष्मपाः पितरः
[illegible]: गंधर्वयक्षासुरसिद्धसंघाश्च तद्दर्शनाद्विस्मिताः सं
न्तो वीक्षन्ते त्वां लोकमवलोकनस्थिताः [illegible]
[illegible]
[illegible] २२

वनमाली टीका॰ ८

रुद्राश्चादित्याश्च वसवो ये च साध्या नाम देवगणा विश्वेत्स्य विभ
क्तिकविश्वदेवशब्दाभ्यामुच्यमाना देवगणा अश्विनौ द्वौ मरुत
एकोनपंचाशद्देवगणाः ऊष्मपाश्च पितरः गंधर्वाणां यक्षाणा
मसुराणां सिद्धानां संघाः समूहा वीक्षंते पश्यंति त्वां तादृशाद्
तद्दर्शनात्ते सर्वे सर्व एव विस्मिताश्च विस्मयमलौकिकचम
त्कारविशेषमापद्यंते च २२

कश्यपवेनपतीटीका॰ ९

किंच रुद्रादित्याः वसवः इति ये रुद्रा एकादश रुद्रगणा आदित्या द्वाद
शसुरगणाः वसवोऽष्टौ वसुगणा ये च साध्याः साध्या नाम देवगणाः
ये च विश्वे सम विभक्तिकविश्वेदेवशब्दाभ्यामुच्यमाना देवगणाः
ये चाश्विनौ नाम स्वर्दस्रौ मरुता ये चैकोनपंचाशद्देवगणाः ये चो॰
ष्मपाः पितृगणा ऊष्मभागा हि पितर इति श्रुतेः यावदुष्णं भवेदन्नं
तावदश्नंति वाग्यताः पितरस्तावदश्नंति यावन्नोक्ता हविर्गुणा इत्या
दिस्मृतेश्च गंधर्वयक्षासुरसिद्धसंघाः ये च गंधर्वाणां यक्षाणामसु॰
राणां विरोचनादीनां सिद्धानां संघाः समूहा एते सर्वे एव वीक्षंते
पश्यंति च तु न स्तदाश्चर्यस्य दर्शनाद्विस्मिता विस्मयमलौकिकचमत्का
रविशेषमापद्यंते २२

मधुसूदनी टीका॰ १०

किंचान्यत् ॥ रुद्राश्चादित्याश्च वसवश्च ये च साध्या नाम देवगणाः विश्वेत्स्य वि
भक्तिकविश्वदेवशब्दाभ्यामुच्यमान देवगणाः अश्विनौ नासत्य
दस्रौ मरुतः एकोनपंचाशद्देवगणाः ऊष्मपाश्च पितरः गंधर्वा
णां यक्षाणामसुराणां सिद्धानां च जातिभेदानां संघाः समूहाः वी॰
क्षंते पश्यंति त्वां तादृशाद् तद्दर्शनात्ते सर्वे एव विस्मिताश्च विस्म

यमलौकिकचमत्कारविशेषमापद्यंते [illegible]
[illegible] २२

सदानंदीटीका: २२

रुद्रावसवश्चादित्याः साध्याविश्वेश्विनौतथामरुतः पितरश्चैतेगं
धर्वाणांसमूहकाः १ यक्षाणामसुराणांचसिद्धानांयेव्रजास्तथा
वयतेविस्मिताः संतस्त्वद्दर्शनाद्भुतदर्शने २ पश्यंतित्वामदरू
तेविस्वरूपमलौकिकं अलौकिकचमत्कारमापद्यंतेविलाय
पि २२

नीलकंठीटीका: २२

किंच येत्वदनुगृहीताः रुद्रादयस्तेपिविस्मिताः संतः सर्वेत्वांवी
क्षंतेतइत्याह रुद्रादित्याइति साध्याः विश्वेचदेवगणविशेषाः रुद्रा
दिसवत्सैयो ऊष्मपाः पितरः गंधर्वाणांयक्षाणामसुराणांसि
द्धानांजातिभेदानांसंघाः समूहाः शेषंस्पष्टं २२

आनंदीटीका

ऊष्मपाः पितरः अद्भुतदर्शनाद्विस्मितास्साश्चर्यास्त्वत्वाम [illegible]
[illegible] २२

रामकंठीटीका

किंच रुद्रादयोदेवविशेषाव्याख्याताः ऊष्मपाख्याः पितरः गंधर्वादयः प्रसि
द्धाएतेसर्वेदेवयोनिनाज्ञानविशेषसंभवेसतित्वांवीक्षंतेचोत्कटद्भुतंवेद्द
यस्य [illegible]
[illegible] २२

लासिकी वसमगमीटीका

किंच रुद्राश्चादित्याश्चवसवश्चयेचसाध्यानामदेवाविश्वेदेवामरुतोप
कोनपंचाशद्देवगणा ऊष्मपाश्चपितरः गंधर्वाश्चयक्षाश्चास
राश्चविरोचनादयः सिद्धानांसंघाश्चतामीश्वरंकालरूपंवीक्षंतेसाक्षा
त्कुर्वंतितथातेसर्वएवविस्मिताश्चयोगोपलब्धाभूतविस्मयमा
पन्नाश्च [illegible] २२॥

पंचोलीटीका

रुद्राःशंकरप्रभृतयः एकादश आदित्याद्वादश वसवोष्टौ साध्यना
मदेवाद्वादश विश्वेदेवाः त्रयोदश अश्विनौद्वौ मरुत एकोनपंचाश
त् ऊष्माणं पिबंति ते ऊष्मपाः पितरः गंधर्वाः हाहाहूहू प्रभृतयः य
क्षाः कुबेरप्रभृतयः असुरा विरोचनप्रभृतयः सिद्धाः कपिलादयः
तेषां संघाः विस्मयाः पन्नाः सर्वेत्वां स्तुवंति २२

रसावीरसमिद्बोधिनी॥

किंच येचादित्यादयो गणाः येच साध्या वातरशाना ऋषयोऽ
पत्योन्येच विश्वेदेवाः कव्यपतयो अश्विनौ मरुतश्च मरुन्नामा
नो देवगणाः ऊष्मपाये ऊष्ममूष्ममहितमन्नं पिबंतीत्यूष्मपाः
तन्नामानः पितरस्तेच तथाच गंधर्वयक्षासुरसिद्धसंघाः एते
सर्वे एतद्घोररूपं दृष्ट्वा विस्मितास्त्वां वीक्ष्यंते त्वां प्रति निर्दिष्टं दर्शयंतो
निस्पंदाः स्थिता इव दृश्यंते इति महदाश्चर्यमिति २२॥

मधुभाष्य

२२॥

भाषा अनुवाद

और रुद्रगण आदित्यगण वसुगण औ साध्यगण तथा विश्वे देवा अश्विनीकुमार औ मरुतगण पितृगण उष्ण हव्य पान करनेवाले पितृगण धर्मशास्त्र औ स्मृति मे ऐसे कहा है कि पितृगण तब तक मौन भोजन करते जब तक अन्न उष्ण है और यावत् पितृ उद्देश करि दिये हुये अन्नका गुण वर्णन रूप मधु वातादि वैदिक मन्त्र पाठ समाप्त न होय तावत् पितर अन्न खाते हैं और गन्धर्वगण यक्षगण और विरोचन प्रभृति असुरगण औ सिद्धगण ये सकल विस्मययुक्त होके तुम को खड़े देखते हैं २२

चौपई

रुद्र रवि वसु साध्य द्विजो दे विश्वे अश्विन मरुत पितृ सो हैं
गंधरव यक्ष असुर सिद्ध जाता तोही लखि सब विस्मय जाता २२

रूपंमहत्ते बहुवक्त्रनेत्रं महावाहो बहुवा
हूरुपादं बहूदरंबहुदंष्ट्राकरालं दृष्ट्वा
लोकाःप्रव्यथितास्तथाहं २३

शाङ्करभाष्यटीका १

यस्मात् रूपमिति रूपं महदतिप्रमाणं ते तव बहुवक्त्रनेत्रं
बहूनि वक्त्राणि मुखानि नेत्राणि चक्षूंषिच यस्मिंस्तद्रूपं बहु
वक्त्रनेत्रं हे महावाहो बहुवाहूरुपादं बहवोवाहवः ऊरवः पा
दाश्च यस्मिन् रूपे तद्बहुबाहूरुपादं किञ्च बहूदरं बहूनि उद
राणि यस्मिन्निति तत् बहूदरं बहुदंष्ट्राकरालं बह्वीभिः दंष्ट्रा
भिः करालं विकृतं तद्बहुदंष्ट्राकरालं दृष्ट्वा रूपमीदृशं लोकाः
लौकिकाः प्राणिनः प्रव्यथिताः प्रचलिता भयेन तथाहं २३

आनन्दगिरिकृतटीका २

लोकत्रयं प्रव्यथितमित्युक्तमुपसंहरति यस्मादिति ईदृशे य
स्मात्ते रूपं तस्मात्तद् दृष्ट्वेति योजना भयेन लौकिकवदहमपि
व्यथितो मत्तो पीडां देहेन्द्रियप्रचलनं प्राप्तोस्मीत्याह तथेति २३

स्वामिकृतटीका ३

किंचरूपमिति हेमहावाहो महदत्यूर्जितंतवरूपंदृष्ट्वा लोकाःस
र्वेप्रव्यथिता अतिभीताः तथाहंचप्रव्यथितोस्मिकीदृशंरूपंदृष्ट्वा
बहूनिवक्त्राणिनेत्राणिचयस्मिंस्तत् बहवोबाहवऊरवःपादाश्च
यस्मिंस्तत् बहूदराणियस्मिंस्तत् बह्वीभि दंष्ट्राभिःकरालंवि
कृतंघोरमित्यर्थः २३

पिशाचभाष्यटीका ४ ॥ ॥ ॥

स्पष्टार्थं २३

रामानुजभाष्यटीका ५

रूपमिति बह्वीभिर्दंष्ट्राभिरतिभीषणाकारंलोकाः पूर्वोक्ताः प्रतिकू
लानुकूलमध्यस्थास्त्रिविधाः सर्वेप्यहं चतवेदमीदृशंरूपंदृष्ट्वा
व्यथिताभवामः २३

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं २३ ॥ ॥ ॥

१ श्री॰ गी॰ टी॰ प

75

ॱएवंस्थितिरूपेणविश्वरूपंदर्शयन् इदानींसंहाररूपेणसपधूपति अतिभयानकरूपद
र्शनेनतत्तन्तरवर्तिनांलोकानांसस्पवभयंनाटयति ॥

परमार्थप्रपाटीटीका॰ ७

ॱरूपमिति तेतवरूपंकरालमत्फल्गुणेदृष्ट्वालोकाःकौरवसैनिकाः
तूष्णीङ्कृतेरुमजमाभैरित्यादिवल्गमाणवाक्यैःप्रव्यथिताः नाश
पर्यवसिताइतिच दृष्ट्वापतेदेवाब्रह्मपर्वपरे तमपातात्रपर्मम
निष्ठायकजगद्गुरुवाक्यमविगणय्यव्यर्थसंग्रामादुपरतमिमह
मपिप्रव्यथितोस्मीत्यर्थः २३

वनमालीटीका॰ ८

हेमहावाहोतेतवरूपंदृष्ट्वालोकाःसर्वेप्राणिनःप्रव्यथितास्तथाहं
प्रव्यथितोभयेनकीदृशंरूपं महत् अतिप्रमाणं वहूनिवक्त्रा॰
णिनेत्राणिचयस्मिन् ततवहवोवाहवऊरवःपादाश्चयस्मिन्तत
त् वहून्युदराणियस्मिन्तत् वहुदंष्ट्राभिःकरालमतिभयान॰
केदंष्ट्रैवमात्मसहिताःसर्वेलोकाभयपीडिताइत्यर्थः २३

श्रीमद्वैजयन्तीटीका॰ ९

लोकत्रयंप्रव्यथितंमहात्मन्निमत्कस्तुपसंहरन्नाहरूपंमहदिति हे
महावाहो महातोनिरतिशयदीर्घपीनावाहवोयस्यसतथाहेमहा
वाहोहेविश्वरूपते तवमहत् निरतिशयसाम्मत्स्यमतिहरहरूप
विश्वाकारंदृष्ट्वाऽवलोकानुकूलप्रतिकूलमध्यस्थरूपाःपूर्वोक्ताः
सर्वेलोकाःस्त्रिविधाःप्राणिनःप्रव्यथिताः अतिभीषणाकारदर्शन
जन्यभयेनातिपीडिताभवेतितथाऽहमपिप्रव्यथितोभवामिनतु
यस्माल्लोकास्तेवसर्वेपूर्वंप्रव्यथिताभवणन्तन्ममरूपंकीदृशमित्य
पेक्षायामाह वहुवक्त्रनेत्रमित्यादिचतभिर्विशेषणैःवहूनिवक्त्रा
णिनेत्राणिचयस्मिंस्तत्तथा वहवोवाहवऊरवःपादाश्चयस्मिंस्तत्त
था वहूनुदराणियस्मिंस्तत्तथा वहूभिर्दंष्ट्राभिःकरालमतिभया
नकाकारमीदृशंरूपंदृष्ट्वा सर्वेवयंप्रव्यथिताभवामइत्यर्थः २३

लोकत्रयंप्रव्यथितमित्युक्तमुपसं मधुसूदनीटीका॰ १०

हरति ॥ हेमहावाहोतेनवरूपंदृष्ट्वालोकाःसर्वेपिप्राणिनःप्रव्यथिताः त
थाहंप्रविथितोभयेन कीदृशंतेरूपंमहदतिप्रमाणंवहूनिवक्त्रा णिनेत्रा
णिचयस्मिन्ततनवहवोवाहवऊरवः पादाश्चयस्मिन् ततवहून्यु
दराणियस्मिंस्तत्वहुभिर्दंष्ट्राभिःकरालमतिभयानकंदंष्ट्रैवम
तसहिताः सर्वेलोकाभयेनपीडिताइत्यर्थः भयानकत्वमेवप्रपं
चयति २३

सदानंदी टीका ११

अतिप्रमाणेनेदृ(रू)पंवक्त्रनेत्रसमुत्कलितं बहवोबाहवोयस्मिंस्तादा संतितथोरवः १ उदराणिवहूनिदेवंवक्त्रदंष्ट्राभिरुग्रकं तथाद्रू पममीलोकाटष्ट्वाभीताश्चमहंतथा २३

नीलकंठी टीका १२

पुनर्लोकानामात्मनश्चव्यथामाहरूपमिति महत्त्वादिमध्यां तहीनं हेमहाबाहो तेतवकरालेमहारूपंदृष्ट्वालोकाःव्यथि तात्सथाहंचव्यथितइतियोजना २३

आनंदीटीका

अत्रविशेषतःस्वामवस्थामाह ॥

करालमतिभयानकंरूपंदृष्ट्वासर्वेत्रिलोकस्थांप्राणिनःअहंचप्रव्यथि ताःप्रकर्षेणव्यथांप्राप्ताः[illegible] २३

रामकंठीटीका

विस्मयाविष्टायाहृष्टरूपंदृष्ट्वातएवंविधा: संहृत्यात्मरूपंदर्शयितुमाह ॥

स्पष्टार्थः श्लोकः [illegible]

तदेवंकालरूपंविशिनष्टि ॥

लासिकी [illegible]टीका

एवंविधंतवरूपंदृष्ट्वालोकाऽन्यप्रायःसर्वेप्रव्यथितास्त्रतिभीताः तथात्म त्वैनैश्वररूपसाक्षात्कारेसत्यपि लोकवदेवाहंच्युतानेतिभीतोस्मि तप रभीतएवास्मि २३

पंचोलीटीका

विस्मयहेतुमाहरूपमितिहेमहाबाहोतेतवबवक्त्रंचनेत्रंचवक्त्रबाहू रुपादंबहूदरंवक्त्रदंष्ट्राभिःकरालंविकृतंमहत्परिमाणातीतंए वंविधंत्वदीयंरूपंदृष्ट्वाभयेनसर्वेलोकाःप्रव्यथिताःतथाहम पिप्रव्यथितःचलितोभीतः २३

रणवीरसमिद्धोपिनी ॥

किंचरूपमितिनिगदव्याख्यातमेतच्छ्लोकम् २३॥

मधुभाष्य

२३॥

75

भाषा अनुवाद

और हे महाबाहो यह महान् तुमारा रूप जिसमे बहुत मुख नेत्र बाहु उरु पाद उदर हैं और जो बहुतेरे दांतो से अति कराल कहे भयानक है इसको देखके सकल लोक व्यथित हैं और मै भी पीडित हौं २३

चौपई

रूपमहत तव मुख बहु नयना महाबाहु बहुबाहु उरु चरना॥
बहुत उदर बहु दाढ कराला लोक डरत लखि अरु मेहुं हाला २३॥

76

नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्त
ल० विशालनेत्रं दृष्ट्वा हि त्वां प्रव्यथितान्तरा-
त्मा धृतिं न विन्दामि शमञ्च विष्णो २४

शाङ्करभाष्यटीका १

तत्रेदं कारणं नभःस्पृशमिति नभःस्पृशं द्युस्पर्शमित्यर्थः दीप्तं प्रज्वलितं अनेकवर्णं अनेकवर्णाभयङ्करानानासंस्थाना यस्मिंस्त्वयि तं त्वामनेकवर्णं व्यात्तानि विवृतानि आननानि मुखानि यस्मिन् त्वयि तं व्यात्ताननं दीप्तविशालनेत्रं दीप्तानि प्रज्वलितानि विशालानि विस्तीर्णानि नेत्राणि यस्मिंस्त्वयि तं त्वां दीप्तविशालनेत्रं दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा प्रव्यथितः प्रभीतोऽन्तरात्मा मनो यस्य मम सोऽहं प्रव्यथितान्तरात्मा सन् धृतिं धैर्यं न विन्दामि न लभे शमञ्चोपशमं मनस्तुष्टिं हे विष्णो २४

आनन्दगिरिकृतटीका २

अर्जुनस्य विश्वरूपदर्शनेन व्यथितत्वे हेतुमाह नत्रेति २४

स्वामिकृतटीका ३

न केवलं भीतोऽहमपि त्वेतावदेव अपितु नभःस्पृशमिति नभःस्पृशतीति नभःस्पृक् नभोऽन्तरिक्षव्यापिनमित्यर्थः दीप्तं तेजोयुक्तं यस्य तं व्यात्तानि विवृतानि आननानि यस्य तं दीप्तानि विशालानि नेत्राणि यस्य तं एवंभूतं हि त्वां दृष्ट्वा प्रव्यथितोऽन्तरात्मा मनो यस्य सोऽहं धृतिं धैर्यमुपशमं च न लभे २४

पैशाचभाष्यटीका ४

नभ इति व्यात्ताननं व्यात्तानि विवृतानि आननानि यस्यासौ व्यात्ताननं शमं सत्वं २४

रामानुजभाष्यटीका ५

नभ इति नभःशब्दः तदक्षरे परमे व्योमन् तमसः परस्तात्यं तमसः रजसः परा के यो अस्याध्यक्षः परमे व्योमन्नित्यादि श्रुतिसिद्धत्रिगुणप्रकृतिमतीतपरमव्योमवाची सविकारस्य प्रकृतितत्वस्य पुरुषस्य च सर्वावस्थस्य कृत्स्नस्याश्रयतया वर्तमानस्य नभःस्पृशमिति वचनात् द्यावापृथिव्योरिदमन्तरं हि व्याप्तमिति पूर्वोक्तत्वात्

श्री· १
गी टी·
८

दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रं त्वां दृष्ट्वा प्रव्यथितान्तरात्मा
अत एव भीतमना धृतिं न विंदामि देहस्य धारणेन लभे मनसः स्थैर्य्यादिस्था
णं च शमं न लभे विष्णो व्यापिन् अतिमात्रमत्यद्भुतमतिघोरं च त्वां द
ष्ट्वा प्रशिथिलसर्वावयवो व्याकुलेन्द्रियश्चाभवामीत्यर्थः २४

अभिनवगुप्तकृतटीका· ६

स्पष्टार्थं २४ ॥ ॥ ॥ ॥

परमार्थप्रपाटीकाटी· ७

किंच नभःस्पृशमिति नभो ऽन्तरिक्षं स्पृशतीति नभःस्पृक् तेन नभःस्पृशं दीप्तं
ज्वलितं अनेकवर्णं व्यात्तं प्रसारितमाननं येन तेति दीप्तानि प्रज्वलि
ला१ तानि विशालानि नेत्राणि यस्य विष्णो व्यापक एवंविधं त्वां दृष्ट्वा प्रव्य-
थितान्तरात्मा मनो यस्यैवं विधोऽहं धृतिं धैर्य्यमुपशमं वा न विंदामि
२४ ॥ ॥ ॥ ॥

वनमालीटीका· ८

भयानकत्वं विवृणोति नभ इति न केवलं प्रव्यथित एवाहं त्वां दृष्ट्वा
था१ किंतु प्रव्यथितोऽन्तरात्मा मनो यस्य सोऽहं धृतिं धैर्य्यं देहेन्द्रियादिधारणसा
मर्थ्यं शमं च मनःप्रसादं न विंदामि न लभे हे विष्णो त्वां कीदृशं नभः
स्पृशमंतरिक्षव्यापिनं दीप्तं प्रज्वलितम् अनेकवर्णं भयंकरनाना
संस्थानयुक्तं व्यात्ताननं विवृतमुखम् दीप्तविशालनेत्रम् प्रज्वलि
तविस्तीर्णचक्षुषम् त्वां दृष्ट्वा हि प्रव्यथितान्तरात्मा धृतिं शमं
च न विंदामीत्यन्वयः २४

कुसुमवैजयन्तीटीका· ९

अथ तस्य करालत्वं प्रपंचयन् स्वदैन्यं प्रकाशयति द्वाभ्यां नभःस्पृ
शमिति नभोऽक्षरं परमव्योमादिपदवाच्यं विष्णुपदं स्पृशतीति
स तीति तथा तं कार्य्यकारणावस्थावस्थितस्य स्थूलसूक्ष्मविश्व
स्याश्रयतया वर्त्तमानमित्यर्थः तदक्षरं परमे व्योमन् तमसः पर-
स्तात् तद्धेन्मस्य राजतः परार्द्धे याऽस्याध्यक्षः परमे व्योमन्नित्यादि
श्रुतिभ्यः द्यावापृथिव्योरिदमंतरं हि व्याप्तमित्युक्तत्वाद्वा दीप्तं प्रज्व
लितं अनेकवर्णं श्वेतपीताद्यनेकवर्णविशिष्टावयवसंस्थानयुक्त
मतिभयंकरमित्यर्थः व्यात्ताननं विवृतमुखं दीप्तविशालनेत्रं ॥
अतिप्रज्वलितविस्तीर्णलोचनं एवंविधं त्वामतिभयानकं हि श
ब्देनावधारणे दृष्ट्वैव हे विष्णो व्यापनस्वभाव प्रव्यथितान्तरात्मा प्रव्य
थितान्तरात्मा प्रव्यथितो निरतिशयपीडितोऽन्तरात्मा मनो यस्य त

भाषा अनुवाद

और जो कहा कि अस्मत् जो भावी पराजय है सो भी इस मेरी शरीर मे देखो सोई देखि अब अर्ज्जुन पांच श्लोक से कहते हैं कि जयद्रथ प्रभृति राजगण समेत ये धृतराष्ट्र के पुत्र दुर्य्योधनादि तुमारे मुख मे प्रवेश करते हैं और भीष्म द्रोण औ सूतपुत्र कर्ण ये भी तुमारे मुख मे प्रवेश करते हैं और यही सब नहीं प्रवेश करते हैं वरु प्रतियोधा अर्थात् हमारे पक्ष के भी शिखण्डि धृष्टद्युम्न प्रभृति वीरों के समेत वे प्रवेश करते हैं २८

चौपाई

यह धृतराष्ट्र सुत तोहि प्रवेशें सर्व अवनिपति संग विशेषें
भीष्म द्रोण कर्ण पुन तैसें योधे हमरे मुख्य हि जैसें २८

घ्नासो ऽहं धृतिं देहेन्द्रियप्राणादिधारणसामर्थ्यरूपं धैर्यं न वि-
न्दामि न लभे वपुनः शमं मनःप्रशादं न लभे अत्रव्यात्ताननत्वादि
कालरूपदर्शनं विभावो मनसो व्यथा ऽनुभावो धैर्यशमादिभा-
वः धृतेर्हेत्वादिभिः पुष्टो भयस्थायीभयानकरसः स्वशोकलया
हितत्वेनोक्तं व्यात्ताद्यादिभिर्विभावैर्वेपिताद्यनुभावप्रत भावे
५भ मोहादिभिः पुष्टो ऽयं स्थायीभयानक इति २४

मधुसूदनी टीका १०

न केवलं प्रव्यथितएवाहं त्वां दृष्ट्वा किंतु प्रव्यथितः अंतरात्मा म-
नोयस्य सो ऽहं धृतिं धैर्यं देहेंद्रियादिधारणसामर्थ्यं शमं च मनः-
प्रसादं न विंदामि न लभे हे विष्णो त्वां कीदृशं नभःस्पृशं अंतरि-
क्षव्यापिनं दीप्तं प्रज्वलितं अनेकवर्णं भयंकरं नानासंस्थानयुक्तं
व्यात्ताननं विवृतमुखं दीप्तविशालनेत्रं प्रज्वलितविस्तीर्णचक्षु-
षं त्वां दृष्ट्वा हि एव प्रव्यथितो ऽन्तरात्माहं धृतिं शमं च न विंदामी-
त्यन्वयः २४

सदानंदी टीका ११

नभोव्यापिनं समंतं प्रज्वलनेन समंततः नानासंस्थानसंयुक्तं भी-
षणं विवृताननं १ दीप्तविस्तीर्णनेत्रं त्वां दृष्ट्वा भीतमनो मम ना-
पि धैर्यं लभे विष्णो न शांतिं मनसो लभे २४

नीलकंठी टीका १२

स्पृशं व्योमव्या- करालत्वप्रपंचनेन स्वव्यथामेवाह नभ इति नभःस्पृशं व्यो-
पि ज्वलत्प्रथलत्वः मव्यापिनं दीप्तं अग्निवज्ज्वालासमानं व्यात्ताननं विस्फारितमुखं
दीप्तं नभस्पृशाष्टहृ- दीप्तविशालनेत्रं रक्तनेत्रं मिथःस्पर्धि हि प्रसक्तेवाद्या त्वां दृष्ट्वा प्रव्यथि-
कारात्ताः तांतरात्मा प्रकर्षेण व्यथितचित्तः धृतिं धैर्यं न विंदामि न लभे शमं
५न च शांतिं स्वास्थ्यं च लभे हे विष्णो व्यापक भयानकं त्वदाक्रांतदेश-
स्वस्याप्याक्रमणं शंकितत्वव्यापकत्वादिति भावः २४ कालाग्नि
तेन चलयामि लत्त्वपानि सर्वाहं च ततः स्वत्वदीप्ते वेगर्षः २५

आनंदी टीका

भयानकत्वमेवाह ॥
धृतिं न विंदामि विज्ञानवस्थानादनाकुलत्वं भज्ञामि शमं न विंदामि म-
नोज्ज्वलति २४

रामकंठीटीका

तद्रूपदर्शनेन विशेषतः स्वामवस्थां दर्शयितुमाह ॥

श्री
गी॰टी॰
ए॰

अयमपिस्मोकोगतार्थएव किंतदिव्यवत्ददीनलत्तणभगवद
नुग्रहलब्धोत्कृष्टादिज्ञानेनानुभूयाथनामत्यंधर्मीवेशोमतितदूप
स्मरणभीतवित्तः सन्धैर्यंनिराकुलचित्तत्वेनप्राप्नोमीत्यतोदर्शनकौ
लएवनभयादीनांसंभवोविदितव्यः अन्यत्रापिवर्तमानाव्याख्यानप्र
योगेपूर्वेदृष्टस्मरणाकरणत्वेनबोद्धव्यं [illegible] २४

नपरंभीतएवापित॥

लासिकी [illegible]मीटीका

त्वव्यापिनंदीप्तमनेकवर्णंविहृतास्यंदीप्तविशालनेत्रमेवंविधंत्वांर
कालरूपंसमाप्तिकालेदृष्ट्वाइदानीमुक्तानेतिभीतमनाधृतिंरतिंश
मञ्चविचनलेभे हेविस्णोव्यापक [illegible] २४

पंचोलीटीका

लोकानामात्मनश्चप्रव्यथितत्वेकारणमाह नभइति हे
विस्णोअहंत्वामेवंविधंदृष्ट्वाप्रव्यथितोंतरात्मामनोयस्यसः॥
अहंधृतिंधैर्यंनविंदामिअन्यतशाममनःतुष्टिंनलभेकथंभू
तंत्वानभःस्पृशंदीप्तंज्वलितमनेकवर्णंअनेकाभयंकराःव
र्णाआकारायस्मिंस्तथाव्यानाननंविवृतमुखंदीप्तविशालनेत्रं
ज्वलितविस्तीर्णलोचनं २४

रणवीरसमिद्धोयिनी

नभःस्पृशमिति नभःस्पृशंनोभव्यापिनंदीप्तंप्रत्वरूपमनेकव
र्णंनैकोवर्णोयस्यतंलोहितशुक्लकृष्णपतिभेदात् व्यात्ताननं
व्यात्तानिव्याहृतान्याननानिमुखानियस्यतं दीप्तविशालनेत्रं
दीप्तानिविशालानिविस्तीर्णानिनेत्राणियस्यानेकवक्त्रत्वादिते
नादृशिविशिष्टघोरतराकारंत्वांदृष्ट्वाइदानीमेवप्रव्यथितांतरात्मा
प्रव्यथितोतिभयव्याकुलितोंतरात्मामनोयस्यसंमूढ्वात्सोहमेता
दृशवुद्धित्वाहृतिंमनसोधैर्यंनविंदामि नलभे किंपुनःशामं
विंदामीतिवाशपमिति २४॥

मधुभाष्य

२४॥

भाष्य अनुवाद

और मै हीं केवल डरा हूं यह नहीं ऐसा आकाशको परस कर
ने वाला अर्थात् अत्यव्यापी तेजयुक्त नाना वर्ण विशिष्ट विस्ता
र को प्राप्त औ जलजलाते हैं विशाल करे बडे नेत्र जिस के
ऐसे तुम को अवलोकन करि के विसो हमारा अन्तरात्मा व्य
था युक्त है और मै इस रूप को देखने उपे शान्ति तथा धीर
ज नहीं धर सकता हूं २४

चौपई

स्पर्शहि नभ दीपैं बहु वर्णा विहृतमुख दिपैं वडे नेत्रहि अरुणा ॥
देखित तोहि मन व्यथा हमारे धैर्य न धरों अरु शांति न धारे २४

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानल
सन्निभानि दिशो न जाने न लभे च शर्म प्र
सीद देवेश जगन्निवास २५

शाङ्करभाष्यटीका १

कस्मात् दंष्ट्राकरालानीति दंष्ट्राकरालानि दंष्ट्राभिः करालानि वि
कृतानि ते तव मुखानि दृष्ट्वैवोपलभ्य कालानलसन्निभानि प्र
लयकाले लोकानां दाहकोऽग्निः कालानलस्तत्सन्निभानि कालानल
सदृशानि दृष्ट्वेत्येतद्दिशः पूर्वापरविवेकेन न जाने दिङ्मूढोस्मि
अतो न लभे न चोपलभे च शर्म सुखमतः प्रसीद प्रसन्नो भव
देवेश जगन्निवास २५ आनन्दगिरिकृतटीका २

दृश्यमानेपि भगवद्देहे परितोषाभावे कारणान्तरं प्रश्नपूर्व
कमाह कस्मादिति दृष्ट्वैवेत्येवकारेण प्राप्तिर्ध्यावर्त्यते २५

स्वामिकृतटीका ३

किंच दंष्ट्रेति भो देवेश तव मुखानि दृष्ट्वा भयावेशेन दिशो न जानामि
शर्म च सुखं न लभे भो जगन्निवास प्रसन्नो भव कीदृशानि मुखानि
दंष्ट्राभिः करालानि कालानलसन्निभानि कालानलः प्रलयाग्निस्त
त्सदृशानि २५ पिशाचभाष्यटीका ४

स्पष्टार्थं २५ ॥ ॥ ॥

रामानुजभाष्यटीका ५

दंष्ट्रेति युगान्तकालानलवत्सर्वसंहारे प्रवृत्तान्यतिघोराणि तव मुखानि दृ
ष्ट्वा दिशो न लभे जाने सुखं न लभे जगन्निवास देवेश ब्रह्मादीनामीश्वरा
णामपि परममहेश्वर मां प्रति प्रसन्नो भव यथाहं प्रकृतिं गतो भवामि त
था कुर्वित्यर्थः एवं सर्वस्य जगतः स्वायत्तस्थितिप्रवृत्तितां दर्शयन् पार्थ
सारथिः राजवेषच्छन्नतयावस्थितानां धार्तराष्ट्राणां यौधिष्ठि
रेष्वनुप्रविष्टानां चासुरांशानां संहारेण भूभारावतारणं स्वमनीषितं
तेष्वनुप्रविष्टानां चासुरांशानां संहारेण भूभारावतारणं स्वमनीषितं ते
ष्वेनैव करिष्यमाणं पार्थाय दर्शयामास स च पार्थो भगवतः स्रष्टृ
त्वेनैव करिष्यमाणं पार्थाय दर्शयामास स च पार्थो भगवति सर्वात्मनि धार्तराष्ट्रा
दिकं सर्वं स्वर्थ्यं मातात क्तत्त स्मिन्नेव भगवति सर्वात्मनि धार्तराष्ट्रा

हीनोऽप्रसंहारमनागतमपितस्मादलब्धेन दिग्भ्रमेन च वक्ष्यमाणमिदं प्रोवाच २५

अभिनवगुप्तकृतटीका॰ ९

स्पष्टार्थं २५ ॥ ॥ ॥

परमार्थप्रपाटीका॰ ७

अथ भयातिशयेन स्वस्य कोदिशीकत्वमनुवदति दंष्ट्रेति दंष्ट्राकरालानि भयानकानि कालानलः संकर्षणमुखानलस्तत्सदृशानि ते मुखानि दृष्ट्वा अहं दिशो न जाने प्रागपरादिविभागेन दिशोऽज्ञाने सूर्येण कृतो भवति सोऽपि तवतेजोभूतो लीनमर्थः तथा इतः परं किं भविष्यतीति व्याकुलचित्तत्वेन शर्म विश्रामं न लभे अथ भूयोऽपशमनायैव विधेयमित्याह प्रसीदेति स्पष्टं २५

वनमाली टीका ८

दंष्ट्राभिः करालानि विकृतत्वेन भयंकराणि प्रलयकालानलसदृशानि च ते मुखानि दृष्ट्वैव नतानि प्राप्य भयवशेन दिशः पूर्वापरादिविवेकेन न जाने अतो न लभे च शर्म सुखं तव रूपदर्शनेऽप्यतो हे देवेश हे जगन्निवास प्रसीद प्रसन्नो भव मां प्रति यथापूर्वाभयाभावेन तव दर्शनजं सुखं प्राप्नुयामिति शेषः २५

कुसुमवैजयन्तीटीका॰ ९

किंच दंष्ट्राकरालानीति दंष्ट्राभिः अतितीक्ष्णदीर्घह्रस्ववक्रविरलपंक्तिभिः करालान्यतिविकृतत्वेन भयंकराणि च पुनः कालानलसन्निभानि महाप्रलयाग्निसदृशानि मुखानि तव वदनानि दृष्ट्वैव पवकारेण नतानि स्पृष्ट्वा प्राप्य वा भयभीतोऽस्मि किं तव मुखानां दर्शनमात्रेणैवेति सूचितं दिशः पूर्वापरादिदिग्विभागान् विवेकेनाहं न जाने न वेद्मि अतो हेतोः शर्म च सुखं न लभे यथा पूर्वं तव सुधीं नु निभमविस्तरसमकुंदकरेलराजितस्मरदनेवदने दृष्टाः हे सुखं प्राप्तवांस्तथा पुनाननप्राप्नुयां तस्माद्धे जगन्निवास जगदाश्रय हे देवेश देवानां केशेशषसुरेशादीनामीश नियंतः प्रसीद प्रसन्नो भव तव देवा निसौंदर्यादिगुणयुक्तं रूपं मे दर्शयेति भावः २५

मधुसूदनी टीका॰ १०

दंष्ट्राभिः करालानि विकृतत्वेन भयंकराणि प्रलयकालानलसन्निभानि प्रलयकालवह्निसदृशानि च ते मुखानि दृष्ट्वैव नतानि प्रा

प्यभयवशेन दिशः पूर्वापरादिविवेकेन न जाने अतो न लभे च
शर्म सुखं च त्वद्रूपदर्शनेपि हे देवेश हे जगन्निवास प्रसीद प्रसन्नो
भव मां प्रति यथा भयाभावेन त्वद्दर्शनजं सुखं प्राप्नुयामिति शे
षः [illegible]
[illegible]
[illegible] २५

मदानंदीटीका ११

भयंकराणि दंष्ट्राभिर्विकृतत्वान्मुखानि ते प्रलयानलतुल्यानि
दृष्ट्वैवातिभयाहृतः । पूर्वापरविवेकेन न जाने हं दिशो भ्रमा
त् न लभे हं सुखं स्वामिन् त्वद्रूपस्यापि दर्शने प्रसन्नो भव देवेश
जगदाधार मां प्रति यथाहं निर्भयो भूत्वा त्वद्दर्शनसुखं लभे २५

नीलकंठी टीका १२

कालानलः प्रलयाग्निस्तत्सदृशानि प्रसीद प्रसन्नः स्वखेदोभवे
स्पष्टः २५

ज्ञानंदीटीका स्पष्टार्थं २५

रामकंठीटीका

किंच स्फुटार्थमेतद्वाक्यं किंतु भगवतो दंष्ट्राकरालवक्त्रप्रावल्ये संहारमहू
तेवन्हिविकृतकृतांतरूपावेशात् [illegible]
[illegible] ॥

लासिकी ~~[illegible]~~टीका

किंच तवकालरूपस्य दंष्ट्राभिः करालानि विकृतत्वेन भयानकानि प्रलय
कालाग्निसदृशानि मुखानि दृष्ट्वैव समाधिकाले साक्षात्कृत्यैव दिशः
पूर्वापरादिविभागेनेदानीं व्युत्थाने समाधिसंस्कारफलकेन न जाने सुखं
च नोपलभे हे देवेश कालादिदेवनियंतः हे जगन्निवास जगदाश्र
येति साहूतमामं ज्ञगाद्धयम् तं प्रसन्नो भव जगद्रक्षां प्रति [illegible] २५

पंचोलीटीका

गी॰
टी॰
प॰

धृतिशमयोरलाभेकारणंतरमाह दंष्ट्रेति चपुनःदंष्ट्राकरा
लानिविकृतानिकालानलसंनिभानिप्रलयाग्निसदृशानि
तेतवमुखानिदृष्ट्वैवअहंपूर्वापरविभागेनदिशोनजानेदिग्
मूढोस्मिचपुनःशर्मसुखंनलभेहेदेवेशजगन्निवासप्रसीदप्र
सादंकुरुप्रसन्नोभव २५

श्रीधरस्वामिसुबोधिनी ॥

कालानलसन्निभानि कालाग्निरुद्ररूपाणीव दंष्ट्राकराला
नितेमुखानिदृष्ट्वैवतस्मिन्कालेभीतत्वाद्बलितंप्रहतोपि
दिशोदेशविभागान्पूर्वापरान्नजानेर्यादिग्भ्रमहतोस्म्य
तएवनलभेचशर्मेतिसर्वथाप्रणष्टंमांप्रत्यधुनाजगन्निवा
सत्वात्प्रसीदयेनाहंस्वस्थचित्तोभवामीत्यभिप्रायः २५॥

मधुभाष्य

२५॥

भाष्य अनुवाद

और हे देवेश तुमारा मुख देखि डर के मारे हमे दिशा भूलि गई और सुख पावते नहीं हे जगन्निवास अब प्रसन्न होउ कैसा मुख देखि डर भाया सो कहते कि बडे कराल दांतो से भयानक जो प्रलयाग्नि के समान है २५

चौपई

दंत करालतोरे मुख नाना देषिए कालानल हि समाना
भासें दिशा हि न लहों सुख लेषा होप्रसन्न जगवास सुरेषा
२५॥

अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवाव-
निपालसंघैः भीष्मो द्रोणः सूतपुत्रस्तथा-
सौ सहास्मदीयैरपि योधमुख्यैः २६

शाङ्करभाष्यटीका १

येभ्यो मम पराजयशङ्का प्रागेव आसीत्सा चापगता यतः
अमी चेति अमी च त्वां धृतराष्ट्रस्य दुर्योधनप्रभृतयस्त्वरमाणा वि
शन्तीति व्यवहितेन संबन्धः सर्वे सहैव संहताः अवनिपाल
संघैः अवनिं पृथ्वीं पालयन्तीत्यवनिपालास्तेषां संघैः किञ्च भीष्मो द्रो
णः सूतपुत्रः कर्णस्तथासौ सहास्मदीयैरपि धृष्टद्युम्नप्रभृतिभि
र्योधमुख्यैः योधानां मुख्यैः प्रधानैः सह २६

आनन्दगिरिकृतटीका २

अस्माकं जयं परेषां पराजयं च दिदृक्षन्तं पश्यामीत्याह येभ्य इति
तत्र हेतुत्वेन श्लोकमवतारयति यत इति २६

स्वामिकृतटीका ३

यच्चान्यद्द्रष्टुमिच्छसि इत्यनेनास्मिन्संग्रामे भाविजयपराजयादिकं च
मम देहे पश्येति यद्भगवतोक्तं तद्दर्शयन्नाह अमी चेति पं
चभिः अमी धृतराष्ट्रस्य पुत्रा दुर्योधनादयः सर्वे अवनिपालानां जयद्र
थादीनां राज्ञां संघैः सहैव तव वक्त्राणि विशन्तीत्युत्तरेणान्वयः त
था भीष्मश्च द्रोणश्चासौ सूतपुत्रः कर्णश्च न केवलं त एव विशन्ति अ
पि तु प्रतियोद्धारो येऽस्मदीया योधमुख्याः शिखण्डिधृष्टद्युम्नादयस्तैः
सह २६

पैशाचभाष्यटीका ४ ॥

स्पष्टार्थः २६ ॥ ॥

रामानुजभाष्यटीका ५

अमी चेति वक्त्राणीति अमी धृतराष्ट्रस्य पुत्रा दुर्योधनादयः सर्वे भीष्मः
द्रोणः सूतपुत्रः कर्णश्चैतत्पक्षीयैरवनिपालसमूहैः सर्वैरस्मदीयै
सह श्च कैश्चिद्योधमुख्यैः २६

अभिनवगुप्तकृतटीका ६

स्पष्टार्थः २६

सच पार्थो भगवतः श्रुत्वादिकं सर्वं स्वयं साक्षात्कृत्य तस्मिन्नेव भगवति सर्वात्मनि धार्तराष्ट्रादीनां
उपसंहारमनागतमपि तत्प्रसादलब्धेन दिव्येन चक्षुषा पश्यन्निदं प्रोवाच ॥

श्री
गी टी
पं

परमार्थप्रपा टीका ७

अथान्यदद्भुतं पश्यामीत्याह अमी चेति पंचभिः तत्र रणे मद्विघ्नमा
णेनाभक्तानामभक्तानां च भाविनीं दुष्प्रमाणां गतिं प्रथमं तावन्निरूप
यति तत्र भीष्मो द्रोणः सूतपुत्रः कर्णः तथैव दुष्कर्मा राजा भगवद्भ
क्तास्तथाविधैरेवास्मदीयैर्योधमुख्यैः शिखंडि धृष्टद्युम्नादिभिः स
ह अपुनर्भवप्रदं संसारं विशंति तथाऽमी कूटकारित्वेनाततायिने
न चमामेवमपि ह्या धृतराष्ट्रस्य पुत्रा दुर्योधनादयः शासनादय एको
नशतं तथाविधैरेवावनिपालानां संघैः सह त्वरमाणाः पातका
त्वैव गवत्तरालववक्त्राणि विशंति २६

वनमाली टीका ८

योऽस्वातंत्र्यममेषां च पराजयं सर्वदा द्रष्टुमिष्टं पश्यमम देहे गुड
केश यच्चान्यद्द्रष्टुमिच्छसीति भगवदादिष्टमधुना पश्यामीत्याह
अमी चेति पंचभिरमी च धृतराष्ट्रस्य पुत्रा दुर्योधनादयः शतं तु
त्वां विना सर्वे त्वां त्वरमाणा विशंतीत्यग्रिमेणान्वयः अतिशयस्तूच
कत्वेन क्रियापदस्य सर्वत्र गुण एव सहैवावनिपालानां शल्यादीनां
संघैः त्वां विशंति न केवलं दुर्योधनादय एव विशंति किंतु जयद्रथे
न सर्वसंभाविता भीष्मो द्रोणः सूतपुत्रः कर्णस्तथासौ सहास्मदी
यैः परकीयैरिवास्मदीयैः [struck-through text] धृष्टद्युम्नादिभि
र्योधमुख्यैः सह त्वां विशंतीति संबंधः २६

ॐ तत्सद्वैजयन्ती टीका ९

एवमखिलचेतनाचेतनात्मकस्य विश्वस्य भगवदधीनस्थिति
महत्त्वमर्जुनेन भगवद्देहे एव दृष्टमित्युक्तमधुना राजवेषा
पन्नयोरुभयोः सेनयोः स्थितानां सुरासुराणां संहाररूपं भूभाराव
तारणमनागतमपि भगवद्दत्तदिव्यनेत्रत्वाद्विश्वाकारे भगव
द्रूप एव दृष्ट्वा पार्थो निव्याकुलमनास्तत्त्वमेव भगवन्तमाह पञ्च
भिः अपि चेति धृतराष्ट्रस्य धृतो राष्ट्रो येन स तस्य तेनाधर्मेण येन
व्याकुलमनास्तत्त्वमेव भगवन्तमाह पञ्चभिः अपि चेति धृतराष्ट्र
स्य धृतो राष्ट्रो येन स तस्य तेनाधर्मेण येन यत्किंचित्कालं राज्यं लब्धं
पुत्राः पालिता लब्धस्य तद्राज्यस्य तेषां पुत्राणां चांतकालो दृश्यते इति सूचि

तम् अन्यएकोनशतं दुर्योधनादयः सहोदराः अमी ये प्राणे-
भ्योऽस्मद्युद्धे युयुत्सया स्वस्वमरणमविगणय्य स्थिताः इत्यनेन
स्वेषां युधिष्ठिरादिपंचानां कृपाचार्याश्वत्थामप्रभृतीनां च युद्धे
मरणाभावत्वं सूचितम् तथाभीष्मद्रोणाश्वत्थासौमदत्तयुतः
कर्णः असावित्यनेन तस्य स्वविद्वेष्टृत्वं द्योतितम् चशब्दादस्मा-
कं युधिष्ठिरादीनामपि प्रतिविन्ध्यघटोत्कचाभिमन्युप्रभृतयः
सर्वेप्येते अवनिपालैः सर्वैः शल्यजयद्रथादीनामवनिपालानां
राज्ञां संघैः समूहैः सह केवलं तएव किंतु मदस्मदीयैरपि
केचिदस्मदीयैः परकीयैर्योधमुख्यैर्धृष्टद्युम्नविराटादिभिः स-
ह त्वां विष्णाश्रयमतिभयंकरे विशंतीत्यध्याहारः अत्र भयसूच-
कत्वेन क्रियापदस्यानुक्तत्वेगुणएव न तद्दोषो भवतीत्यर्थः ये-
ऽस्मदीया धृष्टद्युम्नादयस्तेपि प्रविशंतीति सहोक्तिरलङ्कारः २९

मधुसूदनी टीका १०

अमी च धृतराष्ट्रस्य पुत्रा दुर्योधनप्रभृतयः शतं सोदराः युयु-
त्सुं विना सर्वे त्वां त्वरमाणा विशंतीत्येतान्वयः अतिभयसू-
चकत्वेन क्रियापदन्यूनत्वमगुणएव सहैवावनिपालानां
शल्यादीनां राज्ञां संघैः त्वां विशंति न केवलं दुर्योधनादय ए-
व विशंति किंतु अजेयत्वेन सर्वैः संभावितोपि भीष्मो द्रोणः
सूतपुत्रः कर्णः तथासौ सर्वदा मम द्वेष्टा सहास्मदीयैरपि पर-
कीयैर्विराटधृष्टद्युम्नप्रभृतिभिर्योधमुख्यैस्त्वां विशंतीति संबं-
धः २९

सदानंदी टीका ११

येभ्यः पराजयाशंका ममासीत्तेप्यमी दुर्योधनप्रभृतयो
धृतराष्ट्रसुताः शतं १ शल्यादीनां महीपानां समूहैः सह ते-
खिलाः त्वां विशंति तथा भीष्मद्रोणकर्णादयोप्यमी २ अजेय-
त्वेन ये लोके शूराः संभाविता हि ते अस्मदीयैः सहानेकैर्धृ-
ष्टद्युम्नादिभिस्तथा योधमुख्यैर्विशंति त्वामित्यनेनान्वयास-
च २९

नीलकंठी टीका १२

अमी त्वां विशंतीत्यग्रिमश्लोकादपकृष्यते २९

गी॰ टी॰ ५॰

आनंदीटीका स्पष्टार्थम् २९

रामकंठीटीका स्पष्टार्थम् २९ तपवह्नतांतव
हपाकांतानांऊर्वादीनांचेष्टितंवर्णयति तमाह ॥

लासिकी वल्लभीटीका

किंच अमीधृतराष्ट्रस्यपुत्रादुर्योधनादयःसर्वेशतंसहजाः अवनिपाला
नांशल्यजयद्रथप्रभृतीनांराज्ञांसमूहैःसहैवत्वांकालरूपंविशं
तीत्युत्तरेणसंबंधः येषांरूपमात्राकारैवश्येनात्वमतत्वरस्यापि
त्वत्स्याविशंतीतिवर्तमानत्वेनोक्तिः एवमग्रेत्र तथाभीष्मोद्रोणः
सूतपुत्रोसौकर्णः अस्मदीयैस्तेषांप्रतियोद्धभिर्धृष्टद्युम्नादिभिः स
हतेसर्वेविशंति २९

पंचोलीटीका

येभ्योममपराजयशंकाभागासीत्साचापगतेत्याह अमीचे
तिपंचभिः वपुनःअमीधृतराष्ट्रस्यपुत्राःदुर्योधनप्रभृतयः त
थाभीष्मोद्रोणःअसौसूतपुत्रःकर्णःअवनिपालसंघैःराज्ञां
समूहैःवास्मदीयैरपिधृष्टद्युम्नप्रभृतिभिर्योधमुख्यैःसहत्व
रमाणाःत्वांविशंतितेतवत्वरमाणाःदंष्ट्राकरालानिदंष्ट्राभिः
विकृतानिभयानकानिभयंकराणिवक्त्राणिविशंतितववक्त्रेषु
प्रविष्टानांमध्येकेचित्चूर्णीकृतैरुत्तमांगैःशिरोभिःदशनां
तरेषुदंतविवरेषुविलग्नामांसमात्रकलाइवदृश्यंते २९

रणवीरसमिद्धोधिनी॥

अमीचेति अमीधृतराष्ट्रस्यपुत्रादुर्योधनादयोवनिपालसंघैः
सहसर्वे तथाभीष्मोद्रोणोसौसूतपुत्रश्चकर्णः इत्येतेचास्मदी
यैर्धृष्टद्युम्नादिभिर्योधमुख्यैरपिसहसर्वे तेतवदंष्ट्राकरालान्य
तएवभयानकानिवक्त्राणिदंष्ट्राभिःत्वरमाणाः ससंभ्रमास्त्वां
विशंत्यर्थाच्चतेजस्यंतर्हिताभवंतीति तत्रकेचित्तवदशनानांतरे
षुदशनानांदंतानांयान्यंतराणिसंधिच्छिद्राणितेषुविलग्नावि

लीनाः संदृश्यंते उपलक्ष्यंते तत्रोपलक्षणमाह चूर्णितैरिति चूर्णि
तैः क्षुण्णैरुत्तमांगैः शिरोभिरुपलक्षणभूतैरेव तत्संधिविली
ना उपलक्ष्यंते न त्वन्यावयवैरित्यर्थः २८॥

मधुभाष

२८॥

वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि केचिद्विलग्ना दशनान्तरेषु संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः २७

शाङ्करभाष्यटीका १

किञ्च वक्त्राणीति वक्त्राणि मुखानि ते तव त्वरमाणास्त्वरायुक्ताः सन्तो विशन्ति किं विशिष्टानि दंष्ट्राकरालानि मुखानि भयानकानि भयङ्कराणि किञ्च केचिन्मुखानि प्रविष्टानां मध्ये विलग्ना दशनान्तरेषु मांसमिव भक्षितं संदृश्यन्ते उपलभ्यन्ते चूर्णितैश्चूर्णीकृतैरुत्तमाङ्गैः शिरोभिः २७

आनन्दगिरिकृतटीका २

न केवलं दुर्योधनादीनामेव पराजयः किन्तु भीष्मादीनामपीत्याह किञ्चेति भगवद्रूपस्याकृतेहेत्वन्तरमाह किञ्चेति प्रविष्टानां मध्ये केचिदिति सम्बन्धः २७

स्वामिकृतटीका ३

वक्त्राणीति एते सर्वे त्वरमाणा धावन्तस्तव दंष्ट्राभिर्विकृतानि भयंकराणि वक्त्राणि विशन्ति तेषां मध्ये केचिच्चूर्णीकृतैः शिरोभिरुपलक्षिता दन्तसन्धिषु संश्लिष्टा दृश्यन्ते २७

पिशाचभाष्यटीका ४ ॥

स्पष्टार्थं २७ ॥

रामानुजभाष्यटीका ५

त्वरमाणा दंष्ट्राकरालानि भयानकानि तव वक्त्राणि विशन्ति तत्र केचिच्चूर्णि तैरुत्तमाङ्गैर्दशनान्तरेषु विलग्नाः संदृश्यन्ते २७

अभिनवगुप्तकृतटीका ६ ॥ ॥

स्पष्टार्थं २७ ॥ ॥

परमार्थप्रपा टीका ७

किंभूतानि वक्त्राणि दंष्ट्राकरालानि अत एव भयानकानि तत्र केचिद्दृष्टास्तैश्चूर्णीकृतैरुत्तमाङ्गैः शिरोभिः दशनान्तरेषु दन्तसन्धिषु विलग्नाः संश्लिष्टाः दृश्यन्ते २७

वनमालीटीका ८

१

श्री· गी टी· ५

अमी च त्वां धृतराष्ट्रस्य पुत्रा याः सर्वे तेन वदंष्ट्राकरालानि भयानका
नि वक्त्राणि त्वरमाणा विशंति तत्र केचिच्चूर्णितैरुत्तमांगैः शिरोभिर्वि
शिष्टा दशनांतरेषु विलग्ना विशेषेण संलग्ना दृश्यंते मया सम्यगसं
देहेन २७

कुसमवैजयन्ती टीका· ९

किंच वक्त्राणीति पूर्वोक्तास्ते सर्वे त्वरमाणा अतिवेगयुक्तास्संतस्तेत
व वक्त्राणि कालानलसन्निभानि मुखानि विशन्ति प्रविशन्ति कीदृशा
नि दंष्ट्राकरालानि दंष्ट्राकरालाभयंकराणेयुतानि अत एव भया
नकानि रतिशयभयरूपाणि तेषां मध्ये केचित् कतिचित् वीराश्चू
र्णितैः शकलीभूतैरुत्तमांगैर्मस्तकैस्सहिताः दशनांतरेषु तवदं
तसंधिषु विलग्नास्संश्लिष्टाः संदृश्यंते मयेति शेषः २७

मधुसूदनी टीका· १०

अमी धृतराष्ट्रस्य पुत्रमभृतयः सर्वेपि ते तव दंष्ट्राकरालानि भया
नकानि वक्त्राणि त्वरमाणा विशंति तत्र च केचित् चूर्णितैरुत्त
मांगैः शिरोभिर्विशिष्टा दशनांतरेषु विलग्ना विशेषेण संलग्ना दृ
श्यंते मया सम्यगसंदेहेन [illegible]
२७

सदानंदी टीका· ११

तव दंष्ट्राकरालानि वक्त्राण्यतित्वरान्विताः विशंति भीष्मद्रोणमेते
सर्वे दुर्योधनादयः १ तत्र चूर्णीकृतैः केचिच्छिरोभिः संयुता भटाः
दंतांतरेषु संलग्ना दृश्यंते मया स्फुटं २७

नीलकंठी टीका· १२

ते भीष्मादयः उत्तमांगैः शिरोभिः अयं भावः धृतराष्ट्रस्य पुत्राः पा
पिष्ठाः भवंतमेव त्रैलोक्यशरीरं विशंति पापानुरूपं तस्य पापस्य स्था
नस्थितान् नरकानेव गच्छंतीति तत्र त्वां [illegible] विशंतीत्येवोक्तं भी
ष्मादयस्तु भक्ता यतो मिश्रोत्तमाणावदात्मसमहताश्च भगवतो मुखं प्र
विशंतीति विशेषमग्रतिसूचनार्थं त्वां धृतराष्ट्रस्य पुत्रा विशंति भीष्मा
दयस्तु वक्त्राणि विशंतीति विभागदर्शनं युक्तमिति २७

आनंदीटीका

[illegible] २७

रामकवीटीका

नानारूपैः पुरुषैर्वाध्यमाना विशंति ते वक्त्रमविलत्यरूपम् यौधिष्ठिरा धातराष्ट्राश्च योधाः शस्त्रैः कृतानाविधैः सर्वएव वेन्नजमानिहतान्मून मेव तथा शरीमेतव्छरीरं प्रविष्टाः २७

लासिकी वसतनीटीका

किंच अमी दुर्योधनादयो दंष्ट्राभिर्विकृतानि भयंकराणि तव वक्त्राणि धावंतो विशंति तन्मध्ये केचिद्योधाश्चूर्णितैः शिरोभिर्विशिष्टा दंतसंधिषु संश्लिष्टा दृश्यंते [illegible] २७

पंचोलीटीका

स्पष्टार्थं २०

रणवीरसमिद्बोधिनी॥

स्पष्टार्थः २७॥

मधुभाष्य

२०॥

भाषा अनुवाद

और ये दुर्योधनादिक धावते हुये तुमारे विकट दंत कराल मुखमे प्रवेश करते हैं और तिनके वीच कोई कोई योद्धा मस्तक चूर्ण हुये तुमारे दांतो के मध्य संधिमे लपटे से देख पडते हैं २७

चौपई

तोमुखमांहि परहि यहसहसा दंतकराल भयानक सहसा
कोईक दंतनमांहि लगे है देखिप चूर्णितशीस किते है २७

यथानदीनांबहवोऽम्बुवेगाः समुद्रमेवा
भिमुखाद्रवन्ति तथातवामीनरलो
कवीराविशन्ति वक्त्राण्यभितोज्वलन्ति
२८

शाङ्करभाष्यटीका १

कथं प्रविशन्ति मुखानीत्याह यथा नदीनामिति यथा नदी
नां स्रवन्तीनां बहवोऽनेकेऽम्बूनां वेगाऽम्बुवेगास्त्वराविशेषाः
समुद्रमेवाभिमुखाः प्रतिमुखाः द्रवन्ति प्रविशन्ति तथा त
द्वत्तव अमी भीष्मादयो नरलोकवीरा मनुष्यलोकपाला विशन्ति
वक्त्राण्यभितोज्वलन्ति प्रकाशमानानि २८

आनन्दगिरिकृतटीका २

उभयोरपि सेनयोरवस्थितानां राज्ञां भगवन्मुखप्रवेशने नि
दर्शनेन विशदयति कथमित्यादिना २८

स्वामिकृतटीका ३

अवशप्रवेशमेव दृष्टान्तेनाह यथेति नदीनामनेकमार्गप्रवृत्ता
नां बहवो बहूनां वारीणां वेगाः प्रवाहाः समुद्राभिमुखाः सन्तो यथा
समुद्रमेव द्रवन्ति प्रविशन्ति तथामी येन नरलोकवीरास्तेभितो
विज्वलन्ति सर्वतः प्रदीप्यमानानि तव वक्त्राणि प्रविशन्ति २८

॥ पैशाचभाष्यटीका ४ ॥

स्पष्टार्थं २८

॥ रामानुजभाष्यटीका ५ ॥

यथेति एते राजलोका बहवो नदीनामम्बुप्रवाहाः २८ समुद्रमिव

॥ अभिनवगुप्तकृतटी ६ ॥

स्पष्टार्थं २८

परमार्थप्रपा टीका ७

अत्राप्यै (?) मत्र दृष्टान्तमाह यथेति यथा बहवो नानामार्गप्रवृत्ताः
नदीनामम्बुवेगाः प्रवाहाः समुद्रमेव द्रवन्ति प्रविशन्ति प्रविश्य च
समुद्राकारा भवन्ति तथा तवामी मुखा अनुकूला नरलोकवीरा उ
त्साहशालिनो भीष्मद्रोणादयस्त्वां विशन्ति २८

श्री॰
टी॰ गी॰
प

८५

वनमालीटीका ८

राज्ञां भगवन्मुखप्रवेशने निदर्शनमाह यथेति यथा नदीना
मनेकमार्गप्रवृत्तानां वहवोऽम्बूनां जलानां वेगा वेगवन्तः प्रवाहाः
समुद्राभिमुखाः सन्तः समुद्रमेव द्रवन्ति विशन्ति तथा तवामी न
रलोकवीरा विशन्ति वक्त्राण्यभितः सर्वतो विज्वलन्ति २८

ऊसमवैजयन्तीति ९

राजवीराणां विश्वरूपमुखप्रवेशने दृष्टान्तमाह यथा नदीनामि
ति यथेति दृष्टान्तेन नदीनां नदनदीनां वहवोऽनेकाम्बुवेगाः अ
म्बूनां नीराणां वेगाः वेगवन्तः प्रवाहाः अभिमुखाः सन्मुखाः सन्तः
समुद्रमेव द्रवन्ति प्रविशन्ति तथेति दार्ष्टान्ते अमी नरलोकवीराः न
ररूपेण नरलोकवर्तिनः सुरासुरांशोत्पन्ना वीराः शूरास्तव विश्वरू
पस्याभिविज्वलन्ति अभि सर्वतो विज्वलन्ति प्रदीप्यमानानि वक्त्राणि
मुखानि विशन्ति प्रविशन्ति अत्रावशात् ज्ञानपूर्वकत्वं दृष्टान्ते
बोध्यः २८

मधुसूदनी टीका १०

राज्ञां भगवन्मुखप्रवेशने निदर्शन
माह — यथा नदीनामनेकमार्गप्रवृत्तानां वहवः अम्बूनां जलानां वेगाः प्र
वाहाः समुद्राभिमुखाः सन्तः समुद्रमेव द्रवन्ति विशन्ति तथा तवा
मी नरलोकवीरा विशन्ति वक्त्राण्यभितः सर्वतो ज्वलन्ति अभिविज्व
लन्तीति वा पाठः [illegible]
[illegible] २८

सदानन्दी टीका ११

कथं ते प्रविशन्ति तेन दृष्टान्ताभ्यां निदर्शयति वहुमार्गप्रवृत्तानां न
दीनां वहवोऽम्बुपा १ वेगावन्तः प्रवाहा वै समुद्राभिमुखा यथा स
मुद्रं प्रविशन्ति एवं त्वणीवीरा महत्तराः भीष्मद्रोणादयः सर्वे तव
वक्त्राणि सर्वतः प्रविशन्ति ज्वलन्ति ते महाकालेन योजिताः २८

नीलकण्ठटीका १२

इदमेव सदृष्टान्तमाह यथेति नववक्त्राणि विशन्तीति सम्बन्धः
अभिविज्वलन्ति सर्वतः जाज्वल्यमानानि २८

आनंदीटीका स्पष्टार्थम् २८॥ राज्ञाकालमुखप्रवेशेनिदर्शनमाह॥

रामकेवीटीका स्पष्टार्थम् २८

लासिकी ~~वसमती~~टीका

प्रवेशेन्वरयाहष्टांतमाह॥
यथावक्रमार्गप्रवहंतीनांनदीनांजलप्रवाहः समुद्राभिमुखाः
समुद्रमेवद्रवंतिप्रविशंतितथामीनरलोकवीराः सर्वतोदीप्ता
नितवमुखानिविशंति [illegible]
[illegible] २८

पंचोलीटीका

भगवान्मुखप्रवेशंदृष्टांतेनयोजयति यथेति यथानदीनां
वहवअनेकाअंबुवेगाः समुद्रमेवाभिमुखाद्रवंतिविशंतितथा
तद्वत्अमीभीष्मादयोनरलोकवीराः मनुष्यलोकशूराः तवअ
भिविज्वलंतिप्रकाशमानानिवक्त्राणिप्रविशंति २८

रणवीरसमिद्बोधिनी॥

अथपुनरसुमेवार्थंनिदर्शयति यथेति नदीनां बहवोंबुवे
गा जलप्रवाहाअभिमुखा अभितःसर्वतोमुखंगतिर्येषांतेभि
मुखानिरर्गलगतिकाअपि यथासमुद्रमेवगच्छंति तथा
मी नरलोकवीरा नरलोकोमनुष्यलोकस्तत्रापियेवीरावीर
पुरुषास्तेपितवाभिविज्वलंति प्रज्वलद्रूपाणिवक्त्राणिविशं
तीति २८॥

मधुभाष्य

90

भाषा अनुवाद

अब उनके प्रवेश विषय मे दृष्टान्त कहते हैं कि जैसे अनेक अनेक मार्ग से नदियो के धारा प्रवाह समुद्रके अभिमुखे ध ये भये जायकर समुद्रमे प्रवेश करते हैं तैसेही ये नरलोकके वीर सकल ज्वालसमान तुमारे मुखमे पैठत जात हैं २८

चौपई

जैसे नदीके बहु जल वेगहि सागर सनमुख यह सम चलहि॥
तिमि यह भूमिलोकके वीरा तव मुख ज्वलित प्रवेश अधीरा २८

यथाप्रदीप्तंज्वलनंपतङ्गाविशन्तिनाशा
यसमृद्धवेगाः तथैवनाशायविशन्ति
लोकास्तवापिवक्त्राणिसमृद्धवेगाः २९

शाङ्करभाष्यटीका· १

ते किमर्थं प्रविशन्ति कथंचेत्याह यथेति यथा प्रदीप्तं ज्व
लनं अग्निं पतङ्गाः पक्षिणोविशन्ति नाशाय विनाशाय समृद्ध
वेगाः समृद्धः उद्भूतोवेगोगतिर्येषां ते समृद्धवेगाः तथैव ना
शाय विशन्तिः लोकाः प्राणिनस्तवापि वक्त्राणि समृद्धवेगाः २९

आनन्दगिरिकृतटीका· २

प्रवेशप्रयोजनं तत्प्रकारविशेषञ्चोदाहरणान्तरेण स्फोरयति
ते किमर्थमित्यादिना २९

स्वामिकृतटीका· ३

अवशत्वेनप्रवेशेनदीवेगादृष्टान्तउक्तः बुद्धिपूर्वकप्रवेशेदृष्टा
न्तमाह यथेतिप्रदीप्तंज्वलनमग्निंपतंगाःशलभाबुद्धिपूर्वकंस
मृद्धोवेगोयेषांतेयथानाशायमरणायैवविशंतितथैवलोकाए
तेजनाअपितववक्त्राणिप्रविशंति २९

पिशाचभाष्यटीका· ४

स्पष्टार्थं २९ ॥ ॥ ॥

रामानुजभाष्यटीका· ५

[illegible]प्रदीप्तंज्वलनमिवचपलभास्तववक्त्राण्यभिज्वलंति
स्वयमेवत्वरमाणाः आत्मनाशायविशंति २९

अभिनवगुप्तकृतटी· ६

स्पष्टार्थं २९ ॥ ॥ ॥

परमार्थप्रपासीटीका· ७

तथायेत्वमभिज्वलेतिअभितोज्वलमानानिवक्त्राणिविशंतितेयथा
बुद्धिपूर्वकंसमृद्धोवेगोयेषांतेशलभाः पतंगानाशायसम्यक्प्र
दीप्तेज्वलनेविशंतितथैवलोकास्तदनुवर्तिनोपितववक्त्राणिवि
शंति २९

वनमालीटीका· ८

अबुद्धिपूर्वकप्रवेशेनदीवेगंदृष्टान्तमुक्त्वाबुद्धिपूर्वकप्रवेशेदृष्टान्त

१ श्री॰ गी॰टी॰ प

माहृ यथेतियथापतंगाः शलभाः समृद्धवेगाः संतोबुद्धिपूर्वकं
प्रदीप्तंज्वलनंविशंतिनाशायमरणायैव तथैवैतेलोकाउर्योध
नादयःनाशायविशंतिसर्वेपिनाशायविशंतिसर्वेपिनाशायत
ववक्त्राणिसमृद्धवेगाः बुद्धिपूर्वकप्रवाहेण विशंति २९

क्नमवैजयन्तीटी ९

किंवाअत्रदृष्टांतमाहृ यथाप्रदीप्तमिति यथात्मनाशायात्मविनाशा
येवसमृद्धवेगाः समृद्धः समधुरोवेगोयेषांतेतथासंतःपतंगाः
शलभाः प्रदीप्तंप्रज्वलितंज्वलनमनलंविशंतितथात्मविनाशाये
वसमृद्धवेगाः लोकादुर्योधनप्रभृतयःसर्वेपितेजनास्तवविश्वा
कारस्यवक्त्राणिमुखानिप्रविशंति अत्रप्रवेशनज्ञानपूर्वकप्रवेश
नेदृष्टांतेवोध्यः २९

मधुसूदनीटीका॰ १०

अबुद्धिपूर्वकप्रवेशेनदीनांवेगंदृष्टांतमुक्त्वाबुद्धिपूर्वकप्रवेशेदृष्टांत
माहृ— यथापतंगाः शलभाः समृद्धवेगाः संतोबुद्धिपूर्वंप्रदीप्तंज्वलनं
विशंतिनाशायमरणायैव तथैवनाशायविशंतिलोकाः पतेदु
र्योधनप्रभृतयः सर्वेपितववक्त्राणिसमृद्धवेगाबुद्धिपूर्वमना॰
यमा [illegible]
[illegible] २९

सदानंदी टीका॰ ११

यथापतंगाउद्धतवेगास्तेबुद्धिपूर्वकं विशंत्यग्निंज्वलंतेचस्वना
शायतथैवते १ दुर्योधनादयःसर्वेवेगवंतोमुखानिते मरणा
यविशंतीमेबुद्धिपूर्वंप्रवाहतः २९

नीलकंठी टीका॰ १२

बुद्धिपूर्वकमेवतेतवक्त्राणिप्रविशंतीतिसदृष्टांतमाहृ यथाप्र
दीप्तमिति २९

आनंदीटीका स्पष्टार्थम् २९

रामकंठीटीका

पतन्त्र्लोकपंचकेनिगदितव्याख्यानप्रायंकिंत्वतववक्त्राणिविशंतीति
वहुवचनेनदंष्ट्राकरालानीत्यादिविशेषणविशिष्टानिवक्त्राण्युपक्रम्या
विंत्वरूपंवक्त्रेतवाविशंति इतियदुक्तंतत्रकालरूपस्येवपिनोवारा

कृतिविशेषरूपानानाविधशास्त्रप्रयोजकस्य तदीयायां परस्य सामान्यश
ब्दोपदिशामंति इति भगवतः सर्वशास्त्राश्रयत्वप्रतिपादनपरे बोद्धव्यम्
यत्तु पकवक्त्रशब्देन प्रतिपादितायाः सामान्यशक्तेरव्यपदेश्यत्वादचिंत्य
रूपत्वेन विशेषणमनुक्तम् तथाहि इमेतवक्त्रशरीरेत्यनेन तदेवस्फुटीकृतं
मत्र श्लोकपंचके सार्धे नानारूपैरित्यादितववक्त्रशरीरं प्रविशन्तीत्यंते श्लो।
कसार्धकं श्लोकसामर्थ्येन पठंतिकेचित् कश्चित्तवरेणमानिहतान्न
मित्यादिश्लोकार्धमनेनाभिप्रायेणानपठंतीह तववक्त्रस्कलकदर्शनाश्च
रेतेच तत्र सार्धश्लोकप्रमाणयत्नाद्यासम्मतेः श्लोकपंचकं सार्धमेव पठि
तं २९ [illegible]

लासिकी [illegible]टीका सप्तार्थः [illegible] २९ वेवश्यपनप्रवेशेनदीवेगहष्टांत
ऋकाखातंअएकेषांचिद्योधकत्वा नांप्रवेशेहष्टांतमाह ॥

पंचोलीटीका

अवश्यत्वेन प्रवेशे नदीशशात्वेगहष्टांत उक्तः बुद्धिपूर्वकप्रवेशे
समयोजनदृष्टांतमाह यथाप्रदीप्तमिति यथासमृद्धवेगाः अ
तिरहसायुक्ताः पतंगाःशलभाप्रदीप्तंज्वलनमग्निं नाशायविशं
ति तथैवलोकाः प्राणिनः नाशायसमृद्धवेगाः तववक्त्राणिविशं
ति २९

रागवीरसमिद्धोयिनी ॥

यथेति यथाप्रज्वलितदर्शने प्रदीप्तं नाशस्य स्थानं ज्वलनं शि
खावंतं पतंगाः पक्षिविशेषाः समृद्धवेगा अपि नाशाय स्वा
त्मानं स्वयमेव नाशयितुं यथा विशंति तथैव लोकाः समृद्धवे
गाः प्रबला अपि तववक्त्राणि नाशाय विशंतीति २९॥

मधुभाष्य

२९

भाषा अनुवाद

वेवश रूप प्रवेश मे नदी का दृष्टान्त कहि कर अव वुद्धि पू
र्वक प्रवेश करने मे दृष्टान्त करते हैं कि जैसे वड़े वेग औ
उत्साह से पतङ्ग जो पांखी ते नाशके निमित्त दीप शिखामेजा
य गिरते औ मरते हैं तैसेही अति वेगसे ये सव वीर मनुष्य
नाशके अर्थ तुमारे मुख मे आय कर प्रवेश करते हैं २९

चौपई

ज्वलित अग्निमे सलभ प्रवेशैं नाशहि को निज जव युत जैसें
तिमि सम मुखन तवमाहि समाहि बहुत वेगकर लोक हि
जाहि २९ ॥

a4

लेलिह्यसे ग्रसमानः समन्ताल्लोकान् समग्रान् वदनैर्ज्वलद्भिः तेजोभिरापूर्य जगत्
म॰ स॒ग्रं भासस्तवोग्राः प्रतपन्ति विष्णो ॥

शाङ्करभाष्यटीका १

तं पुनः लेलिह्यस इति लेलिह्यसे आस्वादयसि ग्रसमानोऽन्तः प्रवेशयन् समन्तात् समन्ततो लोकान् समग्रान् समस्तान् वदनैर्वक्त्रैर्ज्वलद्भिर्दीप्यमानैस्तेजोभिरापूर्य संव्याप्य जगत् समग्रं सहाग्रेण समस्तमित्येतत् किञ्च भासो दीप्तयस्तवोग्राः क्रूराः प्रतपन्ति प्रतापं कुर्वन्ति हे विष्णो व्यापनशील ॥

नं आनन्दगिरिकृतटीका २

योद्धुकामानां राज्ञां भगवन्मुखप्रवेशप्रकारं प्रदर्श्य तस्यां दशायां भगवतस्तद्भासां च प्रवृत्तिप्रकारं प्रपञ्चयति तं पुनरिति भगवत्प्रवृत्तिमेव प्रपञ्च्य तदीयभासां प्रवृत्तिं प्रकटयति किञ्चेति ॥

स्वामिकृतटीका ३

ततः किं भवत्यत आह लेलिह्यस इति ग्रसमानो गिलन् समग्रांल्लोकान् सर्वानेतान्वीरान् समन्तात् सर्वतो लेलिह्यसेऽतिशयेन भक्षयसि कैः ज्वलद्भिर्वदनैः किं च हे विष्णो तव भासो दीप्तयस्तेजोभिः विस्फुरणैः समस्तं जगत् व्याप्य तीव्राः सत्यः प्रतपन्ति सन्तापयन्ति ॥

पिशाचभाष्यटीका ४

लेलिह्यसे स्पर्शमास्वादयसि ॥

रामानुजभाष्यटीका ५

लेलिह्यस इति राजलोकान् समग्रान् ज्वलद्भिर्वदनैः समन्ततः कोपवेगेन ग्रसमानः तद्रुधिरासक्तमोष्ठपुटादिकं लेलिह्यसे पुनः पुनर्लेहनं करोषि तवातिघोरा भासो रश्मयः तेजोभिः स्वकीयैः प्रकाशैर्जगत् समग्रमापूर्य प्रतपन्ति ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थः ॥

१ श्री गी टी ५ 05

परमार्थप्रपाटीका ७

लेलिह्यसइति समग्रान् लोकान् समन्ततो वदनैर्ज्वलद्भिः ग्रस
मानः गिलन् सन् उनरत्वं मां लेलिह्यसे हे विष्णो स्वभासो विभो वि
स्रो व्यापनशीलतव भासो दीप्तयस्तेजोभिः स्फुरणैः समस्तं जगदा ६
पूरी उग्राः सत्यः प्रतपन्ति तापयन्तीति अत्र पूर्वोपक्रान्तात्स्मरे वेदे श्रुति
रपि रक्षोहणं वाजिनमाजिघर्मि मित्रं प्रथिष्ठमुपयामि शर्म शि
शानोऽग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तं १ अयो
दंष्ट्रो अर्चिषा यातुधानानुपस्पृश जातवेदः समिद्धः आजिह्वया
मूरदेवान् रभस्व क्रव्यादो वृक्त्व्यपि धत्स्वासन् २ भाष्यं रक्षोहणं
मिति पंचविंशत्यृचं सूक्तं -- भरद्वाजऋषिः अनुक्रान्तं च र
क्षोहणं पंचाधिका विंशतिः संख्या अभिरक्षणे परिहारे विनियोगः
जप्यमिति सर्वानुक्रमः तत्र प्रथमा रक्षोहणमिति रक्षोहणं रक्षसां
हन्तारं वाजिनं बलवन्तं वा अग्निमाजिघर्मि ---- अग्निं वैश्वानरा
ख्यं विश्वरूपमेवमाजिघर्मि घृतेन जुहोमि प्रदीप्तं तीक्ष्णीकरो
मीत्यर्थः किं च मित्रमभजतामनुकूलं प्रथिष्ठं पृथुतरं व्यापकं शर्म
शरणमुपयामि सोऽयमग्निः शिशानो ज्वालाभिस्तीक्ष्णीभूतः क्रतु
भिः कर्मपरैः पुरुषैः प्रज्वालितः किं च सोऽग्निर्नोऽस्मान् दिवा अहनि रि
षो हिंसकाद्रक्षसः सकाशात्पातु रक्षतु अथ द्वितीया हे जातवेदः
वैश्वानरेश्वर त्वं समिद्धः सम्यग्दीप्तः अयोदंष्ट्रः लोहशलाकावत्ती
क्ष्णा दंष्ट्राः सन् यातुधानान् अर्चिषा ज्वालया उपस्पृश दहेत्यर्थः
किं च त्वं मूरदेवान् मूलदेवान् राक्षसान् जिह्वया ज्वालया रभस्व
मारयेत्यर्थः मारयित्वा च क्रव्यादो मांसभक्षकान् वृक्त्वि छित्त्वा आस
न् आसे पिधत्स्व आच्छादय [illegible]
[illegible]

वनमालीटीका ८

भगवतस्तत्त्वं चोग्रत्वं प्रकारमाह लेलिह्यस इति पर्वे वेगेन
प्रविशतो लोकान् दुर्योधनादीन् समग्रान् सर्वान् ग्रसमानोऽन्तः प्रवेशय
न् ज्वलद्भिर्वदनैः समन्तात् सर्वतस्त्वं लेलिह्यसे आस्वादयसि तेजोभि
र्भाभिरापूर्य जगत्समग्रं यस्मात्त्वं भाभिर्जगदापूरयसि तस्मात्त
वोग्रा तीव्रा भासो दीप्तयः प्रज्वलतो ज्वलनस्येव प्रतपन्ति सन्तापयन्ति

यंति हे विष्णो सर्वव्यापक १

हनुमद्वैजयन्तीटीका· ४

एवं योद्धृणां राज्ञां भगवन्मुखे प्रवेशप्रकारमाह इदानीं भगव
तो भगवद्ग्रासं च तत्रप्रवृत्तिप्रकारमाह लेलिह्यस इति ज्व
लद्भिः प्रज्वलमानैर्वदनैः समन्तात्कोपावेशेन सर्वतः स
मग्रान्समस्तान्लोकान्प्रतिवेगेन वक्त्राणि प्रविशतो
दुर्योधनादियोद्धृजनान्ग्रसमानो गिलन्सन्लेलिह्यसे क
थिरोत्तितात्कृपणाधरादिकं पुनः पुनर्लेलिहि हे विष्णो व्यापन
शील तेजोभिरापूर्य यत्समग्रं यस्मात्तेजोभिर्दीप्तिभिस्त्वं सम म
ग्रं जगदापूर्य स्थितोसि तस्मात्तवोग्राः प्रतिघोराः भासो दीप्त
यः प्रतपन्ति प्रज्वलतो ज्वलनस्येव संतापं जनयन्ति यद्वा हे
विष्णो तवोग्राः प्रतितीव्रा दीप्तयस्तेजोभिः स्वकीयैर्मरीचिभि
र्जगदापूर्य परिपूर्णीकृत्य प्रतपन्ति स्वयमेव प्रकाशते १

मधुसूदनीटीका· ९

योद्धृकामानां राज्ञां भगवन्मुखे प्रवे शप्रकारमुक्त्वा तदा भगवतस्तद्ग्रासं च प्रवृत्तिप्रकार
माह एवं वेगेन प्रविशतो लोकान् दुर्योधनादीन्समग्रान्सर्वान्
समग्रान्सर्वान् ग्रसमानः अन्तः प्रवेशयन्ज्वलद्भिर्वदनैः
समन्तात्सर्वतस्त्वं लेलिह्यसे ज्वलनस्येव प्रतपन्ति संतापं
जनयन्ति हे विष्णो व्यापनशील [illegible] १

आस्वादयसि तेजोभिर्भाभि
रापूर्य जगत्समग्रं यस्मात्त्वं
भाभिर्जगदापूरयसि तस्मा
त्तव उग्रा तीव्रा भासो दीप्त
यः प्रज्वलतो

सदानन्दीटीका· ११

त्वयाणां युद्धकामानां श्रीमद्भगवतो मुखे प्रवेशप्रकारं प्रोच्य
तदा भगवतो हरेः १ तद्ग्रासं सम्प्रवृत्तेस्य प्रकारमाह पोऽस्वः
आस्वादयसि तान्सर्वान्दुर्योधनमुख्यान्नृपान् २ ग्रसमानो निवे
गेन विशतस्त्वं समन्ततः अन्तः प्रवेशयन्वक्त्रैः प्रज्वलद्भिः रा
तस्तेवदीप्तयस्तीव्रवक्त्रा भाः संतापं जनयन्त्यमूः ४ १

नीलकण्ठीटीका· १२

येवं प्रनेनतस्तोस्तकरुणावानपि न वारयितुमीशमनस्मितसि ४ नुमिकं
छ्वस्येवेत्याह लेलिह्यसे भूयोभूयोतिशयेनवास्वादयसि की
दृशस्त्वं समन्तात्ज्वलद्भिर्वदनैर्लोकान्समग्रान्ग्रसमानः
एवं निर्घृणस्यापि तव तेजो न हीयते प्रत्युत वर्द्धत एवेत्याह
तेजोभिरिति हे विष्णो व्यापनशील समग्रं जगत्तेजोभिरा

पूर्यंतव उग्राः स्पष्टमशाकया भासो दीप्तयः प्रतपंतीति योज
ना पदार्थःस्पष्टः ३०

आनंदटीका स्पष्टार्थम् ३०

रामकंठटीका स्पष्टार्थम् ३०

अथ तथाविधं घोररूपं भगवतः शांकिं दृष्ट्वा तत्तत्त्वजिज्ञासार्थमिदमाह ३०॥

लासिकी वसंतटीका

किंच ज्वलद्भिर्वदनैः सर्वांल्लोकान्समंताद्ग्रसमानो भक्षयन् लेलिह्यसे आस्वादयसि हे विष्णो व्यापक तव कालरूपस्य दीप्तयः संहारकारणीभूतास्तेजोभिर्विस्फुरणैः समग्रं जगद्व्याप्योग्रास्तीव्राः सदाः प्रतपंति आध्यात्मिकादितापत्रयपरिणामेन संप्रति क्लेशयंतीत्यर्थः ३०॥

पंचोलीटीका

भगवतश्चेष्टितमाह लेलिह्यस इति हे विष्णो त्वं ज्वलद्भिर्दीप्यमानैः वदनैः समग्रान्लोकान्समंतात् ग्रसमानः अंतः प्रवेशयन् लेलिह्यसे आस्वादयसि तव उग्राः क्रूराः भासो दीप्तयः स्वतेजोभिः समग्रं जगदापूर्य प्रतपंति संतापयंति ३०॥

बालावीरसमिद्धोधिनी॥

इदानीं तद्दृष्टं संतीमूर्तिं स्तौति लेलिह्यसे इति विष्णो त्वमेव समग्रांल्लोकान्समंतात्सर्वावयवतो ज्वलद्भिर्वदनैर्ग्रसमानः सन् लेलिह्यसे आस्वादयसि अथ च तवोग्रा घोरा भासश्च समग्रं सकलमिदं जगत्स्वतेजोभिरापूर्य प्रतपंति संतापयंति चेति ३०॥

मधुभाष्य

॥ ३०॥

भाषा अनुवाद

और प्रवेश के अनन्तर फेरि का होता सो कहतेहैं कि तुम भी अति भयानक जिह्वा लहलहाते हुये मानो त्रैलोक्य लीलवे को रसना पसारी हैं अपने तेजसे समस्त जगत को सन्तप्त करते भये उन सब वीरों को ग्रास करि भक्षण करनेकी इच्छाकरते हो ३०

चौपाई

चारु तरफसें ग्रसत अरु स्वादत मुखप्रदीप्तसें सब लोक दिखा
वत तेजहिसें जग पूर्ण करता तेरे तेज तपावें करता ३०॥

आख्याहि मेकोभवानुग्ररूपोनमोऽस्तुते देव वरप्रसीद विज्ञातुमिच्छामिभवन्तमाद्य नहिप्रजानामितवप्रवृत्तिं ३१

शांकरभाष्यटीका १

यतएवमुग्रस्वभावोऽतः आख्याहीति आख्याहि कथयमे मह्यं कोभवानेवमुग्ररूपः प्रतिक्रूराकारोनमोस्तु ते तुभ्यं हे देवव र देवानां प्रधान प्रसीद प्रसादं कुरु विज्ञातुं विशेषेण ज्ञातु मिच्छामिभवन्तमाद्यमादौ भवमाद्यं न हि यस्मात् प्रजानामि त व त्वदीयां प्रवृत्तिं चेष्टां ३१

आनन्दगिरिकृतटीका २

भगवद्रूपस्यात्युग्रत्वेन दृष्टपूर्वत्वात्तस्य तस्मिन्नजिज्ञासेत्याशंक्या ह यतइति उपदेशं शुश्रूषमाणेनोपदेशकर्तुः मह्यंभवते क थ्यमिति सूचयति नमोऽस्त्विति कोपत्यागं समर्थयते प्रसादमि ति त्वमेवमां जानीषे किमर्थमित्यमिदानीमर्थ्यसे मदीयां चे ष्टां दृष्ट्वा तैवव प्रतिपद्यस्वेत्याशंक्याह न हीति ३१

स्वामिकृतटीका ३

यतएवंतस्मात् आख्याहीति भवानुग्ररूपःकइत्याख्याहि कथय तुभ्यंनमोस्तुहेदेववरप्रसन्नोभव भवन्तमाद्यंपुरुषंविशेषेण ज्ञातुमिच्छामि यतस्तवप्रवृत्तिंचेष्टांकिमर्थमेवप्रवृत्तोसीतिन जानामिएवंभूतस्यतवप्रवृत्तिंवार्त्तामपिनजानामीतिवा ३१

पैशाचभाष्यटीका ४

स्पष्टार्थं ३१ ॥

रामानुजभाष्यटीका ५

आख्याहीति दर्शयात्मानमव्ययमितितवैश्वर्यंनिरंकुशंसाक्षात् कर्तुंप्रार्थितेनभवतानिरंकुशमैश्वर्यंदर्शयतातिघोररूपमिदमा विष्कृतं अतिघोररूपः कोभवान्किंकर्तुंप्रवृत्तइतिभवन्तंज्ञातु मिच्छामितवाभिमतांप्रवृत्तिंनजानामि एतदाख्याहिमेनमोस्तु तेदेववरप्रसीदनमस्तेस्तुसर्वेश्वरएवंकर्तुमनेनाभिप्रायेणेदंघो ररूपमाविष्कृतमित्यस्मात्प्रसन्नभवआश्रितवात्सल्यातिरेके

३१ न विश्वैश्वर्यं दर्शयतो भगवतो घोररूपाविष्कारे कोऽभिप्राय इति पृष्टो
भगवान् पार्थसारथिः स्वाभिप्रायमाह पार्थ योगेन विनापि यथा न
राष्ट्रसमृद्धविशेषं राजलोके निर्दहन्तमहमेवं प्रवृत्त इति ज्ञापनाय म
मद्घोररूपाविष्कारः न तु त्रासनेन पार्थं प्रयोजयति

अभिनवगुप्तकृतटीका ६

नवग्रहवृत्तिं न वेद्मि केनाशयेनेदृशीयं प्रवृत्तिस्तवेति तत्र भगवतोत्तरं न
गतो विद्याविद्यात्मनः शुद्धाशुद्धमिश्रसंविद्बलग्रासिकरणाद् अभिधी
यत इति प्रायशः सुविनमत्राध्याये रहस्यं द्रष्टुं हि किं तमात्रं संविन्निमम
र्थेभ्यो लक्षयं क्लिश्यन्ते विनार्यसदैः स्थितमालक्ष्यमहि अत्र यद्वु
क्तं मयाहं तेषु तेनिमित्तं यशोभीभवेति भगवतानतन्त्वं प्राग्भ
नेन न चैतद्विद्मः कतरदित्यादि ३१

अथ भविष्यदर्थदर्शनादाह **परमार्थप्रपाटीका** टी॰ ७ एवं वापुनः पृच्छति आख्याहीति ॥

उग्ररूपो भवान् इति मे आख्याहि कथय यस्त्वं ते तुभ्यं नमोऽस्तु हे देवव
र प्रसन्नो भव भवन्तमाद्यं पुरुषं विशेषेण ज्ञातुमिच्छामि यतो दृ
ष्टेपि रूपे न वस्तुतः किमर्थं प्रवृत्तोऽसीति न वद्वेष्टा न जानामि ३१

वनमालीटीका ८

अतिभीतः संभ्रमादाह आख्याहीति एवमुग्ररूपोतिक्रूराकारः को भ
वान् वासुदेवः सर्वेषां जगदुदयादिकर्तारं चतुर्भुजं सर्वदा जानामि अथ
मैश्वर्यविशेषस्त्वया विष्कृतो मया कदाचिदपि न दृष्टस्तमाख्याहि कथय
मे महामनःसंतापानुग्रहाय अतएव नमोस्तु ते तुभ्यं सर्वेश्वरेश्वरे हे देववर प्रसी
द विज्ञातुं विशेषेण ज्ञातुमिच्छामि भवन्तमाद्यं सर्वकारणं हि यतस्त
व प्रवृत्तिमभिप्रायं न जानामि मया तु तेश्वर्यं दृष्टं प्रार्थितं भवता तु सर्व
लोकसंहारकमतितीव्रानन्तेयमविशिष्टं प्रकटितं प्रलयकालस्येदा
नीमभावात्किमर्थं प्रकटितमिति भावः ३१

कुसुमवैजयन्तीटीका ९

दर्शयात्मानमव्ययमित्यादिना तव निरंकुशैश्वर्यं विश्वरूपं द्रष्टुं म
यात्वं प्रार्थितोसि न तु महाघोरमिदं द्रष्टुं तस्माद्यदिदं त्वया धृतं तत्स्वरू
पं तद्धारणप्रयोजनं च ज्ञातुमहमिच्छामीत्याह आख्याहीति ईदृशोग्र
रूपः क्रूराकारो भवान् को भवति मम मह्यमेतदाख्याहि नु कथय हे
देववर सर्वश्रेष्ठ ते तुभ्यं सर्वेश्वराय नमः प्रणामोस्तु प्रसीद घोररूपमा

गं प्रसादं त्वं कुरु हि यस्मात्तव प्रवृत्तिं प्रसिद्धयोगमायप्रवृत्तोऽसी
त्यभिप्रायस्तद्रूपं तो चेष्टां न प्रजानामि तव सत्त्वोऽपि सन्न हेनैव चित्तस्मा
दाद्यं कारणं भवन्तं सर्वेश्वरं विज्ञातुं विशेषेण ज्ञातुमिच्छामि सर्वमेत
दाख्याहि ३१

मधुसूदनी टीका· १७

यस्मादेवं तस्मात्

एवमुग्ररूपः क्रूराकारः को भवानित्याख्याहि कथय मे मह्यमत्यन्तानु
ग्रहणाय प्रत्त एव नमोऽस्तु ते तुभ्यं सर्वगुरवे हे देववर प्रसीद प्रसा
दं क्रौर्यत्यागं कुरु विज्ञातुं विशेषेण ज्ञातुमिच्छामि भवन्तमाद्यं सर्व
कारणं न हि यस्मात्तव स्वत्वोऽपि सन् प्रजानामि तव प्रवृत्तिं चेष्टां
[illegible]
३१ ॥ ॥ ॥

सदानदी टीका· ११

को भवानुग्ररूपस्त्वं मे त्वं कथय सङ्केतो अत एव नमस्तुभ्यमस्तु सर्वे
श्वराय च १ प्रसन्नो भव भक्तायानुग्राह्याय आदिदेव त्वं भवन्तं ज्ञा
तुमिच्छामि सर्वेश्वरं विशेषतः २ तव चेष्टां न जानामि यस्मात्तव
सत्त्वोऽपि सन् ३ ३१

नीलकंठीकाटी· १२

एवं दीप्त्याकुलीभूतोऽर्जुनो भगवानयमिति विस्मृत्याह आख्या
हीति एवमुग्ररूपः क्रूरकर्मा भवान् कोऽसीत्याख्याहि प्रभुकोऽ
सीति कथय प्रसीद प्रशान्तो भव त्वामहं विज्ञातुमिच्छामि यत
स्तव प्रवृत्तिं चेष्टां न जानामि ३१ ॥

ज्ञानेरीटीका

प्रसीद क्रूरमाकारं त्यक्त्वा को भवानुग्ररूप इत्याख्याहि [illegible]
[illegible] ३१

रामकंठीटीका

इमान्समग्रांल्लोकान्समन्तात्सर्वतोज्वलद्भिर्वदनैस्त्वानलैर्मुखैर्ग्रसमा
नः कवलवल्लेलिह्यसे भीतो लेह्यास्वादयस्य एवं तवोग्राभासो घोर
रौद्रः समस्तं विश्वं तेजोभिर्व्याप्य प्रतपद्देदीप्यते यत एवं परमप्र
पन्नं तव विन्माज्ञस्वभावमत एव घोरं रूपं पश्यामि ततो देववर त्वरोऽन्नमत।
भ्यं नमः प्रसादं कुरु को भवानुग्ररूपः संहर्तेति मह्यमाचक्ष्व यस्मान्नैव

श्री॰
गी॰टी॰
५
९५

वंविधघोररूपग्रहणेप्रवृत्तिंप्रसवंनजानामि न ततो नावगच्छाम्य
तस्त्वाद्यंपरमकारणंभवंतंज्ञातुंविशेषेणबोद्धुमिच्छामि [illegible]
[illegible]
[illegible]

लाक्षिकी वंसगमीटीका

यतएवंतस्मात्वंक्रूराकारः कस्त्वमाख्याहि कथय तेतुभ्यंनमोस्तु हे
देववरप्रसीदप्रसन्नोभव आद्यंसनातनमीश्वरंविज्ञातुंविशेषेण
सामान्याकारतयावेदितुमिच्छामि यतस्तवैश्वरस्यैवंविधामति
क्रौर्यफलांसानात्किंयमाणांप्रवृत्तिंप्रसरंकिमर्थमेवंप्रवृत्तोसीतिन
प्रजानामि [illegible] ३१ ॥

पंचोलीटीका

यतएवमुग्रस्वभावस्त्वमतःस्वस्वरूपंकथयेत्याह आख्याहीति
हेदेववरमेमह्यंआख्याहि उग्ररूपः क्रूराकारोभवान्कः तेतुभ्यंन
मोस्तुप्रसीदभवंतंत्वांआद्यंविज्ञातुमिच्छामिहियस्मात् तवप्रवृ
त्तिंचेष्टांनजानामि ३१

रणवीरप्रसिद्धोयिनी

अथ पुनरपिप्रार्थनांकरोति आख्याहीति देववर नमोस्तुते
प्रसीदेति प्रथमंभगवंतंप्रसाद्यानंतरंप्रार्थनापूर्वकंपृच्छति
उग्ररूपोभवान्कोसीतिमेमह्यमाख्याहि प्रब्रूहीति यतश्चाद्यं
भवंतमादिमादिकारणंविज्ञातुमिच्छामीति ननुकिंमांप्रार्थ
यसेस्वयमेवजानीषेइत्याशंक्याह नहीति तवप्रवृत्तिंप्रसरंच
नोनजानाम्यनादित्वादतएवभवंतंपृच्छामीतिभावः ३१॥

मधुभाष्य

३१॥

भाषा अनुवाद

हे महाराज जिससे तुमारा ऐसा उग्ररूप है इससे आप कोहो
सो कही और हम तुमको प्रणाम करते हैं हे देव श्रेष्ठ तुम
मेरे पर प्रसन्न होउ और आदिपुरुष जो तुम सो तुम को मैं
जाना चाहता हूं और पूर्व भूत जो तुम तुमारी प्रवृत्ति करे
वाली कुछ भी हम नहीं जान शकते हैं ३१

चौपई

कोतुम उग्ररूप मोहु कहहूं तोहि नमोस्तु देववर इवहूं
तोकों आदि हि जानन चहहौं माया तव नहि बूझत अह
हौं ३१

श्रीभगवानुवाच कालोस्मिलोकक्षयकृत्प्रवृ
द्धोलोकान् समाहर्तुमिह प्रवृत्तः ऋतेपि त्वां
नभविष्यन्तिसर्वे येऽवस्थिताः प्रत्यनीकेषु
योधाः ३२

शाङ्करभाष्यटीका·

कालोस्मीति कालोस्मि लोकक्षयकृत् लोकानां क्षयं करोतीति लो
कक्षयकृत प्रवृद्धो वृद्धिं गतो यदर्थं प्रवृद्धस्तच्छृणु लोकान् समा
हर्तुं इह अस्मिन् काले प्रवृत्तः ऋतेपि विनापि त्वा त्वां न भविष्य
न्ति भीष्मद्रोण कर्णप्रभृतयः सर्वे येभ्यस्तवाशङ्का येवस्थिताः प्र
त्यनीकेष्वनीकमनीकं प्रति प्रत्यनीकेषु प्रतिपक्षभूतेषु अनीके
षु योधा एव योद्धारः ३२

आनन्दगिरिकृतटीका· २

यदर्था च त्वत्प्रवृत्तिः तत्सर्वं भगवानुक्तवानित्याह भगवानिति
कालः क्रियाशक्त्युपहितः परमेश्वरः अस्मीति वर्तमानयुद्धे
प्रवर्तितत्वं कालस्य विवक्षितं लोकसंहारार्थं त्वत्प्रवृत्तावपि
त्वामावध्यवतां प्रतिपक्षाणां भीष्मादीनां मत्प्रवृत्तिं विनापि संह
र्तुमशक्यत्वादित्याशंक्याह ऋतेपीति ३२

स्वामिकृतटीका ३

एवंप्रार्थितःसन् श्रीभगवानुवाच कालोस्मीति त्रिभिः लोकानांक्ष
यकर्ता प्रवृद्धोत्युग्रःकालोस्मिलोकान्प्राणिनःसंहर्तुंइहलोकेप्र
वृत्तोस्मिअतऋतेपित्वाइतित्वत्तोविनापिनभविष्यन्तिनजीवि
ष्यन्तिकेतेप्रत्यनीकेष्वनेकास्वनेकानिप्रतिभीष्मद्रोणादीनांस
र्वासुसेनासुयेयोद्धारोवस्थिताःतेसर्वेपि ३२

पैशाचभाष्यटीका· ४

अनेनस्ववचनेनकृतान्तस्यान्तरं श्रीभगवानुवाच कालोस्मीति लो
कानिहमञ्जरीरेसमाहर्तुं पिण्डीकर्तुंप्रवृत्तःऋतेपित्वामन्तरेणापि
नभविष्यन्ति ३२

रामानुजभाष्यटीका·

श्रीभगवानुवाच कालोस्मीति कलयति गणयतीति कालः सर्वेषां

श्री॰
गी॰ टी॰
५

धार्तराष्ट्रप्रमुखानां राजलोकानामवसानं गणयन्नहं तत्क्षयं कर्तु
घोररूपेण प्रवृद्धो राजलोकान्समाहर्तुमाभिमुख्येन संहर्तुमिह
प्रवृत्तोऽस्मि अतो मत्संकल्पादेव त्वामृतेऽपि त्वद्युद्योगादृतेऽपि एते
धार्तराष्ट्रप्रमुखाः स्वस्वप्रत्यनीकेषु ये व्यवस्थिता योधास्ते सर्वे न भवि
ष्यन्ति ३२

॥ अभिनवगुप्तकृतटीका ९ ॥

स्पष्टार्थं ३२ ॥

परमार्थप्रपाटीका ७

एवं प्रार्थितः सन्भगवानाह कालइति प्रकर्षेण प्रवृद्धो वृद्धिं प्रा
प्तो लोकक्षयकृज्जगत्संहारकः कालः सन्लोकान्समाहर्तुमेव प्रवृत्तो
स्मि तदेवाह ये प्रत्यनीकेषु अनीकाः प्रत्यनीकानि प्रति प्रमुखभूपतिसे ने
नामध्ये अवस्थिताः सन्नद्धीभूता योधाः सुभटास्ते सर्वे न भविष्यन्ति
न जीविष्यन्ति तर्हि मम गतिः कस्याह त्वामृतेऽपि त्वां विना न भ
क्तः प्रणश्यती मत्कृतत्वात् ३२

वनमालीटीका ८

कलयतीति कालः न तु कलयन् स्वस्य स्थानस्वोऽप्युत्तिलयादेश्यकर्मी
प्रकर्षेण वृद्धः परिपूर्णः अनादिनिधनो वा लोकानां तत्क्षयकृत् सदा व
चकत्रीपीठानीयुगपद्वृत्तनुर्यो धनादीन् प्रमत्तेन संहर्तुमिह प्रवृ
त्तः उग्ररूपः किमर्थमिति प्रश्नपरिहारायोक्तं लोकक्षयकृदित्युग्ररू
पपादयाति ऋतेऽपीति अपिपदात् नेत्राद्यादीनपि विनेत्यर्थः प्रसाद
शासो हि एणीरूपे प्रत्यनीकेषु प्रतिपक्षभूतेषु नीकेषु सेनासु ये व्यवस्थि
तास्ते सर्वेऽपि न भविष्यन्ति नक्ष्यास्यति किं तु मरिष्यन्तीत्यर्थः ३२

हनुमद्वैजयन्तीटीका ५

एवमर्जुनेन पृष्टः पार्थसारथिर्भगवान्स्वरूपं तद्द्वारा प्रयोजनं चाह
त्रिभिः कालोऽस्मीति यस्य बलेन चक्रवर्तिभवत श्रादने स्वस्य
स्योपसेवनकर्मस्यावेदयत्र सर्वस्मादिश्रुतिप्रतिपादितो यः कालः क
लयति सर्वेषां उत्पत्त्यादीन् भूभुजामवसानं गणयतीति तथा स
अहमस्मि अहं भवामि लोकक्षयकृत् लोकानां ब्रह्मादिस्थावरान्ता
स्था नां सर्वेषां जनानां ततः यावर्तनवृत्तयकृत् हिंनाशकरः प्रवृद्धः प्रभुना
तिघोररूपेण वृद्धिं गतः सर्वव्यापी सन् कालः इत्यादिपदत्रयेण कामभ
वानुग्ररूपस्य स्तोत्र सुरुकृमिदानीं तव प्रवृत्तिं न जानामीत्यस्योत्त

न्नरमाहलोकानिति इहास्मिन्कालेत्वेसमयेवालोकान्दुर्योधनादीन्स
ना माहर्त्तुंसम्यगाहर्त्तुंभक्षितुंप्रवृत्तोस्मिपूर्वमेवातिघोराकारदर्श
नादतिभयमुक्तंपुनःसर्वलोकान्भक्षयामीतितदुक्तिश्रवणेनस्वस्या
पिनाशमानयतेशुष्कवदनमर्जुनमवलोक्यतांविहायेतरान्सर्वा
न्भक्षयामीत्याह ऋतेपित्वामितित्वांसखायंभक्तंप्रपिशाय युधि
ष्ठिरादीन्ऋतेविनाप्रत्यनीकेषुप्रत्यनीकोपलक्षितस्वपक्षप्रतिपक्ष
सैन्येष्ववस्थितास्तेनसत्त्वात्स्मदीयेरपियोधमुख्यैर्विराजन्तेकिंऋतेपित्वा
मितिभगवदुक्तिश्रवणंगच्छन्तेऽवस्थिताःयुद्धकरणार्थंसंसन्नद्धमानाः
स्थिताःयेयोधायोद्धारस्तेसर्वेमयाहतत्वादेवनभविष्यन्तिसर्वान्ने
वभक्षयामीत्यर्थः यद्यानत्वंयद्युद्धंकरिष्यामितदेवत्वमेतान्व
धिष्यसिनोचेत्कथमिमेपतायामाह ऋतेपीतित्वांयोद्धारंऋतेपित्वा
त्वांऋतेत्वद्योगाहतेपिविनापिमत्संकल्पादेवैतेसर्वेनभविष्यन्ति
मरिष्यन्त्येवेत्यर्थः ३२ मधुसूदनीटीका ९

ॱॱश्रीभगवानुवाच
कालःक्रियाशक्त्युपहितःसर्वस्यसंहर्तापरमेश्वरोस्मिभवामि इदा
नींप्रवृद्धोहम्इहागतः यदर्थंप्रवृत्तस्तच्छृणुलोकानुदुर्योधनादीन्स ॱएवमर्जुनेनप्रार्थितःयःस्व
ॱयि माहर्त्तुंसम्यगाहर्त्तुंभक्षितुंविनाकथमेवंस्यादितिचेत् नेत्याह ऋ ॱप्रवृत्तोहमिहास्मिन्का
ॱता तेपित्वामर्जुनंयोद्धारंविनापित्वद्व्यापारंविनापिमद्व्यापारेणैवनभवि ले मत्प्रवृत्तिं
ष्यन्तिविनंक्ष्यन्त्येवसर्वेभीष्मद्रोणकर्णप्रभृतयः योत्स्यमानाइवेनसंभा ॱतया
विताःअन्येपियेवस्थितांप्रत्यनीकेषुप्रतिपक्षसैन्येषुयोधाःयोद्धारः
सर्वेपिमयाहतत्वादेवनभविष्यन्तितत्रतवव्यापारोःकिंविकरइ
त्यर्थः [illegible] ३२ सदानंदीटीका ११
एवंसंप्रार्थितोविश्वजित्स्वनातिप्रियेणमः स्वयेयस्वयदार्थांचप्रवृत्ति
स्त्रिभिर्वदन् १ उवाचपरमेश्वरोनिधिःश्रीभगवानिति कालोहंसर्व
संहर्ताक्रियाशक्त्युपहितः सर्वेश्वरोभवामीहेदानींप्रवृद्धिंगतःपरो
लोकानुदुर्योधनादीन्सर्वान्भक्षयितुंवर्हे प्रवृत्तोस्मिजगत्कर्तापाता
संहारकृत्प्रभुः मत्प्रवृत्तिंविनासेवंकथंस्यादितिचेत्क्षणत्वामर्जुनं
विनाशूरंतद्व्यापारंविनापितेमद्व्यापारेणशुद्धेनभीष्मद्रोणादयो
स्थिताः ५ विनंक्ष्यन्त्येतनालोकेसंभाविताअपि येत्वद्गृहवस्थि
ताश्चान्येप्रतिपक्षचमूषुभोः योद्धारस्तेमयासर्वेहतत्वादेवमीनितो
व्यापारस्तवतत्रस्यात्किंचिकरएवहि ३२

नीलकंठीटीका ३२

एवमर्जुनेन प्रार्थितो भगवानुवाच कालइति इहास्मिंस्तंग्रामे लो
कान्समाहर्तुं भक्षयितुं प्रवृत्तः प्रवृद्धो महान् लोकक्षयकृत् कालोना
म परमेश्वरोस्मि यस्मादेवं तस्मात् ऋतेपि त्वां त्वां विनापि सर्वे न भ
विष्यंति मरिष्यंति के ते सर्वे ये प्रत्यनीकेषु शत्रुसैन्येषु योधाः शूराः भी
ष्मादयोऽवस्थिताः ३२

आनंदीटीका

एवं प्रार्थितः स्वस्वरूपं प्रवृत्तिं च श्रीभगवानुवाच पृथिवीभारभूतान् लोकान् संहर्तुं प्रवृत्तः संहारकर्ता कालस्वरूपोस्मीत्य
र्थः ऋतेपि त्वा इति तु यद्यपि त्वं नान्हगायाहं तु नेष्ठामि तथापि मयैते हता
एवेत्यर्जुनप्रोत्साहनार्थम् यद्वा जयेम यदि वा नो जयेयुरिति प्रागुद्दि
ष्टसंशयमपाकरोति ३२

रामकंठीटीका

केन हेतुना कस्त्वमेवंविधो घोररूपो किं वा विधित्सतीति विज्ञासो भगवा
नुवाच॥ कालोस्मीति कर्पस्वस्वरूपाप्रच्छन्नतस्यैव विजृंभमाणशक्तेरयं घोररूप
समग्रशक्तेः कालाख्याया घोरा ममेयं शक्तिरित्यर्थः शक्तेश्च शक्तिमदभे
दादहमेव काल इत्युक्तं कीदृशः कालः सकललोकसंहारैकव्या
पको धनाति इह पृथिव्यां प्रवृद्धा महोद्रिक्तान्पृथिवीभारभूतांल्लोका
निमान् समाहर्तुं क्षयं नेतुं प्रवृत्तः अस्तत्स्मात् त्वदृतेपि त्वां विनापि परि
त्यागपापात्मकत्वात् सर्वं एतेन भविष्यंति त्वय्ययोत्स्यमानेपि विनंक्ष्यंत्ये
व केते योधाः संप्रहारिणः प्रत्यनीकेषु प्रतिपक्षसैन्येषु ये स्थिता यत
एवमेते संत्यवेत्येवावश्यंभावि विनाशेनानुगताः ३२

अत्रोत्तरं श्रीभगवानुवाच लाक्षिकी [illegible]नीटीका

लोकक्षयकर्ता यः कालः स एवास्मि प्रवृद्धो वृद्धिंगतः किमर्थं प्रवृत्तो
सीत्यत्रोत्तरमाह लोकान् प्राणिनः संहर्तुमिह लोके प्रवृत्तोस्मि अतस्त्वा
मृतेपि त्वां हंतारं विनापि त्वय्ययोत्स्यमानेपीत्यर्थः एते सर्वे न भविष्यं
ति विनंक्ष्यति सर्वेषां प्राणिनां विनाशशंकापरिहारार्थमाह ये योधा
प्रत्यनीकेषु सर्वेषु सैन्येषु स्थिताः त एव नंक्ष्यंति [illegible]
[illegible] ३२॥

पंचोलीटीका

एवं प्रार्थितः सन् श्रीभगवानुवाच कालोस्मीति लोकक्षयकृत् लो
कक्षयकारी कालोहमस्मि प्रवृद्धः प्रवृद्धिं प्राप्तः लोकान्समाहर्तुं सं
हर्तुमिह अस्मिन्काले प्रवृत्तः ये प्रत्यनीकेषु अनीकमनीकं प्रति ।
योधाः योद्धारः अवस्थिताः ते सर्वे भीष्मद्रोणप्रभृतयः येभ्यस्त्वाशं
कते सर्वे त्वामृते विना न भविष्यंति ३२

श्रीधरीसुबोधिनी ॥

इत्थमेव प्रार्थितो भगवानर्जुनं प्रत्युत्तरमुवाच कोलास्मीति
अहं तु कालः कालक्रियाशक्तिमान् लोकक्षयकृत् लोकानां क्षयं
करोतीति लोकक्षयकृत् लोकसंहारकः प्रवृद्धः समृद्धतेजा इहा
स्मिन् लोके लोकान्समाहर्तुं प्रवृत्तोस्मि इति तथा हि ये योधाः प्रत्य
नीकेषु पांडुसेनास्ववस्थिताः समवेताः स्थितास्ते सर्वे युद्धे त्वामृतेपि
त्वय्ययोत्स्यमानेपि न भविष्यंति भाविनां न गच्छंत्यथास्त्वयमेव न
श्यंतीति ३२॥

मधुभाष्य

कालरूपो होजगद्बंधनच्छेदनज्ञानादि सर्वं भगवद्धर्मवाची कल
बंधने कलच्छेदने कलज्ञाने कलकामयेत्विति पठंति प्र
सिद्धश्च सर्वमाहो भगवति नियतं कालपाशेन बद्धं सकविवत्य
से स्वयं पुरुषः यथा सो लोकस्य हरति प्रजाः बध्नाति हंति मोचे
दः पश्यन्नरमानयायथेति मोक्षयन् विस्तुनाबद्धो बलिर्वंकि
विसोवाधीश्वरे वितं धारयन्कालविग्रहे इति भागवते प्रवृद्धः
परिपूर्णोनादिर्वा स्मृतं च सत्यं चाभीद्धात् इति श्रुतिः एतन्मद
द्भूतमनंतमिति च प्रविस्तर स्तुत वसस्त वीर्याणि एषम स्याह
रस्येनामेति च न च वर्द्धते नासो जननान न मरिष्यति नैष तेसो
इति हि भागवते यस्य दिव्यं हि तद्रूपं हीयते वर्द्धते न चेति मोक्षधर्मे
न कर्मणातिन कर्मणापि नाकिंचयमिति लोकान्समाहर्तुमिह
विशेषेण प्रवृत्तः भाग्यवती श्रुतं इत्यपि ग्राह्यः प्रत्यनीकेन परस्परं

तथा सर्वेपि न भविष्यंति अतो हिरण्यादिभेदेन बहुवचनं युक्तं
यो स्यासिरशक्तिर्वै भूमौ पातयति न ह्यिरो भेस्यतीति तथापि तद्वैरा
ज्यद्वयोपि विशेषणोक्तः सवर्णवासवी शक्तिरिति कर्णः य
देत हव्यमाणं तस्या नेष्टुक्त मेवेत्यर्थः ॥२२॥

भाषा अनुवाद

इस प्रकार अर्जुन से प्रार्थना किये गये श्रीभगवान तीनि श्लोकसे कहते हैं कि मै सकल लोक का क्षय करनेवाला काल रूपहों और प्राणियों को संहार करने की इच्छा करि इस लोकमें प्रवृत्तभया हों सो एक तुमको छोडि और कोई तुम से नबचैगे अर्थात् प्रति सेना में जो भीष्म द्रोण आदि योद्धा हैं वे सबमरैगे ३२

चौपई

हौंकाल प्रवृद्ध लोकक्षयकारी हरहुं लोकइहलग अवतारी॥
बिना तोहि नहिकोई बचेहैं यो योधे प्रतिसेन रचे हैं ३२॥

104

तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुङ्क्ष्व
राज्यं समृद्धं मयैवैते निहताः पूर्वमेव
निमित्तमात्रं भव सव्यसाचिन् ॥

शाङ्करभाष्यटीका १

यस्मादेवं तस्मात्त्वमिति तस्मात्त्वमुत्तिष्ठ भीष्मद्रोणप्रभृतयोऽति
रथा अजेया देवैरप्यर्जुनेन जिता इति यशो लभस्व केवलं पुण्यै
र्हि तत् प्राप्यते जित्वा शत्रून् दुर्योधनप्रभृतीन् भुंक्ष्व राज्यं समृ
द्धं असपत्नमकण्टकं मया एवैते निहताः निश्चयेन हताः प्राणै
र्वियोजिताः पूर्वमेव निमित्तमात्रं भव त्वं हे सव्यसाचिन् सव्येन
वामेन हस्तेन शराणां क्षेपात् सव्यसाचीत्युच्यतेऽर्जुनः ॥

आनन्दगिरिकृतटीका २

तर्हीदासीनोऽस्मि प्रतिकूलानीकस्यामत्प्रातिकूल्यादेव न भविष्य
तीत्येवं यस्मान्निश्चिते तस्मात्त्वमौदासीन्यमकिंचित्करमित्याह
यस्मादिति उत्तिष्ठ युद्धाय उद्युक्तो भवेत्यर्थः यशोलाभमभिन
यति भीष्मेति किं तेनाप्युत्तिष्ठेनेत्याशंक्याह पुण्यैरिति राज्यभोगे फ
लेन किमनपेक्षितेनेत्याशंक्याह जित्वेति भीष्मादिषु निरपेक्षेषु कु
तो जयाशंका इत्याशंक्याह मयैवैत इति तर्हि मृतमारणार्थे न
मे प्रवृत्तिरित्याह निमित्तेति सव्यसाचिपदं विभजते वामेनेति ॥

स्वामिकृतटीका ३

यस्मादेवं तस्मादिति तस्मात्त्वं युद्धायोत्तिष्ठ देवैरपि दुर्जया भीष्म
द्रोणादयोऽर्जुनेन निर्जिता इत्येवंभूतं यशो लभस्व प्राप्नुहि अयत्ने
न शत्रून् जित्वा समृद्धं राज्यं भुंक्ष्व एते तव शत्रवस्त्वदीययुद्धात् पूर्वमे
व मयैव कालात्मना निहतप्रायाः तथापि त्वं निमित्तमात्रं भव हे स
व्यसाचिन् सव्येन वामहस्तेन साचितुं संधातुं शीलमस्येति व्युत्पत्त्या
वामेनापि बाणक्षेपात् सव्यसाचीत्युच्यते ॥

पिशाचभाष्यटीका ४

स्पष्टार्थं ॥

रामानुजभाष्यटीका॰ ५

तस्मादिति तस्मात्त्वं तान् प्रति युद्धायोत्तिष्ठ तान् शत्रून् जित्वा यशो लभस्व धर्म्यं च राज्यं समृद्धं भुंक्ष्व मयैवैते कृतापराधाः पूर्वमेव निहताः हनने विनिर्मुक्ताः त्वमेतेषां हनने निमित्तमात्रं भव मया हन्यमानानां शस्त्रादिस्थानीयो भव सव्यसाचिन् शरसमवाये सव्येनापि शरसमवायशीलः सव्यसाची सव्येनापि हस्तेन शरसमवायकरः हस्तद्वयेन योद्धुं समर्थ इत्यर्थः ३३

अभिनवगुप्तकृतटीका॰ ८

स्पष्टार्थं ३३

परमार्थप्रपा टीका॰ ७

अत एवाह तस्मादिति तस्मात्कारणात्त्वं युद्धाय उत्तिष्ठ किं तत्फलं
देवैरपि दुर्जया भीष्मद्रोणादयो ऽर्जुनेन निर्जिता इति यशो लभस्व तत-
तः शत्रून् निर्जित्य समृद्धं देशबलकोशदुर्गादियुक्तं राज्यं भुंक्ष्व अथवा
अजये एवमेवोद्दिश्य हस्तात्मामपि परमेश्वरं लोनीमात्रयोन्तरे-
रः तथाहि ओं ह्रीं ईं त्वामिद्धि हवामहे सातौ वाजस्य कारवः
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः
अवातोः उपक्रघाउवाहारेस्त् अवत ओं ह्रीं ईं इति च मंत्रो द्वौ विकल्पे हा-
उगायतरति उहग्रेथोकेः तथा अरीवेरीवेवाकुर्यादिति साम श्रि-
तास्वगानक्रमे दर्शितः अथ संहितापाठस्तु त्वामिद्धि हवामहे सा-
तौ वाजस्य कारवः त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वत इति भा-
ष्यं भो इन्द्र परमात्मन् वयं त्वामित्थाः कारवः स्तोतारः वाजस्य व-
लस्य सातौ लाभे कोत्तमाः त्वामित् त्वामेव हवामहे आह्वयामः अथ-
कारयामहे इत्यर्थः तथा हे इन्द्र वरके वृत्रप्रख्येन पुरस्तात्त्वामेवा-
१८ ह्वयामः तथा अर्वतः संग्रामस्य काष्ठासु समर्यादासु अहरहः नरा
धर्मपुत्र ब्रुवामेव सम्मतिभक्तपुत्रपातिनं प्रभुं आह्वयामो नाम
मित्यर्थः आप्तलभण्णावायाव इन्द्रेण इन्द्रेन मत्तनाजयामि द्रेष्टुभे
नच्छेद सा पंचदशेन लोमेन हस्तात् सान्ताव षड्कार एव न्द्रेण सह
जातिति भाष्ये इन्द्रेण परमात्मना देवेन कृत्वा पतनाः शत्रुसेनाः
जयामित शत्रुष्ठानमहता सान्तातउपासनया किंभूतेन इन्द्र-
भेन च तस्य त्वार्तिपादत्तेरेणच्छेद सा तथा पंचदशेन लोमेन इन्द्रेला॰

णेव पंचभ्यो हिंकरोतीति स्मृतिः सपकयेति अयमर्थः पंकंसू
के विगावर्जनीयेन तत्र प्रथमाहूतो प्रथमयाऽऽचस्थिरभ्यासः द्वि
तीयाहूतो मध्यमायाऽलनीयाहूतौ उत्तमायाः सोऽयं पंचदशमत्रा
मकोन एव मनयो यामनया विषट्कारो वशीभूय शत्रून् हित
ति यत्कृतेन शत्रं वर्षसहस्राणीति अर्थः सायणभाष्यकारैरपि
देविकाभिप्रायेण वा संग्रामविषयो दर्शितः रावणभाष्ये तु सं
ग्रामवरीयाः भेतरसंग्रामविषयो दर्शितः वेदभाष्ये तु अयम
पि अर्थोऽस्फुरणाको यामुतिरपि मे हृदयवन्तभयं मामाकु
लमस्मत्यं दत्तो वरुणमश्वमरूः भियं दधाना हृदये शब्दवः परा
जिता सोमध्यपतिलयंतो भाष्ये अस्मभ्यमस्मद्येवरमेश्वरेणाम
हाकृतेयणाथयो एतुभयंथने मे हृद् सम्यक्प्रकारेण निर्मिते
अध्यात्मिकमाधिदैवं च तयोर्दातारो हे अध्यात्मिकस्य दातावरु
णः प्रकाशकः परमात्मा अस्मास्य मम्भुरिन्द्रो हृदस्यतिरिति श्रुते
रिंद्रः ऐश्वर्यवान् देवता रूपरन्ध्रः अनेनाभयदानस्य फलमाह
भियमिति येन यन्ने न हृदये शब्दयाणिनामं तः करणे शब्दवः
षट् सपत्नाः भियं दधानाः संतः पतिलयंते नाशं प्राप्नुवंतीम
ध्यात्मपक्षे अपरत्र तु हृदये शब्दस्वा तः करणे भयं दधानाः सं
तः स्वत एव युद्धं विनापि अपनिलयंते नाशं मा यांतीति अथ
प्रकृतमनुसराम एवं शत्रुपराजयेन वाग्यासो नास्ति कृतः एत
एवं मयैव निहताः संतीति तयैव दृष्टं अतः परं भो सव्यसाचिन्
अर्जुन त्वं निमित्तमात्रं भव अनेन तदर्के भवति पूर्वं मह्यं कृत्वं नि
मित्तमात्रं कृत्वा स्वनिर्मितेषु त्रिषु कल्पांतकालानलसमः स्वयं
वाणो भूत्वा तु जयमपि विष्णुरमधाते मे पनितो निमित्तमात्रकृ
त्याय तो जगत्सृष्टिप्रलयसमर्थो मे कल्पानामस्माकं के कृतकृ
लहलते कियानायासो लीलयैवासु तिरपि अहं सद्य एव पत्तनात
नोमित्र लसितस्य शावतं तवा भाष्ये अत्र हे कृष्णायमहादेवार्थंमे
हतलमलोकिके धनुराततो मिविलानयामि किमु हित ब्रह्म
हि अत्र लसितस्यारोपानुं विप्रदैतरुं तेन नाशायिते तदर्के रथाःतो
लीयंते स्मादि ११

श्री
गी टी
५

भीष्मद्रोणादयो ये योद्धुमर्हास्ते न वयो काले मयैव निहतास्तत्र वि
षादं मा कार्षीरित्यर्थः तस्मादिति यस्मात्त्वद्व्यापारं विनाप्येते विनंक्ष्य
न्त्येव तस्मात्त्वमुत्तिष्ठ उद्युक्तो भव युद्धाय देवैरपि दुर्जया भीष्मद्रो
णादयो निरथाः कृतिमवार्जुनेन निर्जिता इत्येवंभूतं यशो लभस्व
महद्भिः पुण्यैरेव हि यशो लभ्यते अयत्नतश्च जित्वा शत्रून् दुर्योध-
नादीन् भुंक्ष्व समृद्धं निःकंठकं राज्यं एते च शत्रवो मयैव कालात्मना
निहताः संहृतायुषः त्वदीययुद्धात्पूर्वमेव केवलं त्वं शौला
भाय रथात्मागेवं निपातिताः अतस्त्वं निमित्तमात्रमर्जुनेनैते नि
र्जिता इति सार्वलौकिकव्यपदेशास्पदं भव हे सव्यसाचिन् सव्ये
न वामेन हस्तेनापि शरान् संधितुं संधातुं शीलं यस्य स तादृशस्य
तव भीष्मद्रोणादिजयो नासंभावितस्तस्मात्त्वद्व्यापारेण तेरमण
रणा मा ममानेषु तेषु तवैव कर्तृत्वं लोकाः कल्पयिष्यन्तीत्यभि-
प्रायः ॥३३॥

उक्तमेवेज्जयत्नो टीका · ५

तस्मादिति यस्मात्त्वद्व्यापारं विनैव मत्संकल्पादेवैते विनङ्क्ष्यन्ते
व तस्माद्धेतोः हे सव्यसाचिन् सव्येन वामेन हस्तेनापि शरान् संधिते
संधातुं शीलं यस्य तत्संबोधनं हे सव्यसाचिन् युद्धनिर्भरेणामे हस्त
हयेनापि योद्धुं समर्थोऽर्थः मत्सहायेन त्रैलोक्यविजयसमर्थस्त्व
मिष्ट स्वधर्मभूताय युद्धायोद्युक्तो भव यशो लभस्व समरेऽमरज
यशालिनो देवव्रतगुरुकर्णशल्यादयोऽर्जुनेनानायासेनैव वि
निर्जिता इत्यतितुलां कीर्तिं त्वं प्राप्नुहि शत्रून् दुर्योधनादीन् जि
त्वा विजित्य समृद्धं धनरत्नादिसम्पन्नं निष्कण्टकं राज्यं भुंक्ष्व स्व
कीयत्वेन भोग्यतां प्रापय न त्वति प्रबलप्रतापान् भीष्मद्रोणादी
नहं कथं विजेष्यामीति चेत्तत्राह मयैवैते इति मया व्याश्रितदुःखा
महिंस्रनाश भक्तविरोधिहन्त्रा स्वजनरत्नणावहुकलेरोवपूर्व
मेव कृत्स्नाखरदूषणकाले पवैते क्रूरतापरा भीष्मादयो निहता
वधिताः केवलं त्वं यशोलाभायैव रथाग्न्यादिवाहनेभ्यो न पातिता
इत्यर्थः ननु पुरैव यद्येते त्वयैव निहताः सुखलहिंसां युद्धाय किम
र्थं प्रेरयसीति चेत्तत्राह निमित्तमात्रं भव ममशस्त्रादिस्थानीयो भ
व यद्वा मया हन्यमानानामेषां लयाय निमित्तमात्रं केतूल्काग्रप

५वृ

द्वंपमात्रंभव ॥

मधुसूदनीटीका ।

१प

यस्मादेवं — तस्मात्त्वद्व्यापारमंतरेणापि यस्माद्भाविनैते संत्येव तस्मात्त्वमुत्तिष्ठ
उद्युक्तो भव युद्धाय देवैरपि दुर्जया भीष्मद्रोणादयः अतिरथाः
कटितेवार्जुनेन निरस्ता इत्येवंभूतं यशो लभस्व महद्भिः पुण्यै
रेव हि यशो लभ्यते अयत्नतश्च जित्वा शत्रून्दुर्योधनादीन्भुंक्ष्व
स्वोपसर्नेन तत्तेन भोग्यतां प्रापय समृद्धं राज्यमकंटकं एते च त
व शत्रवो मयैव कालात्मना निहता संहृता पुरः त्वदीययुद्धात्
पूर्वमेव केवलं त्वयशोलाभाय रथात्रपातिताः अतस्त्वं निमि
त्तमात्रं त्वं नेनैव ते निहता इति सर्वलौकिकव्यपदेशास्पदं भ
व हे सव्यसाचिन् सव्येन वामेन हस्तेनापि शरान्संवितुं संधा
तुं शीलं यस्य तादृशस्य त्वमभीष्मद्रोणविजयेनासंभावितः
तस्मात्त्वद्व्यापारानंतरं मया रथात्पातस्मान्नेष्टेनेषु तवैव कर्तृ
त्वं लोकाः कथयिष्यंतीत्यभिप्रायः नन्तु द्रोणो ब्राह्मणो नमो
धनुर्वेदाचार्यो मम गुरुर्विशेषेण च दिव्यास्त्रसंपन्नः तथा भी
ष्मः स्वच्छंदमृत्युर्दिव्यास्त्रसंपन्नश्च परशुरामेण द्वंद्वयुद्धमा
गम्यापि न पराजितः [illegible] तथा यस्य पिता वृद्धक्षत्रः
तपश्चरति मम पुत्रस्य शिरो भूमौ पातयिष्यति तस्यापि शि
रस्तत्कालं भूमौ पतिष्यतीति स जयद्रथोपि जेतुमशक्यः स्व
यमपि महादेवाराधनपरो दिव्यास्त्रसंपन्नश्च तथा कर्णोपि स्व
यं सूर्यसमूलदाराधनेन दिव्यास्त्रसंपन्नो वासवदत्तया चैकपुरु

मोदी — षघातिन्याकर्तुमशक्यविजयानुनाविशिष्टः तथा कृपाश्वत्था
मभूरिश्रवः प्रभृतयोपि महानुभावाः सर्वथा दुर्जया एव तेषु
सत्सु कथं जित्वा शत्रून्राज्यं भोक्ष्ये कथं वा यशो लप्स्ये इत्याशंका
मर्जुनस्यापनेतुमाह तदाशंकाविषयान्नामभिः कथयन् ॥

सदानंदी टीका ॥

त्वद्व्यापारं विनाप्येते मयैव निहता यतः तस्मात्त्वं भव युद्धाय स
मुद्युक्तोत्र केवलं । भीष्मादयो महाशूरास्त्वजेयाश्चामरैरपि त्व
त्तेनेन जिता इत्येलभस्व त्वं यशो मलं जित्वा शत्रून्नानायासाद्भुंक्ष्व

राज्यमकंटकं मयैवैतेहताःपूर्वंनिमित्तंकेवलंभव ३ यथान्य
पातितान्तेनयशोलाभायकेवलं शराणांमेनसंधानेशीलय
स्यतेवतिसः ४ तद्व्यापारेणेतस्मान्मयैवैतेषुतत्रयथात पाप
मानेषुकर्त्तव्येकस्यचिच्छक्तिततत्त्वं ५ ३३

नीलकंठीटीका: ९

तस्मादिति यस्मात्त्वांविनाप्येतेमरिष्यन्तितस्मात्त्वमुत्तिष्ठयुद्धाय
शेषंस्पष्टं ३३

श्रानंदीटीका स्पष्टार्थम् ३३

रामकंठीटीका

कालात्मिकयामयैवाग्रेप्रागेवहतास्तेतान्निमित्तमात्रंस्त्वेकारणमात्रंभ
वयस्वेतिव्याकार्थपवेषश्लोकः [illegible] ६४
[illegible] ३०

लासिकी [illegible]टीका

नचैतद्विद्मइतिश्लोकोत्तरंभाविकल्पाणं रूपमाह ॥

यतएवंतस्मात्त्वमुत्तिष्ठ दुर्जयानांभीष्मादीनांजयेनयशोल
भस्व एवमप्रयासेनशत्रूंजित्वासमृद्धंराज्यंभुंक्ष्व एतेनवशत्र
वोमयैवकालात्मनापूर्वमेवतद्व्यापारात्प्रागेवनिहताः मेदयतश्च
याः हे सव्यसाचिन् सव्येनवामहस्तेनापिसाचितुंभव [illegible]
[illegible] ३३ ॥ शराणांसंधानेशीलं मस्येति हे अर्जुन निमित्तमात्रं

पंचोलीटीका

यस्मादेवंतस्मात्त्वमुत्तिष्ठभीष्मप्रभृतयोऽतिरथाः देवैः रपजे
यास्तेऽर्जुनेनजिताइतियशोलभस्वकेवलपुण्यैर्हिनप्राप्यते श
त्रून्दुर्योधनप्रभृतीन्जित्वासमृद्धंराज्यंभुंक्ष्वएतेमयैवअस्तौ
भीष्मश्रसौकर्णइतिदर्शयतिनिहताःप्राणैःवियोजिताः हेस
व्यसाचिन्त्वंनिमित्तमात्रंभववामेनपाणिनाशराणांक्षेपात्स
व्यसाचीमच्यतेऽर्जुनः ३३ ॥

तस्मादिति यस्मादेवं तस्मात्त्वमुत्तिष्ठ युद्धोद्युक्तो भव ततः एवं स्वधर्माचरणाच्छत्रूं जित्वा यशो लभस्व समृद्धं हृष्टहिमविनिष्कंटकं राज्यं च भुंक्ष्वेति अथ कथमहमेतान्निहन्मीति चेत्तत्राह मयैवेति एते भीष्मादयो मयैव पूर्वमेव निहता भवंति ततश्च तान्हंतुं श्रयासः त्वं तु सव्यसाचिन् निमित्तमात्रं भवेति त्वां निमित्तीकृत्य स्वयमेवाहं तान्हनिष्य इति का ते विभ्रांतिरिति भावः ३३॥

मधुभाष्य

३३॥

भाषा अनुवाद

जिस हेतु ऐसा होनहार है इस से तुम युद्ध के अर्थ उठो और देवतों से भी अजय जो भीष्म द्रोण आदि वीर सो अर्जुन से पराजित भये इस यश को लाभ करो और शत्रुवों का विनाश करि कै संपूर्ण राज्य भोग करो और ये जो तुमारे शत्रु तिन् को युद्ध के पूर्व ही कालरूप मैने यद्यपि हत करि राखा है तो भी हे सव्यसाचिन् अर्जुन तुम निमित्त मात्र होउ सव्यसाची उसको कहते जो बांये हाथ से युद्धादि कार्य करि शकै ३३

चौपई

ताते तुं उठ यश को लेहु राज्य रीहि भजन अरि केहु हते सर्व
सम मैं हि पते हो सव्यसावि निमित हि तेते ३३

द्रोणञ्च भीष्मञ्च जयद्रथञ्च कर्णं तथान्या
नपि योधवीरान् मया हतांस्त्वं जहि मा व्यथिष्ठा
युध्यस्व जेतासि रणे सपत्नान् ३४

शाङ्करभाष्यटीका १

द्रोणञ्चेति द्रोणञ्च येषु योधेषु अर्जुनस्याशङ्कासीत् तांस्तान् स
र्वान् व्यपदिशति भगवान् मया हतानिति तत्र द्रोणभीष्मयोस्ता
वत् प्रसिद्धमाशङ्काकारणं द्रोणो धनुर्वेदाचार्यो दिव्यास्त्रसंपन्नः
आत्मनश्च विशेषतो गुरुर्गरिष्ठो भीष्मः स्वच्छन्दमृत्युर्दिव्यास्त्रसंप
न्नश्च परशुरामेण द्वन्द्वयुद्धमगमन्न च पराजितः तथा जयद्र
थोपि यस्य पिता तपश्चरति मम पुत्रस्य शिरो भूमौ पातयिष्य
ति यस्तस्यापि शिरः पतिष्यतीति कर्णोपि वासवदत्तया शक्त्या
त्वमोघया सम्पन्नः सूर्यपुत्रः कानीनो यतोतस्तन्नाम्नैव निर्देशः म
या हतांस्त्वं जहि निमित्तमात्रेण मा व्यथिष्ठास्तेभ्यो भयं मा कार्षीः
युद्ध्यस्व जेतासि दुर्योधनप्रभृतीन् रणे युद्धे सपत्नान् शत्रून् ३४

आनन्दगिरिकृतटीका २

मयैवेत्यादिनोक्तं प्रपञ्चयति द्रोणञ्चेति किमिति कतिचिदेवा
त्र द्रोणादयो गण्यन्ते तत्राह येष्विति द्रोणादिषु कुतः शङ्केत्या
शङ्क्य द्वयोः शङ्कानिमित्तमाह तत्रेत्यादिना जयद्रथेपि शङ्का
निमित्तमाह तथेति दिव्यास्त्रसंपन्न इति सम्बन्धः तत्र शङ्का
यां कारणान्तरमाह यस्येति कर्णोपि तत्कारणं कथयति क
र्णोपीति पूर्ववदेव सम्बन्धः हेत्वन्तरमाह वासवेति सा खल्व
मोघा पुरुषमेकमत्यन्तसमर्थं घातयित्वैव निवर्त्तते जन्मना
पि तस्य शङ्कनीयत्वमाह सूर्येति कुन्ती हि कन्यावस्थायां स
त्यप्रभावे ज्ञातमादित्यमाजुहाव ततस्तस्यामेवावस्थायामयम्पुत्रो ब
भूव तदाह कानीन इति एतदेवाभिप्रेत्य कर्णग्रहणमित्याह य
त इति उक्तेष्वन्येषु च न त्वया शङ्कितव्यमित्याह मयेति ३४

स्वामिकृतटीका ३

१

श्री॰ गी॰ टी॰ ८

नैवैतद्विस्मयः कर्त्तव्यो गरीयो यद्वा जयेम यदि वा नो जयेयुरित्यादि
धीशंका सापि न कार्येत्याह द्रोणंचेति येभ्यस्त्वमाशंकसे तान् द्रो
णभीष्मादीन्मयैव हतांस्त्वं जहि घातय माव्यथिष्ठाः हत्याभयेमा
कार्षीः सपत्नान् शत्रून् रणे युद्धे निश्चितं जेतासि जेष्यसि ३४

पैशाचभाष्यटीका॰ ४

द्रोणंचेति जहि व्यापादय माव्यथिष्ठाः मानुखं कृथाः भयचलनेमा
कार्षीरित्यर्थः जेतासि जेष्यसि ३४

रामानुजभाष्यटीका॰ ५

द्रोणमिति द्रोणभीष्मकर्णादीन् कृतापराधतया मयैव हनने
विनियुक्तांस्त्वं जहि त्वं हन्याः एतान् गुरून् बंधूंश्चान्यानपि भोगा
सक्तान् कथं हनिष्यामीति माव्यथिष्ठाः तानुद्दिश्य धर्माधर्मभयेन बंधु
स्नेहेन कारुण्येन च माव्यथां कृथाः यतस्ते कृतापराधाः मयैव ह
नने विनियुक्ताः अतो निर्विशंको युद्धस्व रणे सपत्नान् जेतासि
जेष्यसि नैतेषां वधे नृशंसतागंधः अपितु जयप्रबलभ्यत इत्यर्थः
३४॥

अभिनवगुप्तकृटीका॰ ६

स्पष्टार्थं ३४ ॥ ॥ ॥

परमार्थप्रपादीटीका ७

द्रोणंचेति द्रोणं भीष्मं जयद्रथं कर्णं च तथान्यानपि योधवीरा
न् मया संहारकालरूपेण हतानपहृतशक्तीन् त्वं जहि मारय परंतु
माव्यथिष्ठा माभैषीः निर्भयः सन् युध्यस्व रणे संग्रामे सपत्नान्
शत्रून् जेतासि जेष्यसि

वनमालीटीका॰ ८

ननु द्रोणो धनुर्वेदाचार्यो दिव्यास्त्रसंपन्नश्च तथा भीष्मः स्वच्छंदमृत्यु र्दि
व्यास्त्रसंपन्नः परशुरामेण द्वंद्वयुद्धमुपगम्यापि न पराजितः तथा
जयद्रथस्य पिता हन्तुर्मस्तकपातेस्यति मम पुत्रस्य शिरो यो भूमौ पातयि
ष्यति तस्यापि शिरस्तत्काले भूमौ पतिष्यतीति स जयद्रथोऽपि जेतुम
शक्यः स्वयमपि महादेवाराधनपरो दिव्यास्त्रसंपन्नश्च कर्णोपि स्व
यं मम सदाराधनेन दिव्यास्त्रसंपन्नश्च शक्त्यैकवीर ... शा

क्रांपुत्रस्य तथान्ये भगदत्तादयोऽतिदुर्जेयाः एव तेषु मत्स्यकथंजि
त्वा शत्रूं कथं राज्यं कथं वा यशो लप्स्यमिति शंकामपाकरोति द्रो
णमिति द्रोणं भीष्मं च शंकाविषयभूतान् सर्वानेव योधवीरान्
कालशक्तिनामया हतानेव त्वं जहि हतानां हनने को वा परिश्र
मः एते मामव्यविशिष्टाः कथमेवं शक्यामीति व्यथां भयमिति मित्रे पीडां
मागाः मया ये मत्वा पुत्रस्य सजैता सिजेष्यं स्वविरेसेव रणे संग्रामे स
पत्नान् सर्वानपि शत्रून् युद्धे द्रोणं च भीष्मं च जयद्रथं चेति चकार
द्वयेण पूर्वोक्ता जयद्रथशंकानूपेत तथा शब्देन कर्णमन्यमानपि य१
योधवीरानित्य अपि शब्देन तस्मात् क्रतोपि स्वस्य पराजयं वध
निमित्तं पापं मा शंकिष्ठा इत्यभिप्रायः ३४

जसमवैनयनीटीका ॥

ननु प्राक्तात्त्वविद्याकुशलो हि द्रोणो ममगुरुः द्रोणः लब्धा लब्धक
लांतकरामेण पप्रधाजितः स्वेच्छामृत्युर्भीष्मः लब्धयोमम गु
णि रोभूमौ पातयिष्यति तस्य शिरः स्वयमेव भूमौ तत्कालमेव प
तिष्यतीति पितुः सकाशाल्लब्ध वरो महादेवाराधनेन प्राप्तदि
व्यास्त्रो जयद्रथः लब्धा सूर्याराधनेन लब्धदिव्यास्त्रो वासवदत्तैक
पुरुषघातिशक्तिसमन्वितः कर्णः लब्धा कृपाश्वत्थामभूरिश्रवःप्र
भृतयः निष्प्रबलप्रमापिनोऽतिदुर्जेयास्तेरेतान् सर्वान् कथं जेष्या
मि कथं वा राज्यं भोक्ष्यामीत्याशंकायामाह द्रोणं चेति तथा च का
रत्रयं वाप्यर्थे द्रोणं दिव्यास्त्रसमत्वे गुरुमपि भीष्मं स्वेच्छामृत्युं दि
व्यास्त्रसमत्वे पितामहमपि जयद्रथं लब्धापि स्ववरमीशात् रुद्रा
तमपि एतानस्मानपि कृपाश्वत्थामादीन् योधवीरान् युद्धविशार
दान् दुर्जेयानपि मया कालात्मना हतान् हता शत्रुघ्नः सर्वानेता को
न् जहि हतानां हनने नामारणेपि श्रमो नास्तीत्यर्थः मा व्यथिष्ठाः
हिव्यास्त्रसम्पन्नानेतानेकोऽहं कथं विजेतुं शक्नोमीति भयं मागाः
युद्धमा व्यथिष्ठाः वेपुस्वेहनकारुरापन यमर्भयेन च व्यथां मा कृ
थाः यस्मात् त्वत्तापराधानामानतापिना मेषो वधे अल्पो मतालेशो
पि नास्ति तस्मात् वं व्यथां मा कुर्वित्यर्थः युध्यस्व युद्धं कुरु कृष्णयेनार
णे संग्रामे सपत्नान् शत्रून् जेतासि जेष्यसि अपि शब्देः पंच भिर्नि
मित्तानि च वाराणि विपरीतानि केशव न च श्रेयोऽनुपश्यामि हत्वा

१

श्री
गी॰टी॰
प

स्वजनमाहवे नचैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जये-
युः कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन इषुभिः प्रतियोत्स्या-
मि पूजार्हावरिसूदनेत्यादीनामस्माकमपि सर्वेषामज्ञानस्य शोका-
नां निराकरणं नयोजितम् ३४

[illegible] मधुसूदनीटीका ॥

द्रोणादीन्दर्शकाविषयीभूतान् सर्वानेव योधवीरान् कालात्म-
ना मया हतानेव त्वं जहि हतानां हनने को वा परिश्रमः अतो मा
व्यथिष्ठाः कथमेवं शास्त्रान्मीति ब्राह्मणभयनिमित्तां पीडां मा गाः भ-
यं सत्का युध्यस्व जेतासि नेच्छ सविरोधेन वरणे संग्रामे सपत्नान् स-
र्वानपि शत्रून् अत्र द्रोणं च भीष्मं च जयद्रथं चेति चकारत्रयेण भू-
रिका जेयत्वशङ्कानुमयघतेन तथा शाहेन कर्णोपि अन्यानपि योध-
वीरान् निःसत्त्वापि शङ्केन तस्मात् कुतोपि त्वस्य पराजयो भयनिमित्तेषा
पंचमाशंकिष्ठाः इत्यभिप्रायः कथं भीष्ममहं संख्ये द्रोणं च मधु-
सूदन इषुभिः प्रतियोत्स्यामि पूजार्हावित्यत्रापि समुद्रायाव्यथा-
नेन तेषु मे कान्वयो द्रष्टव्यः [illegible]
[illegible]
[illegible]
[illegible] ३४

सदानंदीटीका ॥

धनुर्वेदाचार्यो मम गुरुश्च द्रोणाचार्यो विनेः स्वयं दिव्यैरस्त्रैर्युतनर-
ह विजेतनस्यशाकः तथा भीष्मो वीरो रणभुवि गतो मत्तः स्ववतो-
न जेतुं शक्यो भृगुपतिपरशुरामेणाचतुरा १ तथा जयद्रथो यस्य
पिता अत्र तपसि स्थितः यः शिरो मम पुत्रस्य पृथिव्यां पातयिष्यति
२ पतिष्यति शिरस्तस्य स्वयं चेति विनिश्चयः तथा कर्णोपि सपत्नः शा-
क्त्या वासवदत्तया ३ एकाक्तिवीरयातिस्मामोचीकर्तमशक्यया स्व-
यं च सूर्यपुत्रोसि दिव्यास्त्रबलसंयुतः ४ तथान्येपि महाशूराश्च स्व-
स्यामहत्कृपादयः सर्वथाप्यजेयाः सन्ति ते युद्धसङ्कथञ्जयः ५ कथं
निष्कंटकं राज्यं पश्येति लक्ष्यसर्वाकंस्थ इत्याशंकेनाशयं श्रीशो भिल-
त्याह हेतुवचः ६ द्रोणं भीष्मं तथा कर्णं जयद्रथमथापरान् योध-
वीरान्दर्शकाकोचरानानविलानिमान् ७ कालात्मना मयेवेन ह

नोत्कंजहि संगरे हतानां हनने कोवानव पार्थपरिश्रमः ८ यथावो
यप्रताघेन धर्मेविश्वसहेतुके नन्वमस्यादिवाजन्मयोहिंनस्निग्ध
माभिका ९ तथातैमत्वतापेनविधत्वशत्रुसैनिकंजहि हिंसैर्यम
माश्रित्यनतेतद्धननेश्रमः १० शास्त्राम्यहंकथंतेवेषीडेमागाभ
योद्वा युध्यस्वनेभयमस्कान्जेष्यसेवरणेविमृत ११ तस्मात्वतोपि
स्वस्वतेमाशंकिष्ठाः पराजये पापेवधनिमित्तेवाश्रीहरेरयमाश
यः १२ ३४

नीलकंठी टीका १२

माव्यथिष्ठाः एतेमहांतः कथंहंतव्याइत्याकुलीभावंमागाइम
र्थः जेतासिजेष्यसि सपत्नानशत्रून् ३४

श्रानंदीटीका

[illegible] ३४

द्रोणादयच्चाप्रतिमपराक्रमत्वातदुर्ज रामकंठीटीका याइतिचमावमंस्थाइत्याह॥

द्रोणादयोपिसकललोकैकवीराःकालस्वरूपेणमयाव्यापादि
ताःइतितान्स्वजयान्मनामाभैषीरितितात्पर्यम् [illegible]
[illegible] ३४

द्रोणादयोमहानुभावनया लासिकी [illegible]टीका इजय्याइत्याशंकापरिहारायाह॥

चोध्यर्थे द्रोणमपिदिव्यास्त्रसंपन्नं भीष्मंस्वतंत्रमृत्युपरशुरामायन
भिभूतमपि जयद्रथंतद्धंतुः शिरपतनवरदानाज्जेतुमशक्यमः
पि कर्णंसूर्याद्दिव्यास्त्रसंपन्नम् वासवदत्तयामोघयाशक्त्याविशि
ष्टमपि तथान्यानपिएवंविधप्रभावातिशययुक्तान्वीरान्मयान्मया
कालरूपेणाहतांस्त्वंजहि एतस्यहनने भयाभावमाह माव्यथि
ष्ठामाभैषीर्यकंडकरु शत्रून्युद्धेजेतासिजेष्यसि [illegible]
[illegible] ३४॥

पंचोलीटीका

नैवैनहिंस्यइति याशंकासीत्सापिनकार्येत्याह द्रोणमिति येभये
भ्यर्जुनस्यशंकातान्मयाहतान्निति भगवान्व्यपदिशति द्रोणोयत्र

गी॰
टी॰
प॰

वैदाचार्योदिव्यास्त्रसंपन्नःआत्मनोविशेषतोगुरुरिष्टःभीष्मःस्वच्छं
दमृत्युःदिव्यास्त्रसंपन्नश्चपरशुरामेणद्वंद्वयुद्धसमागममापन्नः
पराजितस्तथाजयद्रथोयस्यपितातपश्चरतियोममपुत्रस्यशिरो
भूमौपातयिष्यतितस्यापिशिरःपतिष्यतीतिकर्णोपिवासवदत
याशक्त्याधर्मोवयासंपन्नःसूर्यपुत्रःकानीनःएतानन्यानपियोधवी
रान्मयाहतांस्त्वंजहिमाव्यथिष्ठास्तेभ्योभयंमाकार्षीः ३४

रणवीरसमिद्धोयिनी॥

अथाममेवार्थंविवृणोति द्रोणंचेति स्पष्टार्थः ३४॥

मधुभाष्य

३४॥

भाषा अनुवाद

और जो पूर्व मे अर्जुन ने शंका किया कि हम इन को जीतेंगे या ये हम को यह हम नहीं जानते हैं उसका वारण करते हुये कहते हैं कि जिनसे तुमको शङ्का भई थी वे मुझ से हत ये भये जो द्रोण भीष्म जयद्रथ कर्ण तथा और जो वीर उन सबको तुम जय करो और उन से न डरो तुम अवश्य ही जीतोगे ३४

चौपई

द्रोण भीष्म अरु जयद्रथ सोई सूतपुत्र अन्यवीर हिं जोई मैं मारे
ते मार न डरवहु जुद्धकरहु रण शत्रु जितहु ३४

सञ्जय उवाच एतच्छ्रुत्वा वचनं केशवस्य कृ
ताञ्जलिर्वेपमानः किरीटी नमस्कृत्वा भूय
एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य ३५

शाङ्करभाष्यटीका १

एतच्छ्रुत्वेति एतत् श्रुत्वा वचनं केशवस्य पूर्वोक्तं कृताञ्ज
लिः सन् वेपमानः कम्पमानः किरीटी नमस्कृत्य भूयः पुनरे
वाहोक्तवान् कृष्णं सगद्गदं सह गद्गदया वाचा मन्दशब्देन भया
विष्टस्य दुःखाभिघातात् स्नेहाविष्टस्य च हर्षोद्भवात् अश्रुपूर्णने
त्रत्वे सति श्लेष्मणा कण्ठावरोधः ततश्च वाचोऽपाटवं मन्दश
२८ ब्दत्वं यत् सगद्गदेन सह वर्तत इति सगद्गदं वचनमाहेति
वचने क्रियाविशेषणमेतत् भीतभीतः पुनर्भयाविष्टचेताः
सन् प्रणम्य प्रह्वीभूत्वाहेति व्यवहितेन सम्बन्धः अत्रावसरे स
ञ्जयवचनं साभिप्रायं कथं द्रोणादिष्वर्जुनेन निहतेष्वजेयेषु च
तुर्षु निराश्रयो दुर्योधनो निहत एवेति मत्वा धृतराष्ट्रो जयं प्रति
निराशः सन् सन्धिं करिष्यतीति ततः शान्तिरुभयेषां भविष्यती
ति तदपि नाश्रौषीत् धृतराष्ट्रो भवितव्यवशात् ३५

आनन्दगिरिकृतटीका २

पराजयाभावात् करिष्यति बुद्ध्वा सञ्जयो राज्ञे वृत्तान्तमुक्तवा
निमाह सञ्जय इति पूर्वोक्तवचनं कालोऽस्मीत्यादि विश्वरूपदर्श
नदशायामर्जुनस्य भगवता सम्वादवचनं किमिति सञ्जयो रा
ज्ञे व्यज्ञापयदित्याशंक्य तदुक्तेस्तात्पर्यमाह अत्रेति तमेवाभि
प्रायं प्रश्नद्वारा विशदयति कथमित्यादिना नहि सञ्जयवचनं श्रु
त्वा किमिति राजा सन्धिं न कारयामासेति तत्राह तदपीति ३५

स्वामिकृतटीका ३

ततो यद्वृत्तं तद्धृतराष्ट्रं प्रति सञ्जय उवाच एतदिति एतत्पूर्वश्लो
कत्रयात्मकं केशवस्य वचनं श्रुत्वा वेपमानः कंपमानः किरीटी
अर्जुनः कृताञ्जलिः संपुटीकृतहस्तः कृष्णं नमस्कृत्य पुनरप्युवा
क्तवान् कथमाह भयहर्षावेशाद्गद्गदेन कंठकंपनेन सह व

श्री
गी टी
५

नेतदृशि सगद्गदं यथा भवति तथा त्रिभीतादपि भीतः सन् प्रणम्या
वनतो भूत्वा ३५

पिशाचभाष्यटीका ४

संजय उवाच एतच्छ्रुत्वेति वेपमानः कंपमानः किरीटी अर्जुनः
सगद्गदं भीतभीतः प्रकारे पुनः प्रणामपूर्वकं भगवंतमर्जुन उवा
च ३५

रामानुजभाष्यटीका ५

संजयः एतदिति एतदाश्रितवात्सल्यजलधेः केशवस्य वचनं श्रु
त्वार्जुनः तस्मै नमस्कृत्वा भीतभीतोऽति भीतस्तं प्रणम्य कृतांजलि
र्वेपमानः सगद्गदमाह ३५

अभिनवगुप्तकृतटीका ६

स्पष्टार्थः ३५ ॥ ॥ ॥

परमार्थप्रपाटीका ७

अतधृतराष्ट्रं प्रतिसंजय उवाच
एतदिति - किरीटी अर्जुन एतत्केशवस्य वचनं श्रुत्वा वेपमानः कंपमानः
नमस्कृत्वा कृतांजलिर्भूत्वा सगद्गदं कंपितस्वरं यथा भवति तथा भीत
भीतः सन् प्रणम्य दंडवन्नतित्वा भूयः पूर्वोपमल्लेभक्ताभक्तको
टिद्वयी गतिं कृष्णमाह ३५

वनमालीटीका ८

भीष्मादिषु जयाशाविषयेषु हतेषु निराश्रयो दुर्योधनो हत एवेत्य
नुसंधाय जयाशापरित्यक्त्वा यदि धृतराष्ट्रः संधिं कुर्यात्तदा पांडवानि
कभ्य... येषां भवेदिति अभिप्रायवान्ततः किं वृत्तमित्यपेक्षायां स
ञ्जय आह एतदिति एतत्पूर्वोक्तं केशवस्य वचनं श्रुत्वा कृतांज
लिः किरीटी शक्रदत्तकिरीटः वेपमानः परमाश्चर्यदर्शनजनित
संभ्रमेण कंपमानोऽर्जुनः कृष्णं भक्तपापकर्षणं भगवंतं नम
स्कृत्वा नमस्कृत्य भूयः पुनरप्याह उक्तवान् सगद्गदं भयेन हर्षे
ण वा अश्रुपूर्णनेत्रत्वे सति कफरुद्धकंठतया वाचो मंदत्वसकं
पकत्वादिविकारः सगद्गदस्तद्युक्तं यथा स्यात् भीतभीतः सन् पु
नः पुनर्नमस्कृत्य पुनरपि प्रणम्यासनं नम्रीभूत्वा इति संबंधः ३५

ऊसमवेजयन्तीटीका ९

यानेव द्रोणभीष्मजयद्रथकर्णादीनाश्रित्य दुर्योधनो युद्धकर
णमेव निश्चितवान् तेषु कालात्मना भगवतैव हतप्रायास्त्वित

स्त्वत्र विजयाशंसा कोऽभयेषां राज्ञां संरक्षणायायातिकथं
वा नवारयसीत्यभिप्रायं संजयस्ततः किंभूतस्तदेत्यपेक्षायामा
ह एतच्छ्रुत्वेति केशवस्य केशौ विधिशिवौ वयतिजनयतीति
तथा सततस्य विधिशिवयोर्जनकस्य भक्तवात्सल्यजलधेर्भग
वत इत्यनेन यो विधिशिवयोः पिता तस्याग्रेऽन्यस्य तव पुत्रः स्व
विजयाय किं तु पापं करिष्यति किं नु मरिष्यत्येवेति सूचितम् एत
कालोऽस्मीत्यारभ्य द्रोणं चेत्यन्तं केशवचनं श्रुत्वा संभ्रमकृताञ्जलिः
कृतसंपुटकरयुगलस्त्वं वेपमानोऽत्यद्भुतघोरदर्शनजनितसं
भ्रमेण कंपमानः सन् भीतभीतो नितिरतिशयभयाकुलः स
न् किरीटीत्यवासवदत्तं किरीटं शिरोभूषणं विद्यते यस्य तथा स
इत्यनेनास्य परमवीरत्वं शिरोमणित्वं सूचितम् पार्थः कृष्णं स
जनशोकमोहादिकर्षणं करं सर्वे येन नमस्कृत्वे त्यागी तं नम
स्कृत्य पुनरपि प्रणम्य अकर्षणीति शयनतन्नम्रो भूत्वा सगद्गदं
नभयेनानन्देन वाष्पपूर्णनेत्रत्वे सति कफरुद्धकंठतया यो मंदं
त्वसकंपत्वादिर्यो विकारः सगद्गदस्तेनोक्तेने न सह यथा
स्यात्तथा भूयएव पुनरप्याह ब्रवीत् ३५

[redacted]

[margin: संजय उवाच]

एतत्पूर्वोक्तं केशवस्य वचनं श्रुत्वा कृतांजलिः किरीटीन्द्रद
त्तकिरीटः परमवीरत्वेन प्रसिद्धः वेपमानः परमाश्चर्यदर्शन
जनितेन संभ्रमेण सभ्रमेणाकंपमानः अर्जुनः कृष्णं भक्ताकर्
कर्षणं भगवंतं नमस्कृत्वा नमस्कृत्य भूयः पुनरप्याह उक्तवा
न् सगद्गदं सगद्गदलयुक्तं यथा स्यात्तथा भीतभीतः अतिशयेन भीतः सन्
पूर्वं नमस्कृत्य पुनरपि प्रणम्यास्य तन्नम्रो भूत्वाप्याहेति संबंधः

[margin: ते सगद्गदं भयेन हर्षेण वाश्रुपूर्णनेत्रत्वे सति कफरुद्धकंठतया यो वाचो मन्दत्व सकंपत्वादि विकारः]

[illegible] ३५

हते भीष्मे तथा द्रोणे कर्णे च विनिपातिते जयद्रथप्रभृतिषु
तेषु जयशेषेषु १ हतोऽङ्गयोधमेनो नूनं तैर्विनाश निराश्रयः
इत्येतदंतं संधाय धृतराष्ट्रो नृपो यदि २ स्व जयाशापरिमर्से

श्री० गी० टी० ५

११५

धिक्कर्यानदास्यथे उभयेषांभवेद्वान्तितिमभिप्रायवांस्ततः किंवृत्ति
मपेक्षायामवाचेतिससंबंधः पूर्वोक्तवचनाकर्ण्यकेशवस्यमहेष्वि
नः ४ इंद्रदत्तकिरीटेनयुक्तोसौशूरसत्तमः निवातकवचादीनांर
णेसंहारकोर्जुनः ५ कृतांजलिःकंपमानःपरमाश्चर्यदर्शनात् न
मस्कृत्यपुनःकृस्नंभक्त्याक्लेशापहंविभुं ६ आहसगद्गदंवाक्यंश्व
णेतिसत्वावहं हर्षेणचभयेनाक्रपूर्णीतिवेसतिस्वयं ७ कफरु
द्धगलत्वेनविकारोयोगिरोभवेत् संदत्वसप्रकंपनरूपःसोयंरि
गद्गदः ८ तयुक्तंवचनंप्राहासौतंभीत्वभीतस्तथा प्रांजुमस्कृत्यपु नः
योपिप्रणम्यानतकंधरः ३५

नीलकंठी टीका १२

भगवतैवमुक्तेसतिपश्चात्किंवृत्तमित्यपेक्षायांसंजयउवाच श्रुत्व
कृतांजलिरित्यादिनाविंश्चेनभगवद्वाक्यात्मवचनंकिरीटीनकरिष्य
तीतिसूच्यते सगद्गदंभयहर्षाद्यावेशेनगद्गदेनकंठकंपनेनस
हवर्ततइतिसगद्गदंयथाभवतितथाआहउक्तवान् भीतभीतःपु
नःपुनर्भीतःप्रणम्याहेतिसंबंधः अत्रआहेतिपदच्छेदेप्रणम्यार्जुनउवाचे
तिपुनरुक्तंस्यात् अतःप्रणम्यअर्जुनउवाचेत्येवसंबंधोनतुप्रण
म्याहेति कातर्हिआहेतिक्रियायागतिः नेयंक्रियाकिंतर्हिआहेतिप्र
सिद्धंसंबोधनपदमव्ययमित्यदोषः ३५

आनंदीटीका स्पष्टार्थम् भगवद्वचनोत्तरका
लिकीमर्जुनावस्थांसंजयउवाच ३५॥

रामकंठीटीका॥ एवंभगवद्वाक्येऽर्जुनावस्थां
धृतराष्ट्रायसंजयउवाच॥ ३५

स्पष्टार्थःश्लोकः ३५

लासिकी [illegible]टीका

ततोयुद्धंतंतद्धृतराष्ट्रंप्रतिसंजय
उवाच एतच्छ्लोकत्रयात्मकंवचनंममापिकालेकालरूपमालाकारेणास्तुत्य
[illegible]नेवेपमानः अत्यन्तस्पष्टम् ३५ ॥

पंचोलीटीका

ततोयद्धृतंतद्धृतांतंधृतराष्ट्रंप्रत्याह संजयउवाचएतदिति किरी

टीअर्जुनःकेशवस्यएतत्पूर्वोक्तंवचनंश्रुत्वाकृतांजलिर्वेपमानः
सन्नमस्कृत्यभूयःपुनरपिकृष्णमेवभीतभीतःप्रणम्यसगद्गदमा
ह ३५

रणवीरसमिद्धोधिनी॥

एवंविश्वरूपदर्शनानंतरं भगवदर्जुनसंवादः कीदृगभूदिति
पृष्टः संजयउवाचैतच्छ्रुत्वेति केशवस्यैतदीदृशंवचनं श्रुत्वा
वेपमानो जातकंपः किरीटी धृतकिरीटोप्यर्जुनस्ततः कृतां
जलिः सन्कृष्णं भगवंतं भूयएव नमस्कृत्वा पौनःपुण्येन का
यवाङ्मनोभिः प्रणम्येति प्रणामपूर्वं सगद्गदया जुगुप्साभंगभया
त्सगद्गदमित्युक्तमिति सगद्गदं वचनं वक्ष्यमाणरीत्या प्रोवाचे
स्यान्वइति ३५॥

मधुभाष्य

अशिबोमायंतर्यामितया जगद्धर्षणादेहृषीकेशः कृष्णं
त्वंस्थानांतनियंतृत्वादेः प्रमाणांतरप्राप्तिहृर्यनेचमित्यशोक्तं ३५

15

भाषा अनुवाद

तिस के बादि जो भया सो संजय धृतराष्ट्र से कहते हैं कि ये
श्रीकृष्ण के वचन श्रवण करि कम्पमान कलेवर किरीटी
अर्जुन हर्ष औ भयके मारे गदगद कण्ठ अति डरे ऐसे हा
थ जोडि कृष्ण को प्रणाम करके आगे कहेंगे जो सो बातें कह
ते भये ३५

चौपई

ऐसेवचन सुन हरिके सोई   कंपतनर जोड करदोई करि
नमस्कार कहे पुनकृष्णहि   गदगदवाक त्रासकोहि नमहि
३५॥

अर्जुन उवाच स्थाने हृषीकेश तव प्रकीर्त्या
जगत्प्रहृष्यत्यनुरज्यते च रक्षांसि भीतानि
दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसंघाः ३६

शाङ्करभाष्यटीका १

स्थान इति स्थाने युक्तं किं तव प्रकीर्त्या त्वन्माहात्म्यकीर्तनेन
श्रुतेन हृषीकेश यज्जगत् प्रहृष्यति प्रहर्षमुपैति तत् स्थाने यु
क्तमित्यर्थः अथवा विषयविशेषणं स्थानइति युक्तो हर्षादिविष
यो भगवान् यत ईश्वरः सर्वात्मा सर्वभूतसुहृच्चेति तथा अनुरज्य
ते अनुरागञ्चोपैति तच्च विषयइति व्याख्येयं किञ्च रक्षांसि भीतानि
भयाविष्टानि दिशो द्रवन्ति गच्छन्ति तच्च स्थाने विषये सर्वे नमस्य
न्ति नमस्कुर्वन्ति च सिद्धसंघाः सिद्धानां समुदायाः कपिलादीनां
तच्च स्थाने ३६

आनन्दगिरिकृतटीका २

किं तदर्जुनो भगवन्तं प्रति सगद्गदं वचनमुक्तवानिति तदाह स्था
नेत्यादि विषयविशेषणत्वमेव व्यनक्ति युक्त इति भगवतो हर्षादि
विषयत्वं युक्तमित्यत्र हेतुमाह यत इति तव प्रकीर्त्या हर्षवदनु
रागञ्च गच्छति जगदित्याह तथेति तच्चानुरागगमनं रक्षःसु
जगदेकदेशभूतेषु प्रतिपन्नेषु कुतो जगतो भगवति हर्षानुरागा
विभ्याशङ्क्याह किञ्चेति इतश्च जगतो भगवति हर्षादि युक्तमि
त्याह सर्व इति ३६

स्वामिकृतटीका ३

स्थान इत्येकादशभिरर्जुनस्योक्तिः स्थाने इत्यव्ययं युक्तमित्यस्मिन्न
र्थे हे हृषीकेश यद्देव त्वमद्भुतप्रभावो भक्तवत्सलश्च ततस्तव प्रकी
र्त्या माहात्म्यसंकीर्तनेन केवलमहमेव न प्रहृष्यामि किन्तु जगत्स
र्वं प्रहृष्यति प्रकर्षेण हर्षं प्राप्नोति एतद्युक्तं स्थाने इत्यर्थः तथा
जगदनुरज्यते अनुरागं चोपैतीति यद्रक्षांसि भीतानि सन्ति दिशः प्रद्र
वन्ति पलायन्त इति यत् सर्वे योगतपोमन्त्रादिसिद्धानां संघा नमस्यन्ति
प्रणमन्तीति यत् तच्च स्थाने युक्तमेव न चित्रमित्यर्थः ३६

पिशाचभाष्यटीका ४

स्थाने युक्तं प्रकीर्त्या प्रकर्षेण कीर्त्तनेनेत्यर्थः ३६

रामानुजभाष्यटीका ५

स्थाने इति स्थाने युक्तं तदेतद्युद्धदिदृक्षयागतमशेषदेवगन्धर्वय
क्षसिद्धविद्याधरकिंनरकिंपुरुषादिकं जगत्त्वत्प्रसादात्त्वां सर्वे
श्वरमवलोक्य तव प्रकीर्त्या सर्वं प्रहृष्यति अनुरज्यते च यच्च त्वामव
लोक्य रक्षांसि भीतानि सर्वा दिशः प्रद्रवन्ति सर्वे सिद्धसंघाश्च नमस्य
न्ति च तदेतत्सर्वं युक्तमिति पूर्वेणान्वयः

अभिनवगुप्तकृतटीका॰ ६

प्रकीर्त्या प्रकीर्तनेन ३६

परमार्थप्रपाटीका ७

स्थाने इति तवाद्भुतसामर्थ्यभक्तवात्सल्यरूपया कीर्त्या तद्गुणश्रवणेन
जगत्प्रहृष्यतीति संहृष्टं भवति तद्धि स्थाने अनुरज्यते अनुरागं प्राप्नोती
ति स्थाने युक्तमेव पुनस्त्वद्भयात्त्वामवलोक्य सर्वे सिद्धसंघाः कपिलादय
स्त्वां नमस्यन्तीति स्थाने युक्तमेव ३६

वनमालीटीका॰ ८

स्थाने इत्यव्ययं युक्तमित्यर्थे हे हृषीकेश सर्वेन्द्रियप्रवर्तकान्तर्यामि
न् यत्त्वमेवाद्भुतप्रभावो भक्तवत्सलस्ततस्तव प्रकीर्त्या प्रकृष्ट
या कीर्त्या निरतिशयप्रशस्ताद्भुतयशःकीर्तनेन श्रवणेन च न
केवलमहमेव प्रहृष्यामि किं तु सर्वमेव जगद्धृतनमात्रं रक्तो विशे
षेण प्रहृष्यतीति प्रकृष्टं हर्षमाप्नोतीति यत्तत्स्थाने युक्तमेवेत्यर्थः त
था सर्वं जगदनुरज्यते च त्वद्विषयमनुरागमुपैतीति च यत्तदपि युक्त
मेव तथा रक्षांसि भीतानि सन्ति दिशो द्रवन्ति सर्वासु दिक्षु पलायन्त
इति यत्तदपि युक्तमेव तथा सर्वे सिद्धानां संघा नमस्यन्तीति यत्तदपि यु
क्तमेव सर्वत्र तव प्रकीर्त्येत्यस्यान्वयः स्थाने इत्यस्य च प्रत्येकाकार
दीप्रमेत्र [illegible] शास्त्रे प्रसिद्धः ३६

कृष्णवैजयन्तीटीका॰ ९

यं नेजयेन स्वसारथ्ये भगवतो यदतिरमणमस्पृहत्वं दृष्टं तदनुभवा
नुरूपं पार्थः स्तौतीति स्थाने इत्यादि [illegible] किरीटिनमित्यन्तैरेकादशभिः
स्थाने हृषीकेशेति स्थाने इत्यव्ययं युक्तार्थकं हे हृषीकेश वा सांत
करणनियंतः इत्यनेन त्वं स्वकीयमतिरमणं रूपं प्रदर्श्य सभक्तेभ्यो

याणि स्वसमस्तवो निकरोषि अभक्तेंद्रियाणि च निजानि तेवोरं रूपं प्र
दर्श्य स्वविमुखानि करोषीति सूचितम् न च विश्वरूपस्य प्रकीर्त्या
प्रहृष्यति कीर्त्या जगत् शिष्टाशिष्टात्मकं चेतनमात्रं सर्वं प्रहृष्य
ति प्रकर्षेण आनंदं प्राप्नोति च पुनरनुरज्यते तद्दिदृक्षया तद्गुणरागं प्राप्नो
ति इति स्थाने युक्तमेव अयमभावः विश्वविग्रहस्य भगवतः कति
चिद्धामानि सौम्यानि कतिचिद्घोराणि रूपाणि संति अस्मिन् जगत्यपि
केचित् शिष्टाः केचिद् अशिष्टाः जनाः संति तत्र ये शुद्धहृदया भागवताः
प्रह्लादनारदादयः शिष्टजनास्ते सौम्यं कारुण्यवात्सल्यसौंदर्यादिक
ल्याणगुणाश्रयं तव रूपमवलोक्य तन्नमनमपि कुर्वंति ये त्वशि
ष्टा जनास्ते तवासाधारणमतिकमनीयं जगन्मोहनं रूपं दृष्ट्वा तव
न तदाश्रयं सौंदर्यादिकीर्तनेन श्रवणेन च मोहिताः संतः प्रहृ
ष्यंति न हि विषयिणी प्रीतिं च कुर्वंति तवाति भयानकं क्रूररूपं च नि
रीक्ष्य कालरूपोऽयं सर्वं जगद्ग्रासयतीत्येवं रूपया कीर्त्या श्रवणे
न च प्रहृष्यंति अशिष्टानां सर्वात्मना विनश्वरस्वभावत्वात् स्वमरण
भयात् स्वरक्षणाय च न हि विषयिणीं प्रीतिं कुर्वंति इति रक्षांसि जगत्सु
मध्ये यानि ग्रामसोपलक्षितानि भूतप्रेतपिशाचकूष्मांडभैरववेता
लादीनि स्वभावविकारात्मकस्वरूपगुणकर्माणि तिरोकरणपरहिंसादि
कर्माणि तानि तव प्रकीर्त्या शिष्टजनैः कृतया गीतया अतीव सिद्धदर्शि
नमस्कारकवचादिकीर्तनेन श्रवणेन च भीतानि [illegible] स्वस्मादपाति
ने भयंकररूपदर्शनानि भयप्रयुक्तानि संति दिशः सर्वा हृदि त्व द्रवं
ति स्वस्वप्राणरक्षणाय पलायंते इति यत्तदपि स्थाने युक्तमेव च पुनः
सर्वे सिद्धसंघाः ये सिद्धा नाम भगवत्स्वरूपगुणयाथात्म्यविदः कपिल
कुमारनारदादीनां संघाः समूहास्ते तव प्रकीर्त्या अस्मे स्वस्वरूपत्वेन
चोक्तान्यात्त्वनामकर्मगुणादिकीर्तनेन नमस्यंति तव सौम्या
सौम्यरूपं दृष्ट्वापि हर्षविषादरहितास्तस्मात् नमनमेव कुर्वंति भगवा
न् यथा यदकरोद्यच्च करिष्यति यच्च करोतीति तत्सर्वं ममास्माकं सर्वेषां मं
गलायैवेति ज्ञात्वा तव सौम्यासौम्यरूपं दृष्ट्वापि हर्षविषादरहितास्त
त्त्वा नमस्कुर्वंति न तु प्रहृष्यंत्यनुरज्यंते वेति यत्तदपि युक्तमेव
त्यर्थः ३६

अर्जुन उवाच एकादशभिः ॥

२ श्री. गी. टी. प स्थाने इत्यव्ययं युक्तमित्यर्थे हे हृषीकेश सर्वेन्द्रियप्रवर्तक यत्त्व
मेवमसंतादृतप्रभावो भक्तवत्सलः ततस्तव प्रकीर्त्या प्रकृष्टया की
र्त्या निरतिशयप्रशस्तस्य कीर्तनेन श्रवणेन च न केवलमहमेव प्रहृ
ष्यामि किंतु सर्वमेव जगच्चेतनमात्रं रक्षोविरोधि प्रहृष्यति प्रकृष्ट
118 हर्षमाप्नोतीति यत्तत्स्थाने युक्तमेवेत्यर्थः तथा सर्वं जगदनुर
ज्यते च तद्विषयमनुरागमुपैतीति च यत्तदपि युक्तमेव तथा रक्षां
[1]भयाविष्टानि सि भीतानि सन्ति दिशो द्रवन्ति सर्वासु दिक्षु पलायन्त इति यत्तदपि युक्त
मेव तथा सर्वे सिद्धानां कपिलानां संघाः समूहा नमस्यन्ति चेति यत्त
दपि युक्तमेव सर्वत्र तव प्रकीर्त्येत्यस्यान्वयः स्थाने इत्यस्य चाव्ययेस्मा
[2]रक्षो कोशमेत्रवेनमेत्रशास्त्रे प्रसिद्धः [illegible]
३६॥ ॥ ॥
[1] स च नारायणाष्टाक्षरस्य दर्शनमन्त्राभ्यां

सदानंदी टीका ११ संपुटितो ज्ञेय इति रहस्यं

सर्वेन्द्रियगणाधीश तव समस्ताद्भुतेश्वरः कीर्तनेन तवासन्नमाशस्य
हृ४ श्रवणेन च १ नाहमेव प्रहृष्यामि केवलं किं तु सर्वतः जगच्चेतनमात्रं
स्थि रक्षोविरोधियत् २ प्रकृष्टहर्षमाप्नोति सर्वथा युक्तमेव तत्त २५
तद्विषये जगत्सर्वमनुरागमुपैति यत् ३ युक्तं तदपि तद्वद्भयाविष्टा
नि संति यत् सर्वासु दिक्षु रक्षांसि पलायते तिसाप्रते ४ सिद्धानां क
पिलादीनां समूहास्त्वां जगद्गुरुं नमस्यंतीति यत्तच्च युक्तमेव जगद्गु
रो ५ प्रकीर्त्येत्यस्य सर्वत्र तवेत्यस्य तथान्वयः स्थाने इति पदस्यार्थो
विषये तद्विशेषणे ६ सर्वात्मा सहस्राक्षी हर्षादिविषयाहरिः ३६

नीलकंठी टीका १२

एकादशभिः श्लोकैरर्जुन उवाच स्थाने इति हे हृषीकेश सर्वेन्द्रिय
प्रवर्तक सर्वान्तर्यामिन् तव प्रकीर्त्या नामसंकीर्तनेन जगत्प्रहृष्य
ति यत्तत्स्थाने युक्तं स्थाने इत्यव्ययं युक्तमित्यर्थे यत्तव प्रकीर्त्या ज
गदनुरज्यते तदपि स्थाने युक्तं यत्तव प्रकीर्त्या रक्षांसि भीतानि सं
ति दिशो द्रवन्ति पलायन्ते तदपि स्थाने युक्तं यच्च त्वां सर्वे सिद्धसंघाः
कपिलादीनां समुदायाः नमस्यन्ति तदपि स्थाने प्रत्ययेस्याकारस्तोत्र
मंत्रवेदमंत्रशास्त्रे प्रसिद्धः स च नारायणाष्टाक्षरस्य दर्शनाद्यक्षरमंत्रा
भ्यां संपुटितो ज्ञेय इति रहस्यं ३६

ग्यानेशीटीका

स्थाने इति विभक्तिप्रतिरूपकमव्ययं युक्तमित्यर्थार्थे एतत्सर्वं तव प्रकीर्त्या
भगवन्नामकीर्तनमात्रेण जगत्प्रहृष्यतीत्यादिकं स्थाने युक्तमेवेत्यर्थः ३६

कस्मदर्ज्जुनः किंप्राहेत्याह ॥ रामकंठीटीका

इत्यं सर्वशक्तेः सर्वेश्वरस्य तव प्रकीर्त्या प्रशंसया सर्वं जगत्प्रहर्षं भजते
तथैव च त्वय्यनुरक्तं भवति तदा तक स्यापकानि रक्षांसि यात्तथा नाति
भयायतस्ततः पलायंते सिद्धसंघा देवविशेषसमूहाः समस्ताः प्रण
मंति च तत्सर्वं स्थाने युक्तं [illegible]
[illegible] ३६

लासिकी [illegible] टीका

हे हृषीकेश इंद्रियस्वामिन् आत्मरूपतयेंद्रियप्रवर्तकः प्रवर्तितेंद्रिये
क्तः ष्वेहृविनियों तव प्रकीर्त्या माहात्म्यसंकीर्तनेन न केवलमहमेव प्र
हृष्यामि यावत्सर्वं जगत्प्रहृष्यति प्रकर्षेण हर्षं प्राप्नोतीति यत् ।
एतत्स्थाने युक्तं भवति नैतद्विचित्रमित्यर्थः तथा सर्वं जगदनुरज्यते
त्वय्यनुरक्तं भवतीति यत् रक्षांसि भीतानि संति दिशो य तत्रतः पला
यंते इति यत् तथा सर्वे सिद्धानां ज्ञानिनां कर्मिणां समूहाः प्रणमंती
ति यत् एतत्सर्वं युक्तमेव सर्वत्र वा को ऽपि तव प्रकीर्त्या स्थाने इत्यस्य चा
न्वयः अयमेवाकारस्तत्र मंत्रेष्वपि शास्त्रे प्रसिद्धः [illegible] ३६

पंचोलीटीका

यदाहार्जुनस्तद्दर्शयति स्थाने इति हे हृषीकेश तव प्रकीर्त्या तव
माहात्म्यकीर्तनेन जगत्प्रहृष्यति हर्षमुपैति च पुनश्चानुरज्यते अ
नुरागमुपैति च पुनः रक्षांसि भीतानि दिशो द्रवंति सर्वे सिद्धसंघाः
कपिलादीनां समूहाः नमस्यंति तत्स्थाने युक्तं ३६

रसावीरसमिद्धोधिनी॥

हृषीकेशेति भगवत्संबोधनं सर्वजगदंतर्यामित्वसूचनार्थं सक
लजगत्तव प्रकीर्त्या त्वन्नामसंकीर्त्या प्रहृष्यति प्रकर्षेण हृष्य
ति अनुरज्यते त्वय्यनुरक्तं च भवति तथा त्वन्नामकीर्तनमहा
त्म्यादेव भवत्केभ्यो भीतानि रक्षांसि दिशो द्रवंतीति तत्ततः प
लायंते तथा च सर्वे सिद्धसंघाश्चापि नमस्यंति भवद्भक्तानि
ति शेषः इत्येतत्सर्वं त्वन्नामकीर्तनमाहात्म्यादेव स्थाने युक्तं
भवतीति ॥३६॥

मध्वभाष्य

हृषीकाणामिंद्रियाणामीशत्वाच्च तेषां विशेषत ईशत्वं च यःश
रीरेति श्रुतिन्यायेन सिद्धं न मे हृषीकाणि पतंत्यसत्पथे इत्यादि
प्रयोगाच्च इतरेषां मोदत्वं प्रसिद्धं: हृष्टा च इमं सोमपा स्वके ये
मे प्रससांसि ते बोधयंस्थापयंश्च जगदुत्पत्त्यादिकं बोध
नात्स्थापनाच्चैव जगतो हर्षसंभवात् अग्नीषोमस्तुतैर्वेभिः क
मभिः पांडुनंदन हृषीकेशोहमीशानो वरदो लोकभावन इति
कथं स्थाने इति तत्राह कस्मादित्यादिना प्राणश्वासात्मा
चेति महात्मा आत्मशो हृषीकेशो भगवते यद्वाप्नोति यदादत्ते य
च्चात्ति विषयानिह यच्चास्य संततो भावस्तस्मादात्मेति भण्यते
इति ३६॥

भाष्य अनुवाद

अब इस श्लोक मे अर्जुन कहते हैं कि हे हृषीकेश जिस हेत तुम ऐसे अद्भुत प्रभाव से युक्त औ भक्त वत्सल हो इससे तुम्हारा माहात्म्य संकीर्तन करने मे केवल हमीने जो हर्ष पाया सो नहीं किन्तु ब्रह्माण्डभर अति हर्षित औ प्रीति युक्त है यह उचित है और इस ब्रह्माण्डमे जो सब सज्जन प्रसन्न औ राक्षस सकल डरके मारे दशो दिशामे भागे फिरते हैं और योग तप मन्त्र आदि के द्वारा सिद्ध गण तुम को प्रणाम करते हैं यह कुछ आश्चर्य नहीं है ३६

चौपई

हृषीकेश तव नाम कहि योगा हर्षित जगत अनुरागहि लोगा
राक्षसभीत दशोदिशि नाशें नमहि सिद्धगण यथा दि प्रकाशें
३६॥

120

कस्माच्च ते न नमेरन्महात्मन् गरीयसे ब्रह्म
णोऽप्यादिकर्त्रे अनन्त देवेश जगन्निवा
स त्वमक्षरं सदसत्तत्परं यत् ३७

शाङ्करभाष्यटीका १

भगवतो हर्षादिविषयत्वे हेतुं दर्शयति कस्माच्चेति कस्मा
च्चेति कस्माच्च हेतोस्ते तुभ्यं न नमेरन् न नमस्कुर्युः हे महा
त्मन् गरीयसे गुरुतराय यतो ब्रह्मणो हिरण्यगर्भस्याप्यादिक
र्त्ता कारणमतस्तस्मा आदिकर्त्रे कथमेव ते न नमस्कुर्युः अतो
हर्षादीनां नमस्कारस्य च स्थाने त्वमर्हो विषय इत्यर्थः हे अन
न्त हे देवेश हे जगन्निवास त्वमक्षरं तत्परं यद्वेदान्तेषु श्रूयते
किं तत् सदसत् यत् विद्यमानं तत् सत् असच्च यत्र नास्ती
ति बुद्धिस्ते उपधानभूते सदसती यस्याक्षरस्य यद्द्वारेण सद
सदित्युपचर्यते परमार्थतस्तु सदसतः परं तत् यदक्षरं वेद
विदो वदन्ति तत्त्वमेव नान्यदित्यभिप्रायः ३७

आनन्दगिरिकृतटीका २

उक्तेऽर्थे हेतुत्वेनोत्तरश्लोकमवतारयति भगवत इति महा
त्मत्वमुत्कृष्टचेतस्त्वं गुरुतरत्वान्नमस्कारादियोग्यत्वमाह गुरु
तरायेति तत्रैव हेत्वन्तरमाह यत इति महात्मत्वादिहेतूनामुक्ता
नां फलमाह अत इति तत्रैव हेत्वन्तराणि सूचयति हे अनन्तेति
अनवच्छिन्नत्वं सर्वदेवनियन्तृत्वं सर्वजगदाश्रयत्वञ्च तव न
मस्कारादियोग्यत्वे कारणमित्यर्थः तत्रैव हेत्वन्तरमाह त्वमिति
तत्र मानमाह यदिति कथमेकस्यैव सदसद्रूपत्वं तत्राह ते
इति कथं सतोऽसतश्चाक्षरं प्रत्युपाधित्वं तदाह यद्द्वारेणेति॥
तत् परं यदित्येतद्व्याचष्टे परमार्थतस्त्विति अनन्तत्वादिना भ
गवतो नमस्कारादियोग्यत्वमुक्तं ३७

स्वामिकृतटीका ३

तत्र हेतुमाह हे महात्मन् हे अनन्त देवेश जगन्निवास कस्माद्धेतो

श्री॰ गी॰ टी॰ प

तेत्वंभवंतंननमेरन्ननमस्कारंकुर्युःकथंभूतायब्रह्मणोपिगरीय
सेगुरुतरायादिकर्त्रेब्रह्मणोपिजनकायकिंचसत्व्यक्तमसद
व्यक्तंचताभ्यांपरंमूलकारणंयदक्षरंब्रह्मतच्चत्वमेवेतिनेवभि
देतभिन्नाःसर्वेनमंतीतिनचित्रमित्यर्थः १

पैशाचभाष्यटीका॰ ४

कस्माच्चेति ननमेरन्नमस्कुः अक्षरंब्रह्मसद्वासन्सदसदात्मक
मित्यर्थःताभ्यांसदसत्परंतत्परंयत् १

युक्ततामेवोपपादयति ॥ रामानुजभाष्यटीका ५

कस्मादिति महात्मंस्तेत्वंगरीयसेब्रह्मणोहिरण्यगर्भस्यापि
टि॰१ आदिभूतायकर्त्रेहिरण्यगर्भादयःकस्माद्धेतोर्ननमस्कुर्युः अनंत
देवेशजगन्निवासत्वमेवाक्षरंनक्षरतीत्यक्षरंजीवात्मतत्वं नजायते
टि॰२ म्रियतेवाविपश्चिदित्यादिश्रुतिसिद्धोहिजीवात्माहिनक्षरतीत्यक्षरंजी
वात्मवस्तुसदसच्चत्वमेवसच्छब्दनिर्दिष्टंकार्यकारणभावेनावस्थि
तेप्रकृतितत्वे नामरूपविभागवत्तयाकार्यावस्थंसच्छब्दनिर्दिष्टं
तदनर्हतयाकारणावस्थमसच्छब्दनिर्दिष्टंतत्परंयत् तस्मात्
प्रकृतेःप्रकृतिसंबंधिनश्चजीवात्मनः परमन्यत्मुक्तात्मतत्वंयत्त
दपित्वमेव [illegible] १

अभिनवगुप्तकृतटीका॰ ६

सदसदर्थत्वेन असदुपलंभप्रमाविषयत्वात् अथवा अभावोपि
स्थितिनिजनिजविशिष्टवाचकसंश्लेषितोज्ञानाकारमनुभवानोनुप
रंब्रह्मसत्ताख्यातिरिक्तः सदसद्रूपाभ्यांचपरंतदुभयत्रुटितिरोधाने
तद्रूपोपलब्धेः १

परमार्थप्रपाटीका॰ ७

तत्रहेतुमाह कस्मादिति भोमहात्मन्महाशयव्यपदेश्यभोग
नंतदेवेशजगन्निवासतेसिद्धाः कपिलादयस्तेत्वांभवाकस्माद्धेतो
टि॰१ र्ननमेरन् नमस्कारंनकुर्युः किंभूतायतुभ्यं ब्रह्मणोजगत्स्रष्टुरपि
गरीयसेश्रेष्ठतमायआदिकर्त्रेच किंपुनरन्यस्य यस्मात्कारणात्
त्वमक्षरंपरंब्रह्मसत्व्यक्तं असदव्यक्तंताभ्यांपरंमूलकारणं १

वनमालीटीका॰ ८

हर्षादिविषयत्वे हेतुमाह कस्मादिति कस्माद्धेतोर्लोलितस्थ्येननमे
रन्नमस्कुर्युः सिद्धसंघाः सर्वेपि हे महात्मन् अनन्तगुणपरिपूर्णाह
अनंतदेशकालापरिच्छिन्नहे देवेश ब्रह्मरुद्रादीनां देवानां नियन्तः
हे जगन्निवास सर्वाश्रयत्वं कीदृशाय ब्रह्मणोपि गरीयसे यकर्त
त्रे आदिकर्त्रे ब्रह्मणो जनकाय त्वमक्षरं स्वरूपतोपरिणामित्वान्नित्या
शादिशून्यं सदसत्तूभावाभावात्मकं कार्यकारणात्मकं वा मूर्त्तामूर्त्ता
त्मकं वा तत्त्वापकं तोन्तदात्मकत्वमित्यर्थः तत्परं ताभ्यां कारणेभ्यो
परं मूलकारणं यदक्षरं ब्रह्म तदपि त्वमेव एतैर्हेतुभिः सर्व्वैर्वस्तुस्व
स्तं सर्वैर्नमतीति न किमपि चित्रमित्यर्थः ३७
कृष्णमैत्रेयत्नीटीका ५
सिद्धसंघानां भगवन्नमने हेतुमाह चतुर्भिः कस्माच्चेति हे महात्मन्
हान् पि कस्माद्धेतोः नमेयुः आत्मा विग्रहो यस्य स तत्त्वम्बा यनेयहामह
नमस्कारं यामाचिन्तेयस्य सतथा सम्बोधने हे हृदकायदेहसम
नेवेत्यर्थः हे अनन्तदेशकालवस्तुपरिच्छेदशून्य स्वरूपसर्वव्या
पिन्नित्यर्थः हे देवेश देवानां ब्रह्मादीनामीशं नियन्तः हे जगन्निवा
सेवतनाचेतनात्मकस्य जगतो निवास आश्रयतेत्वम्पूर्वोक्ताले
सर्वे सिद्धसंघाः कस्माद्धेतोर्नेनमेरन् आत्मनेपदमार्षं अपितत्र
णमेयुरेव ते कीदृशाय स्माद् ब्रह्मणोहिरण्यगर्भस्यापि च कार
३ लिवस्याप्यादिकर्त्रेपि त्रेनारायणाद्ब्रह्माजायते नारायणाद्रुद्रोजा
येत ललाटात्... शूलपाणिरजायतेत्यादि श्रुतिभ्यः कर्त्तेत्यनेनै
व भगवतस्तत्स्मिन्ने सिद्धेप्यादौ सनेन परमेश्वरत्वं तावत्सृष्टि
समये स्वतंत्रेणानायरायाः स्वप्रकृतेः स्वीन् गुणानुस्मायतत्र स्वयेव
कृयेवमसत्स्वीकारमात्रमेव कृतेन तराभ्यां रजस्तमोभ्यां सदलेत्र
त्वविशेषयोर्विधिशिवयोः संयोगवेतन्नकृणाभिमानं वेतन्नद
धीनस्थितिग्रहितिकं च कारयित्वा स्वमसत्तयातन्नक्रुणानुसारेण च
तयोः स्वाधिष्ठितस्य स्वायतस्थितिग्रहतिकस्य स्वलीलारूपस्य जग
तः किंचित्सृष्टिसंहारसामर्थ्यं दत्वातेन तमदधिकारेस्थापयरति
योतितम् यद्वा ब्रह्मणो वेदस्याप्यादिकर्त्रे जनकाय यस्य निश्व
सितमेतदृग्वेदो यजुर्वेदः सामवेद इत्यादि श्रुतेः इयनेन ब्रह्मा

श्री॰
गी॰टी॰
प

दीनांसर्वतेजस्विनांशितकोपयोवेदस्यापिजनकत्वेनभगवतःसर्व
स्थितिप्रवृत्तिहायपित्वेसर्वधर्मकर्मकारयितृत्वंचसूचितम् अतएव
गरीयसेब्रह्मणोप्यकर्तराय अपिशब्देनभगवतःसृष्टिसंहाराधिकारिताक
त्वेनविधिशिवयोरनंतजनकत्वेनतत्प्रेरकत्वेनचसर्वोत्कृष्टत्वंसूचित
म् योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्माइत्यादिश्रुतेः
नन्वादिकर्तासम्भूतानांब्रह्माअग्रेसमवर्ततेत्यादिवाक्याद्ब्रह्मणोभूतादि
कर्तृत्वेनश्रुयेवर्तित्वंचश्रूयतेवसुदेवपुत्रस्यत्वत्समवयस्कस्यममब्र
ह्मजनकत्वंतत्प्रेरकत्वंचकथंवदसीत्याशंक्याभोक्तृभोग्यनियंतृरूप
त्वमेवासीत्याह त्वमक्षरंसदसत्तत्परंयदिति अक्षरंजीवात्मवस्तुत
मेवयदृश्यमुक्तादिभेदवाञ्जलेजीवनत्वंतद्दृश्यगामतयास्थितत्वमे
वासीत्यर्थः यच्चसदसदात्मरूपविभागवत्तयाकार्यं वस्तुसच्छब्द
निर्दिष्टेनतदनर्हतयाकारणावस्थावासच्छब्दनिर्दिष्टेनरशब्दवाच्यप्र
कृतितदपित्वमेवयच्चपरंतत्रात्परशब्दवाच्यात्परात्पराच्चेतनाचे
तनप्रकृतिभ्यांपरमुत्कृष्टंतत्तद्विलक्षणंतन्नियंतृरूपंपरमात्म
ँत तत्त्वंतदपित्वमेवहात्विभोपुरुषोलोकेतस्मातर [illegible] एवत्वंवातः
सर्वाणिभूतानिकूटस्थोऽक्षरउच्यते उत्तमःपुरुषस्त्वन्यःपरमात्मे
त्युदाहृतः इतिवक्ष्यमाणात् एवंतेषांत्वमसिमहात्मत्वादयोनेके
हेतवःसन्त्वेतेषामेकस्याप्युक्तेनमेरन्नपिनमस्युरेवानेकहेतूनांसमुच्चा
लंकारः ३७ ँनेन

भगवतोहर्षादिविषयत्वेहेतुमाह ॥ मधुसूदनीटीका॰ १॰

कस्माच्चहेतोस्तेतुभ्यंननमेरन्नमस्कुर्युरिमेसिद्धसंघाः सर्वेपिहेमहात्म ँन
न्परमोदारचित्तहेअनंतसर्वपरिच्छेदशून्यहेदेवेशहिरण्यगर्भादी
नामपिदेवानांनियंतः हेजगन्निवाससर्वाश्रयत्वंकीदृशायब्रह्म
णोपिगरीयसेगुरुतरायआदिकर्त्रेब्रह्मणोपिजनकायनियंतृत्वा
दुपदेष्टृत्वेजनकत्वमित्यादिरेकैकोपिहेतुर्नमस्कार्यतायांप्रयोजकः
किंपुनर्महात्मत्वानंतत्वजगन्निवासत्वादिनानाकल्याणसमुच्चित ँगुण
इत्यनाश्चर्यमेतान्नमस्कारस्यकस्माच्चेतिचशब्दार्थः चका
रःकिंचसदितिविधित्वेनप्रतीयमानमस्तीति असदितिनिषेधमुखेन
प्रतीयमानंनास्तीति अथवासद्व्यक्तंअसदव्यक्तंत्वमेवतथातत

रेताभ्यां सदसद्भ्यां परं मूलकारणं यदक्षरं ब्रह्म तदपि त्वमेव अतस्त्व
त्तः किमपि नास्तीत्यर्थः तस्माद्ये यदि मत्त्रयष्टुहा त्वं माकञ्चकारमपि
केचिन्नमंतीति पतेनैव त्वमसि त्वां सर्वे नमंतीति न किमपि चित्रमित्यर्थः
[illegible] ३७ स्कं

सदानंदीटीका ११

हर्षादिविषयत्वेपि हेतुमाह नगरास्तेः कस्माद्धेतोर्न नेत्वभ्यं नमस्कु
र्युः स्वेरिताः १ सर्वेपि हे महात्मंस्त्वं परमोदारविक्रूनः अपरिच्छिन्न
देवेश नियंतास्त्वविधेरपि २ हे समस्तलोकेशानानन्तभ्यं कीदृशिवधा
यच ब्रह्मणोपि नियंत्रेतस्मित्तेत्र देशिकायच ३ किंच प्रतीयमाने
यत्तत्सहिंधियित्रिवेनैवे नास्तीतिमानविषयमसत्तेयच्चिषयतः व्य
क्ताव्यक्तेचवासर्वेसदसद्भ्यां परेतथा यदक्षरं परंब्रह्म तदपि त्वंपरा
त्पर त्वत्तोभिन्नेन वस्थूलेनसूक्ष्मेनापि कारणं त्वमात्मा सर्वेवस्तूनां
त्वामेतेहे तदभिदिर्भि सर्वेलोकानमंतीतिन चित्रं किमपीश्वर ३७

नीलकंठीटीका ११

कुतो मां सिद्धसंघा नमस्यंतियतेस्मिण्टहमिव ब्रह्मांडशतानि सृष्टम
र्हतीत्यत आह कस्मादिति हे महात्मन्कस्माद्धेतोस्ते तान नमेरन्न
पितुनमेरन्नेव तत्र हेतुः गरीयसे तेपि गुरवस्त्वमपि गुरुस्त्वया
पित्वमतिशयितोगुरुरसीत्यर्थः कुतो मम सेवातिशयो येन सिद्धा ममव
समानेपि समस्तसंकल्पा देवाः सत्यतआह ब्रह्मणो हिरण्यगर्भस्यापि
आदिकर्त्रे पितामहाय पंचमहाभूतसृष्टिद्वारा ब्रह्मांडस्रजेतेश्य
र्यः जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाचेति मायेनतिस्यसि
द्धेश्वरस्तत्त्वाज्जयातेसर्वेश्वर्यभाजोभवंतिनत्वत्समा ते अत
एव हे अनंत हे देवानामीश जगन्निवासजगतामालयभूत त्वम
एवहे अनंत हे देवानामीश जगन्निवास त्वं सदसत्
तरंश्रुतंब्रह्म कीदृशंयत्परं यत्सदसत्समरं सद्वयं सद्वसदस
तीताभ्यां परं च सदसत्समरे कार्यकारणंतदुभयातीतं चेति त्रिविध
मित्यर्थः ३७

आनंदीटीका

सतः इंद्रियगोचरात् असतइंद्रियागोचरात् प्रधानात्परम् ३७

रामकंठीटीका

तदक्षरब्रह्मदेवमात्मात्कृतं परंत्वत्स्वरूपं परात्मेशान्तनरण्याह ॥

गी.
टी.ए.

अथवा कस्मात्तव हेतोरेते सिद्धादयस्त्वां न नमेयुः महात्मन्परम
प्रकर्षको हे यस्मात् ब्रह्मणोपि प्रजापतेरपि गरीयसे परमगुरवे यतः आ
दिकर्त्रे आधारायस्य हि तस्यापि जन्महेतवे हे अनंत अपरिच्छिन्नमाहात्म्य
यतस्त्वं सत इंद्रियगोचरादि रूपं धारणीयाहं त्वं तेनाय त्वं अक्षतिरिक्तं
तथा सत् असद्भावरूपादपि यत्परमक्षरमविकारि तत्तत्त्वं परमार्थसत् तv
तमतो वेदैकैकस्वभावमनन्यवेद्यं परमकारणं त्वां कथं ते सिद्धादयो वि
दितवेद्याः संतो न नमस्युरिति तात्पर्यम् [illegible] श्र^
[illegible] ३७ ॥

लासिकी [illegible]टीका

तत्रहेतुमाह॥ हे महात्मन् व्यापक अनंत अपरिच्छिन्न हे देवेश हे जगन्निवास स्थावर
जंगमात्मकलोकाश्रय ते तुभ्यमीश्वराय सर्वे सिद्धसंघाः कस्मात्कुतो
हेतोः न नमेरन् न नमेयुः अत्र हेतुगर्भविशेषणमाह ब्रह्मणोपि परब्र
ह्मसकाशादपि गरीयसे गुरुतराय अतः आदिकर्त्रे जगतः प्रथमनिर्मात्रे
ब्रह्मणोपि निष्क्रियत्वादीश्वरस्यैव प्राधान्येन निर्मातृत्वमतो ब्रह्मणः स
काशाद्गरीयस्त्वम् तथा त्वमेव प्रवरोक्तरं हृदयस्यापरपर्यायमात्मरूपं
तथा सत्स्थूलमसत्सूक्ष्ममपलं भाविषयं तत्परं तयोरपि कारणभूतं
यस्माद्याथनत्सर्वं तत्त्वमेव अतएतेषामनमनमस्यापि दर्शनांतरोक्तं
कर्तृत्वमनुपपन्नम् तवैवादिकर्तृत्वात् [illegible] ३७ ॥

पंचोलीटीका

भगवतो हर्षादिविषयत्वे हेतुं दर्शयति कस्माच्चेति हे महात्मन्
बहुनस्तिनभ्यं गरीयसे गुरुतराय कस्माद्धेतोर्न नमेरन् न नमस्कुर्युः
यतो ब्रह्मणो हिरण्यगर्भस्यापि आदिकर्ता कारणमतः आदिकर्त्रे
कथमेव न नमस्कुर्युः अतो हर्षादीनां नमस्कारस्य च स्थानत्वमहो
विषय इत्यर्थः हे अनंत देवेश हे जगन्निवास यत् वेदांतेषु परं अक्षरं
श्रूयते तत्त्वं सत् विद्यमानं असत् अविद्यमानं कार्यकारणं तत्त्वं ३७

रणवीरसमिद्धोधिनी ॥

इत्थं भगवद्रूपं परामृश्यांतः सिद्धादयश्च हर्षादिहेतोः किं न
नमस्कुर्वंतीत्याह कस्माच्चेति हे महात्मन् ते सिद्धादयो गरीय
से गरिमाशक्तिमते तएव ब्रह्मणोपि स्रष्टिकर्तरेप्यादिकर्त्रे प
तादृग्विलक्षणस्वभावायते तुभ्यं कस्मान्न नमेरन् अतो न न
मस्कारंकुर्युरर्थाद्भगवन्नामसंकीर्तनमेव हर्षादिकारणमि
त्यवधार्य तुभ्यं नमस्कुर्वंतीति अनंतनपरमहंसरमसि यत्परमह
ंसदसद्ब्रह्म हेदनमसमहंयेंतदात्मकं निर्विकारं निरुनरंपरमार्थ
तत्त्वं वेदांतेषु श्रूयते इति ३० ॥

मधुभाष्य

तत्परं सदसतोः परम् असद्ब्रह्म सद्वै वचयद्धिषंसदसतः परमि
ति भारते एकस्त्वमेव कारयिता नान्योस्त्वथापि स्वकं रूपं त
थांतप्रतीत्या अन्यथा तदपि स्वकमेव प्रमाणानि त्वत्कानि ग
रत्नात् ३० ॥

123/1

भाषा अनुवाद

और सबके हर्ष औ प्रणाम करने मे अब हेत कहते हैं कि हे महात्मन् हे अनन्त हे जगन्निवास श्रीकृष्ण क्यों न ये सब प्रणाम करैं गे कि जो तुम ब्रह्माके भी आदि कर्ता करके जनक और गुरुहो और सत् कहे व्यक्त प्रगट जो जगत् । औ असत् जो अव्यक्त प्रकृति माया इन दोनो से पर अर्थात् मूल कारण रूप अक्षर कहे अविनाशी जो ब्रह्म सो भी तुम हो तौ नवधा भक्ति द्वारा जो सब तुमको प्रणाम करते हैं सो उचित हैं ३७

चौपई

हे महात्मा किम तो हि नमे न सोई भूरि शक्ति आदि कर्ता ब्रह्म
जोई सुखधाम अनंत सम जगत निवासा तुं अखंड सदसत पर
जो भासा ३७

124

त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य
परं निधानं वेत्तासि वेद्यञ्च परञ्च धाम त्व
याततं विश्वमनन्तरूप ३८

शाङ्करभाष्यटीका १

पुनरपि स्तौति त्वमिति त्वमादिदेवो जगतः स्रष्टृत्वात् पुरुषः पु
रिशयनात् पुराणश्चिरन्तनस्त्वमेवास्य विश्वस्य परं प्रकृष्टं निधा
नं निधीयतेऽस्मिन् जगत् सर्वं महाप्रलयादाविति किञ्च वेत्ता
सि सर्वस्यैव वेद्यजातस्य यच्च वेद्यं वेदनार्हं तच्चासि परञ्च धाम प
रमं पदं वैष्णवं त्वया ततं व्याप्तं विश्वं समस्तं हे अनन्तरूप अन्तो
न विद्यते तव रूपाणां ३८

आनन्दगिरिकृतटीका २

सम्प्रति जगत् स्रष्टृत्वादिनापि तद्योग्यत्वमस्तीति स्तुतिद्वारा द
र्शयति पुनरपीति जगतः स्रष्टा पुरुषो हिरण्यगर्भ इति पक्षे प्रमा
ह पुराण इति स्रष्टृत्वे निमित्तमेवेति तटस्थेश्वरवादिनस्तान् प्र
त्युक्तं त्वमेवेति महाप्रलयादाविस्यादिपदमवान्तरप्रलयार्थं ईश्व
रस्योभयथा कारणत्वं सर्वज्ञत्वेन साधयति किञ्चेति वेद्यवेदितृ
भावेन द्वैतानुपपत्तिमाशङ्क्याह यच्चेति प्रकाशात्मत्वेनस्य ब्रह्म
णोऽर्थान्तरत्वमाशङ्क्योक्तं परश्चेति यत्परमं पदं तदपि च त्वमे
वेति सम्बन्धः तस्य पूर्णत्वमाह त्वयेति व्याप्यव्यापकत्वभेदं
शङ्कित्वा कल्पितत्वात्तस्य नैवमित्याह अनन्तेति ३८

स्वामिकृतटीका ३

किंच त्वमिति त्वमादिदेवः देवानामादिर्यतः पुराणोऽनादिपुरुष
स्त्वमतएव त्वमस्य विश्वस्य परं निधानं लयस्थानं तथा विश्वस्य वे
त्ता वेदिता ज्ञाता च त्वं यच्च वेद्यं वस्तुजातं परं च धाम वैष्णवं पदं तद
पि त्वमेवासि अतएव हे अनन्तरूप त्वयैवेदं विश्वं ततं व्याप्तं एतैश्च
समभिहितैर्हेतुभिस्त्वमेव नमस्कार्य इति भावः ३८

पिशाचभाष्यटीका ४

त्वमादिदेव इति तदपि त्वं निधीयतेऽस्मिन्निति निधानं वेत्तासि वेदि

श्री· त्वधामसंज्ञः तत्त्वार्थे १८

गी·टी· रामानुजभाष्यटीका ५

त्वमादिदेवः निधीयते त्वयि विश्वमिति त्वमस्य परं निधानं विश्वस्य शरीरभूतस्या
त्मतया परमाधारभूतस्त्वमेवेत्यर्थः वेत्तासि सर्ववेदितावेद्यञ्च
सर्वं त्वमेव एवं सर्वात्मतयावस्थितस्त्वमेव परं च धाम स्थानं प्राप्य
स्थानमित्यर्थः त्वया ततं विश्वमनेन रूपेण व्याप्तेन न विश्वं विद्य
विन्मिश्रं जगत् ततं व्याप्तं त्वमेव वाय्वादिशब्दवाच्य इत्याह १८

अभिनवगुप्तकृतटीका ६

स्पष्टार्थे १८

परमार्थप्रपाटीका ७

तदेवाह त्वमिति आदिभूतो देवः स्थूलसूक्ष्मप्रपंचकारणीभूतः
स आत्मा त्वमेव स एव पुराणः पुरुषो हिरण्यगर्भस्त्वमेव ततो वि
श्वस्य चराचरस्य निधानं लयस्थानं विराड्रूपस्त्वमेव ततो जीव
रूपेण वेत्ता त्वमेवासि भोक्ता तेन रूपेण समष्टिरूपं परं धाम निवा
सस्थानं ब्रह्मलोकाख्यं त्वया ततं विस्तारितं तत्तदपि त्वमेव एवमेक
एव त्वं निरूपितप्रकारैर्वर्तसे इत्यर्थः श्रुतिरपि यो नः पिता जनि
ता यो विधाता धामानि वेद भुवनानि विश्वा यो देवानां नामधा एक
एव तं संप्रश्नं भुवना यन्त्यन्येति भाष्यं यो नोऽस्माकं पिता बीजरूपः
सन् स ततः जनिता निर्मापकः सूक्ष्मभूतरूपो हिरण्यगर्भः ततः
स्थूलभूतं विदधातीति विधाता विराट् ततो विश्वा विश्वानि सर्वाणि
धामानि शरीराणि भुवनानि भूर्भुवः स्वरादीनि जीवरूपेण यो वे
द य एव देवानां उरुस्वरूपाणां नामधा स्वप्नादिनामप्रकारैरनेको
प्येक एव तमेवविधं भुवनाभुवनानि चराचराणि संप्रयन्ति
कीदृशः परमेश्वर इति प्रश्नं कुर्वन्तीत्यर्थः ग्रन्थान्तरे वेलो मेनसु
तिरेव प्रश्नोत्तरे वदति एकपाद्भूयो द्विपदो विचक्रमे द्विपात्त्रिपा
दमभ्येति पश्चात् चतुष्पादेति द्विपदामभिस्वरे संपश्यन् पङ्क्तीरु
पतिष्ठमान इति एतद्भाष्यं जीवो ब्रह्मैकपादमिमं कर्मकास्क
पाजीवः भूयोभ्यासादिना द्विपदः विराट्प्रपञ्चपात्रं विचक्रमे सामा
तिपश्चादनन्तरं द्विपाद्वैराजेत्रह्म त्रिपादं हिरण्यगर्भात्मं एवेति
त्रिपाद्भूयं उदेदिति श्रुतेः तदपि वदत एवास्य सूर्यब्रह्मेति पदं द्विपदां

मनुष्याणाममिस्वरूपदेवकायोपकषवादिपंक्तीः सप्रपञ्चस्मातिवे
नपञ्चपन्नपतिष्टमामोस्मिसपवपरमेश्वर इत्यर्थः ३८

वनमालीटीका ८

त्वमादिदेवोजगतःकारणत्वात् पुरुषःपूर्णःपूरयितातन्त्यामी
वपुराणश्चिरंतनः त्वमस्यविश्वस्यपरंनिधानंविश्वस्यास्मिन्निश्वि
तिलयाधारइत्यर्थः अगाडदयादिकंस्तवेनप्रधानात्मत्वंजीववा
हुत्यर्थंसर्वज्ञत्वमाह वेत्तासिवेदितासर्वस्यासिवेद्यंचसर्वैर्वेदवे
ती द्यंचसर्वज्ञत्वयत्वामेवबोधयंत्यर्थः वेदैश्चसर्वैरहमेववेद्य इति
वक्ष्यमाणत्वात् सर्वज्ञोमुमुक्षुभिर्ज्ञातव्यःसर्वज्ञक्रतिवाध्यानेनत्वंगुणानु
मुलन्नेयोमुमुक्षुभिर्ज्ञेयस्त्वमेवेत्यर्थः परंधामप्रकाशरूपंवात्वम
व इदंसर्वंजगत्त्वयाव्याप्तंतथाक्रिताधारत्वेनोत्पादकत्वेनपालक
त्वेनचततंत्वयामेवब्रह्मशुक्रजीवजडानांपालकादित्वमेवत्यर्थः
अनंतरूप अनंतरूपेषुपिदेशकालगुणैरियत्ताहीनैकरूप
तदेकमव्ययमनंतरूपमितिस्क्रतेः ३८

ऊसमवैजयन्तीटीका ९

भगवतःसर्वपरत्वंप्रतिपादयन्नस्तुइंकारणमनःस्तौति त्वमादिदे
व इति आदिदेवो देवानांतत्ताधिष्ठात्मणमादिःकारणमादि
देवस्त्वमसिजगतःसर्गहेतुत्वात् अतएवपुराणःसनातनःपुरुषः
पूरयिताजगत्पालकश्चत्वमेवअस्यविश्वस्यपरंसर्वोत्कृष्टंनिधा
नंनिधीयतेसर्वंयस्मिन्निति निधानंविश्वलयस्थानंचत्वमेवतन्
तुकालकर्मप्रधानपरमाणवादीनांजगल्लयस्थानादिकारणत्वसम्प
स्तिरित्यमेवतत्कारणत्वकथंवदसीत्याशंक्याह तेषांजडत्वेनज्ञानप
मोश्रयत्वाभावान्नकारणत्वंततेवनतदाश्रयत्वेनततस्मभवतीत्याह
वेत्तासीति वेत्तासर्वेषांचेतनानामवेतनानांचस्वरूपविषयितत्वा
नात्वमेवासि अतस्त्वमेवकारणमित्यनेनकालादिषुजडत्वंगौणे
कर्तृत्वंतत्त्वमोहत्वादिकेषमंततेअनेन हरतोपालाश्रम
वत्तितिसूचितम् वेद्यंशास्त्रैर्मुमुक्षुभिर्वावेदनविषयंयद्वस्तुतद
पित्वमेवासि यद्वाजगतियोवेत्ता वेदिता यच्चवेद्यंवस्तुस्तितदु
भयंसर्वंत्वमेवासिनतुवेत्तुर्वेद्यमोरेकांतेत्वन्नहिवेदनरूपंवेदितारि
परमार्थसंबंधाभावेनसर्वस्यवेद्यस्यकस्मिततत्वादहंतस्मिहितिति

वेद्यमाह त्वयाततमिति विश्वमिति हेतुनेनेत्र रूपदेशकालाद्यपरिच्छिन्नरू
पेण व्याप्यव्यापकेन परमपुरुषेण व्याप्यरूपं चिदचिन्मिश्रं विश्वं तत त्वया
ऽव्याप्यस्य व्यापकादपृथक्सिद्धस्वरूपस्थितिप्रवृत्तिकत्वाद्व्याप्य
रूपेणाभिन्नमपीश्वरव्याप्याः भिन्नमिति व्याप्यभिन्नाभिन्नजगदिति सिद्धं
नन्वद्वैते यथा व्यवहारदशायां व्याप्यस्य सद्भूतत्वेनैव व्यापकस्य व्या
पकत्वसिद्धिर्न तु सद्भूतत्वेन तथा परमार्थदशायामपि वेद्यस्य सद्भूतत्वे
नैव वेदितृत्वं वेदितृत्वसिद्धिर्न तु कल्पितत्वेन न च परमार्थदशायां वे
द्यवेद्यसंबंधाभाव इति वाच्यं तत्राप्यनयोः संबंधः स्यान्नवा हि यस्य
वेदितृत्वं विदिक्रियाश्रयरूपस्य सर्वपदस्य वेद्यरूपस्य चाविदितिपद
स्य संनिवेशात्तत्स्वरूपयोः स्वत्व तत्त्वयस्य वेद्यत्वे इदमायाः स्वायाम
वलंबीश्वरं प्रतिपादयंति न तु निर्विशेषं ब्रह्मेति वाच्यं ब्रह्मणो ज्ञा
पतेः तत्रास्माभिरिष्टत्वात् भवदभिमतस्य ब्रह्मणस्तु ज्ञानीत्वाज्ञानी
वेत्तृत्वानधर्माश्रयत्वेन ब्रह्मणो निर्विशेषत्वसिद्धांतभंगोऽहंतापत्ति
रस्मादिमतेंऽकृतर्कनिराशेः प्रकृतिमनुसरामः परं च धाम परं प्र
कृतिप्राकृतिवत्स्याद्वस्तुविलक्षणं च शब्दात्कालादयपरिवर्तमान
मप्राकृतं परमपदं परमव्योमादिशब्दाभिधेयं यामस्तु कप्राप्यस्था
नं यत्तदपि त्वमेवासि ३८

मधुसूदनीटीका ८

भक्त्युद्रेकात्पुनरपि स्तौति॥

त्वमादिदेवः जगतः सर्वहेतुत्वात् पुरुषः पूरयिता पुराणः अना
दित्वमस्य विश्वस्य परं निधानं लयस्थानत्वात् विधीयते सर्वमस्मि
न्निति प्रवेशक्षिप्रलयस्थानं तेनोपादानत्वमुक्तं सर्वज्ञत्वेन प्रधा
नेष्यावर्तयन्निमित्तत्वमाह वेत्तावेदिता सर्वस्यापि हेतापत्तिनिवार
यति यच्च वेद्यं तदपि त्वमेवासि वेदनरूपवेदितरि परमार्थसंबं ध
धाभावेन सर्वस्य वेद्यस्य कल्पितत्वात् अत एव परं च धाम त्वाहि
दानंदघनमविद्यातत्कार्यनिर्मुक्तं विष्णोः परमं पदं तदपि त्वमे
वासि त्वया सद्रूपेण स्फुरणरूपेण च कारणेन ततं व्याप्तमिदं स्वतः
सत्तास्फूर्तिशून्यं विश्वं कार्यमायिकसंबंधेनैव स्थितिकाले हे अनंत
रूपापरिच्छिन्नस्वरूप ३८

सदानंदीटीका ११

भक्त्युद्रेकात्पुनः स्तौति भगवंतमर्जुनः सारथीः जगतः सर्वहेतुत्वादादि
देवः सनातनः त्वमनादिरशेषस्य लयस्थानतया सच निधानं ज॰

गतः सर्वोपादानत्वेन कारणं वेदिता सर्वविश्वस्य वेदनार्हं त्वमे
वच समस्तस्यापि वेद्यस्य ज्ञातरि ज्ञानरूपिणि कल्पितत्वात्सं
वेद्यो वास्तवो दृश्यसाक्षिणः अविद्यादिविनिर्मुक्तं सद्विद्यातद
सहये ध धामपरं धाम विश्वव्याप्तितत्त्वमेव परं पदं सत्तास्फूर्तिस्व
रूपेण त्वया व्याप्तमिदं जगत् स्वतः सत्तादिशून्यं तद्धि सर्वं कार्यं हि
मायिके त्वयि मायिकसंबंधात्स्थितिकालेऽपि सर्वग ३८

नीलकंठीटीका ३८

पुनरपि स्तौति त्वमिति आदिदेवो जगतः स्रष्टृत्वात् पुरुषः सर्व
शरीरशायी पुराणः शरीरनाशादिनाप्यविनश्यन् विश्वस्यास्य
त्वं परं निधानं निधीयतेऽस्मिन्निति लयस्थानं सांख्यानां जडं प्रकृ
तिं वारयति वेत्ता ज्ञाता वेद्यं दृश्यं च त्वमेव परं वेद्यं वेद्याभ्यामस
त्वाम चेतनं त्वया विश्वं ततं व्याप्तं स्वसत्तास्फूर्तिभ्यां हे अनंतरू
प त्रिविधपरिच्छेदशून्यस्वरूप ३८

आनंदीटीका

३८ ॥

रामकंठीटीका

अथ यथार्जुनं भगवद्धर्मानुदीरयति ॥
वक्ष्यमाणा धर्मा एते भगवद्विषयाः ग्राह्याः किंच ३८

लासिकी [illegible]टीका

यः

किंच पुराणः पुरुष ईश्वराख्यस्त्वमादिदेवः प्रथमोपास्यो नी तथास्य रंताव
द्धार्यस्य जगतः परं निधानम् प्रकृत्याख्यमाश्रयस्त्वमेव तथा त्वमे
व जीवरूपेणावेदकोऽसि तथा वेद्यं वस्तुजातं च त्वमेव परं धाम च मो
क्षाख्यं त्वमेव अतएव विधानेनानंतरूपत्वये स्वरेणा विश्वं सर्वं ततं व्या
प्तम् ३८

पंचोलीटीका

पुनरपि स्तौति त्वमादीति हे अनंतरूप त्वमादिदेवः जगतः स्र
ष्टृत्वात् पुरुष पुरि शयनात्पुरुषः पुराणश्चिरंतन अस्य जगतः
परं प्रकृष्टं निधीयते महाप्रलयादौ जगत्सर्वं यस्मिन्निति निधानं
वेत्तासि सर्वस्य ज्ञातासि वेद्यं ज्ञेयमपि त्वमसि परमुत्कृष्टं वैसत्वं पा

दंत्वमसित्वयेदंविश्वंततंव्याप्तं ३८

रणवीरसमिद्धोयिनी

पुनरपिस्तौति त्वमादीति निगदमाख्यातमेतच्छ्लोकत्रयम् ३८ ॥

मधुभाष्य

३८ ॥

भाषा अनुवाद

और संपूर्ण देवतों के आदि भूत जो अनादि पुरुष तुम सो इस विश्वके पर निधान कहे लयस्थान औ विश्वके ज्ञाता औ जो कुछ जानने के योग्य वस्तु हैं सो तुम हो और परम धाम जो विष्णुपद सोभी तुम हो इसैसे हे अनन्तरूप कृष्ण तुम इस विश्वमे व्याप्त हो इन सात हेतवों के द्वारा भी तुमही नमस्कार योग्य हो ३८

चौपई

आदिदेव तं पुरुष पुराणा तुंइस जगको परम निधाना वेत्ता
वेद्य परम धाम हि जोई अनंतरूप तव विस्तत सम सोई ३८॥

वायुर्यमोऽग्निर्वरुणः शशाङ्कः प्रजापतिः
स्त्वं प्रपितामहश्च नमो नमस्तेऽस्तु सहस्र
कृत्वः पुनश्च भूयोपि नमो नमस्ते ३९

शाङ्करभाष्यटीका १

किञ्च वायुरिति वायुस्त्वं यमश्चाग्निर्वरुणोऽपांपतिः शशाङ्क
श्चन्द्रमाः प्रजापतिस्त्वं कश्यपादिः प्रपितामहश्च पितामहस्यापि
पिता प्रपितामहो ब्रह्मणोपि पिता इत्यर्थः नमो नमस्ते तुभ्यम
स्तु सहस्रकृत्वः पुनश्च भूयोपि नमो नमस्ते बहुशो नमस्कारक्रि
याभ्यासावृत्तिगणनं कृत्वसुचोच्यते पुनश्च भूयोपीति श्रद्धाभक्त्य
तिशयाद परितोषमात्मनो दर्शयति ३९

आनंदगिरिकृतटीका २

तस्य सर्वात्मत्वे हेत्वन्तरमाह किञ्चेति कश्यपादिरित्यादिशब्दे
न विराट्दक्षादयो गृह्यन्ते पितामहो ब्रह्मा तस्य पिता सूत्रा
त्मान्तर्यामी चेत्याह ब्रह्मणोपीति सर्वदेवतात्मत्वमेवमुक्ते फ
लितमाह नम इति सहस्रकृत्व इति कृत्वसुचो विवक्षितमर्थमा
ह बहुश इति पुनरुक्तितात्पर्यमाह पुनश्चेति श्रद्धाभक्त्योरा
तिशयात्कृतेपि नमस्कारे परितोषाभावाद्बुद्धेरात्मनोऽलंप्रत्यय
राहित्यं तद्दर्शनार्थं पुनरुक्तिरित्यर्थः ३९

स्वामिकृतटीका ३

इतश्च त्वमेव सर्वतः नमस्कार्यः सर्वदेवात्मकत्वादिति स्तुवन्नेव
मपि नमस्करोति वायुर्यमोऽग्निरिति वाय्वादिरूपस्त्वमिति सर्वदेवा
त्मकत्वोपलक्षणार्थमुक्तं प्रजापतिः पितामहः तस्यापि जनकत्वा
त्प्रपितामहस्त्वं अतस्तेतुभ्यं सहस्रकृत्वः सहस्रशोपि नमोस्तु भूयो
पि पुनरपि सहस्रकृत्वः नमो नम इति [illegible]
[illegible] ३९

पिशाचभाष्यटीका ४

वायुरिति प्रजापतिर्दक्षः पितामहो ब्रह्मा तस्य पितामहः ३९

रामानुजभाष्यटीका ५

अतस्त्वमेव वेद्यादिशब्दवाच्य इत्याह ॥ ॥ ॥ ॥

श्री॰
गी॰ टी॰
५

वायुरिति सर्वेषां प्रपितामहस्त्वमेव सर्वोऽसौ प्रजानां पितरः प्रजा
पतयः प्रजापतीनां हि पिता हिरण्यगर्भः प्रजानां पितामहः हिर
ण्यगर्भस्यापि पिता त्वं प्रजानां प्रपितामहादीनामात्मतया तत्तछ
ब्दवाच्य इत्यर्थः ३९

अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थं ३९ ॥ ॥ ॥

परमार्थप्रपाटीका ७

अथानेन रूपत्वमेव प्रकटयति वायुरिति वाय्वादिसप्तभिः प्रका
रैस्त्वमेवासि तस्मै तेन त्वं भण्यमानमात्र आदरे वीप्सा अथ किंतु
नः सप्तरूपात्मने सहस्रकृत्वः सहस्रप्रकारात्मने भूयोऽपि नमो
नमः ३९

वनमालीटीका ८

वैदिकसर्वशब्दवाच्यस्त्वमेवेत्याह वायुरिति वाययति सर्वान् ग
मयति प्रेरयतीति वायुः यमयन्तः स्य इति यमः अग्रं गमयति चेष्ट
यतीत्यग्निः सुकृतिभिः सेव्यत्वेन स्वाश्रितान् वृणोतेवा वरुणः श
शाङ्कनाच्छशाङ्कः वय्वादिनियामकत्वाद्वा तत्तद्वाच्यः इदं वेद
रुद्रसूर्यादिशब्दः प्रवृत्तिनिमित्तानां धर्माणां पोष्कल्यस्य भगवत्ये
व सत्त्वेन समन्वयाध्यायोक्तरीत्या सर्वशब्दवाच्यस्त्वमेवेति भावः
प्रजानां पतिर्जगतः पितुरपि च तथा ब्रह्मणस्यापि पिता त्वमेव यतः स
र्वदेवानां नियामकः पिता च त्वमतो मम त्वं भण्यमानमोऽस्तु स
हस्रकृत्वः पुनश्च भूयोऽपि पुनरपि नमस्ते भक्तिश्रद्धातिशयेन
नमस्कारेष्वलंप्रत्ययाभावो नमस्कारानुरूपान्यूच्यते ३९

ऋस्वमवैजयन्तीटीका ९

तव सर्वशब्दवाच्यत्वेन सर्वात्मत्वेन च सर्वदेवरूपत्वात् सर्वैर्नमस्का
र्य इति त्वत्वयमपि नमस्करोमीति वायुर्यमोऽग्निरिति वायुरेकोनपं
चाशत् यमः प्रजासंयमनकर्ता अग्निर्भौमदिव्याकरजभेदात्त्रिविधः
वरुणो जलाधिपतिः शशाङ्कः पीयूषस्यूलतोयपीयोषकश्चन्द्रः
त्वं ब्रह्मादीनामप्युपलक्षणमेतत् प्रजापतिः जातित्वादेकवचनम्
मनुमरीच्यादयः प्रजापतय इत्यर्थः चकारात्पित्र्यपितामहोऽग्रहोऽत्र तत
स्तेषामवस्थापकत्वात्प्रजानां प्रजानां मनुमरीच्यादयः पितरस्तेषां पि

ता ब्रह्मा स त त त्वज्ञानात्पितामहस्तस्यापि पिता। तत्सर्वेषां तत
त्वज्ञानोपपितामहस्त्वमेवासि पुत्रपितृपितामहादीनां सर्वेषामा
त्मतया तत्र कृत्वा त्वमेवेत्यर्थः यस्मादेवं तस्मात्त्वं यथा सर्वै
र्दिवैस्तुत नमस्योसि तथा ममापि नमस्य सेइस्मादनमोनम इति
सहस्रकृत्वस्तुभ्यं नमोनमो मम नमस्कारोस्तु पुनश्च भूयोपि पु
नरप्यसकृदपि ते नमोनमः अनया नमस्कारावृत्त्या श्रद्धाभक्त्या
तिशयेन नमस्कारेष्वलंप्रत्ययाभावः सूच्यते ३९

मधुसूदनीटीका ९

वायुः यमोग्निः वरुणः शशांकः सूर्यादीनामप्युपलक्षणमेतत् प्र
जापतिः विराट् हिरण्यगर्भश्च प्रपितामहश्च पितामहस्य हिरण्यग
र्भस्यापि पिता त्वं यस्मादेवं सर्वदेवात्मकत्वात्त्वमेव सर्वैर्नमस्कार्यो
सि तस्मान्ममापि वराकस्य नमोनमस्ते त्वमस्तु सहस्र कृत्वः पु
नश्च भूयोपि पुनरपि नमोनमस्ते भक्तिश्रद्धातिशयेन नमस्कारे
ष्वलंप्रत्ययाभावोऽनया नमस्कारावृत्त्या सूच्यते ३९

सदानंदीटीका ११

वायुः सर्वजगत्प्राणो यमः प्राणिनियामकः अग्निः समस्तदेवानां मुखे
प्राणेन पावकः १ प्राणाप्यायनकर्त्ता सोवरुणो रसपालकः शशां
कश्चौषधीस्वामी तथा सूर्यादयोपि च ग्राः २ प्रजापतिर्विराट् सम्राट् सृ
ष्टिकर्त्ता च विश्वसृक् पितामहस्य ब्रह्मणश्च पिता त्वं जगदीश्वरः ३ सर्व
देवात्मकत्वेन नमस्कार्योसि सर्वकैः यतस्तस्माद्वराकस्य ममापि ते
नमोनमः ४ तुभ्यं सर्वात्मने भूयोभूयोपि सहस्रशः सहस्रकृत्वो
भूयोपि तुभ्यमस्तु नमोनमः ५ भक्त्याधिक्यान्नमस्कारेष्वलं बुद्धेर
भावतः अज्ञानयानमस्कारावृत्त्या सूच्यते त्वयापि ६ ३९

नीलकंठीटीका १२

[illegible]
[illegible]
[illegible] सर्वदेवतात्मत्वेन स्तौति वायुरिति प्रजा
पतिर्दक्षादिस्तत्पुत्रो वा प्रपितामहस्त्वं ब्रह्मणोपि पिता ३९

आनंदीटीका ॥ एवं परं प्रणिपत्यापरमाह ॥

श्री॰ [illegible]भावः। अनन्तदेवेश [illegible] महाविभूते।

गी॰ टी॰ हेसर्वमहाविभूते सर्वेभ्यः ऐश्वर्यगुणोत्कर्षेभ्यः महतीप्रकृष्टाविभूतिः

५ शक्तिविस्फार सर्वोदयमोक्षा महत्वेविभूतयोयस्येतिचतस्यामंत्रणं

भगवन्सर्वदिग्देशकालाकारैकात्म्येन परामृशन्प्रणमति ३९

रामकंठीटीका

किंच सर्वेभ्य ऐश्वर्यगुणोत्कर्षेभ्यो महतीप्रकृष्टाविभूतिः शक्तिविजृंभाय
स्यतथाविधोभगवांस्तादृशः सर्वेश्वरोनपवाप्रतिमप्रभावोनत्वमामा
त्वमाहत्वमस्तथानादिमानादिर्विद्यतेयस्यसश्चादिमान्नादिमाननादि
मान्सर्वप्रथमःस्वयंभूः एवंविधस्त्वमेववाय्वादयोदेवताविशेषाः य
थाचवाय्वादीनामीश्वरत्वादभिन्नत्वंतथासर्वमादौव्याख्यातमेव पर
मेश्वरस्यसर्वाकारत्वंपरामृशन्नाह सर्वस्यप्राण्यमेतत् किंच नहित
दन्यःकश्चिदपीह देवलोकत्रये दृश्यतेविततकर्मा ३९

लासिकी [illegible]टीका

किंच प्रतीच्यादिदिक्समस्तदेवानांयेऽधिपेशाः परः सदोग्निनेत्रादस्यादिरूपति त्वं
ऊर्ध्वलोकनायकत्वेनप्रसिद्धावाय्वादयश्च त्वमेवप्रजापतिर्ब्रह्माचत्वमेव त
स्यापिजनकत्वात्पितामहश्चत्वमेव नमोनमइतिपौनःपुन्येनभक्ताति
शयाविष्कारार्थं ३९ ॥

पंचोलीटीका

सर्वदेवात्मकत्वात्सर्वैस्त्वमेवनमस्कार्यइतित्रिभुवनस्वयमपिन
मस्कुर्वन्नाह वायुरिति हेभगवन्वायुर्यमोऽग्निर्वरुणः शशांकः
चंद्रः प्रजापतिः चपुनः प्रपितामहस्त्वंतेनतुभ्यंनमः अस्तुपुनश्चभूयो
पितेतुभ्यंनमः पुनर्नमस्कारकरणंआत्मभक्तिश्रद्धातिशयंदर्शया
ति ३९

रणवीरसमिद्धाथिनी

स्पष्टः ३९

मधुभाष्य

३९॥

भाष्य अनुवाद

जिस हेतु तुम सर्व देवरूप हो इससे तुम सबके नमस्कार
योग्य हो ऐसे वचनोंसे अर्जुन भगवान् कीस्तुति करिके अ-
ब आप प्रणाम करते हैं कि वायु यम अग्नि वरुण चन्द्र प्रजा
पति ब्रह्मा औ प्रपितामह ब्रह्माके भी जनक जो तुम सो मे
रे सहस्र सहस्र प्रणाम तुमको हैं फेरि फेरि भी सहस्र सह
स्र प्रणाम हैं ३९

चौपई

वायु अनल यम वरुण शशी जोई प्रजापति तें प्रपितामह
होई नमस्कार तोहि सहस्र हि बारा पुन नमस्कार तोहि
करों अपारा ३९ ॥

131

नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत ए
व सर्व अनन्तवीर्यामितविक्रमस्त्वं सर्वं
समाप्नोषि ततोऽसि सर्वः ४०

शङ्करभाष्यटीका १

तथा नमः पुरस्तादिति नमः पुरस्तात् पूर्वस्यां दिशि तुभ्यमथ
पृष्ठतोऽपि च नमोऽस्तु ते सर्वत एव सर्वासु दिक्षु सर्वत्र स्थिताय
हे सर्व अनन्तवीर्यामितविक्रमः अनन्तं वीर्यमस्य अमितो विक्रमो
यस्य वीर्यं सामर्थ्यं विक्रमः पराक्रमः वीर्यवानपि कश्चित् शस्त्रा
दिविषये न पराक्रमते मन्दपराक्रमो वा त्वं तु अनन्तवीर्यामित
विक्रमश्चेत्यनन्तवीर्यामितविक्रमः सर्वं समस्तं जगत् समा
प्नोषि सम्यगेकेनात्मना व्याप्नोषि अतस्तस्मादसि भवसि सर्वस्त्वया
विनाभूतं न किञ्चिदस्तीत्यर्थः ४०

आनन्दगिरिकृतटीका १

विधान्तरेण भगवन्तं स्तुत्वा नमस्कुर्वन्नभिमुखीकरोति तथेति
यस्यां दिशि सविता उदेति सा पूर्वा दिगुच्यते तस्यामेव स्थिते स
र्वे त्वमेव तस्मै ते तुभ्यं नमोऽस्त्वित्याह नम इति अथशब्दः समु
च्चये पश्चादपि स्थिते सर्वे त्वमेव तस्मै ते तुभ्यं नमोऽस्त्वित्याह पृ
ष्ठेति किं बहुना यावत्यो दिशस्तत्र सर्वत्र यद्वर्तते तदशेषं त्व
मेव तस्मै तुभ्यं प्रह्वीभावः स्यादित्याह नमोऽस्त्विति फलितं सर्वा
त्मत्वं सूचयति हे सर्वेति वीर्यविक्रमयोर्न पौनरुक्त्यमित्याह
वीर्यमित्यादिना वीर्यवतो विक्रमाव्यभिचारादर्थपौनरुक्त्यमाश
ङ्क्याह वीर्यवानिति भगवति लोकतो विशेषमाह त्वं त्विति उक्तं
सर्वात्मत्वं प्रपञ्चयति सर्वमिति सम्यपञ्चत्वं वारयति तयेति ४०

भक्तिश्रद्धाभरातिरेकेण नमस्कारेषु तृ स्वामिकृतटीका ३ प्तिमनधिगच्छन् बहुशः प्रणमति ॥

किंच नम इति हे सर्व सर्वात्मन् सर्वतोऽपि दिक्षु तुभ्यं नमोऽस्तु सर्वात्म
कत्वमुपपादयन्नाह अनन्तं वीर्यं सामर्थ्यं यस्य तथाऽमितो विक्रमः परा
क्रमो यस्य स एवंभूतस्त्वं सर्वं विश्वं सम्यक् अन्तर्बहिश्च व्याप्नोषि सु
वर्णमिव कटककुण्डलादिकार्यं व्याप्य वर्तसे ततः सर्वस्वरूपोऽसि ४०

पिशाचभाष्यटीका ४

नमइति पुरस्तादग्रतःपृष्ठतःपश्चात्सर्वतःपुरस्तात्पार्श्वतःपश्चाद्वाहे
सर्व अनंतंवीर्यंयस्यसोनंतवीर्यस्तस्यसंबोधनं अमितः अपरिच्छि
न्नोविक्रमःपराक्रमोयस्यसोमितविक्रमः सर्वंव्याप्नोषिततस्त्वंसर्वो
भवसि ४०

रामानुजभाष्यटीका॰ ५

नमइति अत्यद्भुताकारंभगवंतंदृष्ट्वाहर्षोत्फुल्लनयनःसंतस्साध
सावनतः सर्वतोनमस्करोमिअनंतवीर्यामितविक्रमस्त्वंसर्वंसमात्म
तयासमाप्नोषि ततःसर्वोसियतस्त्वंसर्वंचिदचिद्वस्तुजातमात्मत
यासमाप्नोषि अतःसर्वस्यचिदचिद्वस्तुजातस्यत्वच्छरीरतयात्वत्प्रका
रत्वात्सर्वप्रकारस्त्वमेवसर्वशब्दवाच्योसीत्यर्थः त्वमक्षरंसदसत्त
त्परंयदित्यादिसर्वस्यसामानाधिकरण्यनिर्देशास्त्वात्मतयाव्या
प्तिरेवहेतुरितिसुव्यक्तमुक्तं त्वयाततंविश्वमनंतरूपसर्वंसमाप्नो
षिततोसिसर्वइति ४०

अभिनवगुप्तकृतटीका॰ ६

स्पष्टार्थं ४० ॥ ॥ ॥

परमार्थप्रपाटीका ७

अथापरिच्छिन्नापापितभयंनमस्कारइतिरथ्येनरसामाभिप्रायेणन
मस्करोति नमइति भोसर्वसर्वात्मकपुरस्तादग्रतःपृष्ठतःपश्चात्त
भ्यंनमः किंपुनर्हि दिक्षुसंस्थितायसर्वतःसर्वदिक्षुस्थितायनमो
स्तु अथनकेवलंदृश्यमात्रेणैनस्थितोसीत्याह भोस्वामिन्ननंतवीर्यः
सन्नमितविक्रमबलौजःसहःसमेतः श्रुतिषुविशेषणैकवीर्या
णिप्रवोचयः पार्थिवानिविममेरजांसीति भाष्यमुक्तमितिनिपातेः
१गी वधारणार्थस्तस्यविष्णोर्वीर्याणिप्रवोचंबलीनिसःपृथिव्यंतरिक्षस्व
र्गीनिरजांसिलोकान्विममेनिर्मितवान् एवंत्वंसर्वंसमाप्नोषिअंत
र्बहिर्व्याप्नोषि ततस्तेनकारणेनसर्वोसिसर्वात्मकोसितदेतत्सर्व
वैस्यतदसर्वंस्यास्यवाक्यतइतिश्रुतेः तथारथ्येनरसामापि अभित्वा
शूरनोनुमोदुग्धाइवधेनवः ईशानमस्यजगतःस्वर्दृशमीशान
मिंद्रतस्थुष इतिवाहाउवावअस्य भाष्य भोइंद्रपरमात्मन्शूर
शत्रुनिबर्हणार्थविवर्य अभिअभितःसमंततोनमःनमस्कुर्मःकथं
भूतमत्वा अस्यजगतोजंगमस्यतस्थुषः स्थावरस्यापिईशानंनि
यामनंकेइवयथाअदुग्धाःअकृतदोहनाधेनवइववत्सीरेणपूर्णाः
सत्यःवत्सानिविसृज्यतत्राउपतीर्णाःसत्यअभियांतितथावयमपिस

४ इतिसंहितापाठः साम
गानंच अभित्वाशूरनो
नुमो दुग्धाइवधेन
वः ईशानमस्यजगतः
स्वर्दृशम् आईशा
नेमायिंद्रा तास्थुषा

वे विषयजाते विस्तरणत्वात्मेव सर्वगते नमस्कुर्मः स्वदेशे जगत्यस्का
शाके ईशानमिति पदस्याहृतिरादरार्था तथा यस्मिं भाषुपि अमिता दे
वेन हतता नयामि गायत्रेण छेदसा विहृतास्तोमेन रथन्तरेण साम्नाव
षट्कारेणवज्रेण पूर्वजानन्भ्रातृव्यानधरान्पादयामिति भाष्ये अमिता
विश्वरूपेणादेवेन दीप्यमानेन क्रतावाहृतेन नाशत्रुमेनाः जयामि गाय
त्रेण वज्रविशामलरेण विहृतास्तोमेन ब्राह्मणे निस्सर्गोहिंकरोति म
प्रथमेपेमादि अथमर्थः सकृत्त्रयगतानां स्तोमानां त्रिभिः पर्यायैः
कृतेत्तत्र प्रथमे पर्याये विष्णुस्तेके पूपालित्वस्त्वः द्वितीये मध्यमाति
हृभ्यः त्रितृतीयार्थे पंचमी हिंकरोति गायति शेषं स्पष्टं ७

वनमालाटीका ८

नभ्यं पुरोगतो नमस्तात् अथ शब्दः समुच्चये पृष्ठतस्तभ्यं नमस्तात् न
मोस्तु ते नभ्यं सर्वतएव सर्वासु दिक्षु स्थिताय हे सर्व सर्वव्यापिन् वीर्य
शारीरबलं विक्रमः शिलाशस्त्रप्रयोगकौशलेसमस्तमेकं पदमनंत
वीर्येति सेवा यतेवा यतः सर्वजगदुत्पादकत्वाधारत्वनियामकत्वस
त्तामदत्वादिना समामोषि अतः सर्वं सर्वशब्दवाच्यत्वं यतेन सर्वत्वेलि
देवत्रिलेसाग्राः स्कृतयोव्याख्याताः ८

जस्मवैजयन्तीटीका ९

तनस्य भगवतः सर्वव्याप्तित्वं न सर्ववाच्यत्वमदत्मक विषयेन नम
स्कारेषु लेभावमविन्दत्वन्नक्रतवः प्रणमति नमः पुरस्तादिति हे सर्व
सर्वात्मतया सर्वशब्दवाच्यते नभ्यं पुरस्तात्समाग्रभागेस्थिताय नमो
स्तु नभ्यं पृष्ठतो नमः स्तादिति वा अथ शब्दः समुच्चये पृष्ठतो मम पृष्ठ
देशे स्थिताय ते नभ्यं नमोस्तु नमस्तात् सर्वत एव सर्वासु दिक्षु स्थि
ताय नभ्यं नमस्तात् अनन्तवीर्यामितविक्रमः वीर्यं देहबलं विक्रमो
धीबलं शस्त्रास्त्रप्रयोगादिप्रावीण्यरूपं अनन्तं वीर्यं यस्य अमितो वि
क्रमो यस्य स चासौ स च अनन्तवीर्येति सम्बोधनं वा पक्षे वीर्याधि
कमन्ये उ नैकेशित याधिकमिति भीमद्यत्यायनाद्वहिरणोकोलयोर
मेषु वैकैकेव्यवस्थिते स्तत्र अनन्तवीर्य्यामितविक्रम स्वभवसि सर्व
रूपत्वे हेतुमाह सर्वमिति सर्वं विदचिल्मिश्रजगत्समाप्नोषि सम्यक
व्याप्नोषि ततस्तस्माद्धेतोस्त्वं सर्वोसि यो यत्रवागतो देवस्सर्वोप्येव
तागतः सर्वमेव जगत्स्थायन स्त्वं गतो भवानिति पराशरोक्तेः ९

श्री॰ गी॰ टी॰ ८

नमः पुरस्तादग्रभागे [illegible] नमोऽस्तु ते पृष्ठतः पृष्ठभागे नमः पुरस्तादि [illegible] तिवा अथशाद्वः सम
च्चये पृष्ठतोपि तुभ्यं नमः [illegible] ऽस्तात् नमोऽस्तु ते तुभ्यं सर्वत एव सर्वासु दिक्षु स्थि
ताय हे सर्व वीर्यं शरीर बले विक्रमः शिक्षा शास्त्र प्रयोग कौशलम् एकं वीर्या
धिकम् अपरं च एकं विक्रमाधिकम् इतरत् भीमदुर्योधनयोरिव सुव्यवस्थिते
केव्यवस्थिते त्वं तु अनन्तवीर्यश्चामितविक्रमश्च [illegible]
मेकं [illegible] समस्तपदे अनन्तवीर्येति संबोधनं वा सर्वं समस्तं जगत् समा
[illegible] प्नोषि सम्यक् एकेन सद्रूपेणाभिव्याप्य सर्वात्मना व्याप्नोषि ततस्तस्मात्
सर्वोऽसि त्वदतिरिक्तं किमपि नास्तीत्यर्थः [illegible]
[illegible]
[illegible] ४०

सदानंदीटीका ११

अग्रभागेन मस्तुभ्यं पृष्ठतोऽपि नमोऽस्तु ते दिक्षु स्थिताय सर्वासु सर्वरूप
नमोऽस्तु ते १ अपरिच्छिन्नवीर्यस्त्वं तथामितपराक्रमः जगत्सर्वं त्वमेके
न रूपेणाखिलात्मना सम्यग्व्याप्नोष्यतः सर्वस्त्वं त्वत्तो न पृथगस्ति नाकं ४०

नीलकंठीटीका १२

हे अनंतवीर्य यतः सर्वं समाप्नोषि एकीभावेन समंताद्व्याप्नोषि ततो
हेतोः सर्व इति तव नाम पुरस्तादग्रे पृष्ठतः पश्चात्तस्मै तुभ्यं समाप्नो
सर्वतो मध्येऽपि ते नमोऽस्तु ४०

अनंतीटीका

अत्र नमस्कारं गाणापौनः पुन्येनावृत्तिः प्रत्यभिज्ञातपरमेश्वररूपस्यार्जुनस्य
भक्तिश्रद्धातिशयं द्योतयति नहि त्वदन्यः कश्चिदस्तीह देवलोकत्रयेऽपि
प्रणतिवित्यकर्मा वीर्यं मानसिकमुत्साहशक्तिः पराक्रमः शारीरिकः
क्रियाशक्तिः [illegible]
[illegible] ४०

रामकंठीटीका

व्या॰ ४

अत्रापि न किंचिद्व्याख्यातमस्ति सर्वं स्वशक्त्या समा [illegible] प्नोषि यतस्तत स्त्व
मात्मकत्वमेव वीर्यमुत्साहशक्तिः पराक्रमः क्रियाशक्तिः [illegible] ३०
[illegible]
[illegible] ४०

लासिकी [illegible]टीका

किंच हे [illegible]सर्वसर्वद्रूप सर्वतएवसर्वोस्तुदिल हेअनंतवीर्यापरिछिन्नसामर्थ्य त्व यतः अपरिमितैर्विशिष्टः क्रमोव्याप्तिर्यस्यसएवंविधः संस्त्वंसर्वसमग्रं तर्व्वहिस्यव्याप्नोषि सवर्गामिवकरकादिततोहेतोः सर्वस्वरूपोसि [illegible]

[illegible] ५० ॥

पंचोलीटीका

किंचनमइति हेभगवन्तेतुभ्यंपुरस्तात्सर्वस्यादिशिनमः अथ पृष्ठतः तेतुभ्यंनमोस्तुहेसर्वसर्वतएवसर्वास्तुदिक्षुतेतुभ्यंनमः हे अंतवीर्यअनंतवीर्यंसामर्थ्यंयस्यसोनंतवीर्यस्त्वं अमितविक्रम पराक्रमोयस्यसत्वंसर्वसमस्तंजगत्समाप्नोषिसम्यक्एकेना त्मनाव्याप्नोषिततस्मात्त्वंसर्वोसित्वद्विनाभूतंनकिंचिदस्तीत्यर्थः ४०

रणवीरसमिद्बोधिनी

स्पष्टः ४० ॥

मधुभाष्य

४० ॥

भाषा अनुवाद

भक्ति औ श्रद्धा तथा आदर की अधिकाईसे भगवत को नमस्कार करने से तृप्ति न पाके पुनर्वार और भी प्रणाम करते हैं कि हे सर्वात्मन् तुमारे सन्मुख औ पृष्ठभागमें प्रणाम करता हूं और तुमारे सब ओर भी मेरी नमस्कार पहुंचे और भगवान की सर्वात्मकता सिद्ध करने की आकांक्षापर कहते हैं कि जिस की अनन्त सामर्थ्य औ अपरिमित पराक्रम एवंभूत जो तुम विश्वके भीतर बाहर समस्त व्याप्त हो जैसे सुवर्ण नानारूप से भूषणों मे व्याप्त है औ मृत्तिका घट आदि पात्रों मे जैसे व्याप्त है तैसे विश्वमे आप व्याप रहे हो ४०

चौपई

आगे पीछे तोहि वंदन करहूं । नमस्कार तोहि जहां तहां सर्बहूं
अनंत वीर्य अतिविक्रम तोहि । सब आपहि हौ ताते सर्वहि होई
४०

135

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव
हे सखेति अजानता महिमानं तवेदं मया
प्रमादात् प्रणयेन वापि ४१

शाङ्करभाष्यटीका १

यतोहं त्वन्माहात्म्यापरिज्ञानादपराधाद्धेतोः सखेति मत्वा स
मानवया इति मत्वा ज्ञात्वा विपरीतबुद्ध्या प्रसभमभिभूय प्रस
ह्य यदुक्तं हे कृष्ण हे यादव हे सखेति च अजानता अज्ञानिना
मूढेन किमजानतेत्याह महिमानं माहात्म्यं तवेदमीश्वरस्य वि
श्वरूपं तवेदं महिमानमजानतेति वैयधिकरण्येन सम्बन्धस्त
वेममिति पाठो यद्यस्ति तदा सामानाधिकरण्यमेव मया प्रमादा
त् विक्षिप्तचित्ततया प्रणयेन वापि प्रणयो नाम स्नेहनिमि
त्तो विस्रम्भस्तेनापि कारणेन यदुक्तवानस्मि ४१

आनन्दगिरिकृतटीका २

अज्ञाननिमित्तमपराधं क्षमयति यत इति इदंशब्दार्थमाह वि
श्वरूपमिति नहीदमित्यस्य महिमानमित्यस्य च सामानाधिकर
ण्ये लिङ्गव्यत्ययादित्याह तवेति पाठान्तरसम्भावनायां सामाना
धिकरण्योपपत्तिमाह तवेमादिना यदुक्तवानस्मि तदहं क्षामये
त्वामिति सम्बन्धः ४१

स्वामिकृतटीका ३

इदानीं भगवन्तं क्षमापयति सखेति द्वाभ्यां त्वमाकृतः सखेत्येवं
मत्वा प्रसभं हठेन तिरस्कारेण यदुक्तं तत्क्षामये त्वामित्युत्तरेणान्व
यः किं तत् हे कृष्ण हे यादव हे सखेति च सखित्वाद्धेः प्रसभोक्तौ हेतुः त
व महिमानमिदं च विश्वरूपमजानता मया प्रमादात् प्रणयेन हेतु
नापि वा यदुक्तमिति ४१

पैशाचभाष्यटीका ४

सखेति प्रसभं तथा हे सखेत्यत्र परलोपो द्रष्टव्यः तवेदं तव इदमित्य
र्थः ४१

रामानुजभाष्यटीका ५

सखेति यदिति अनन्तवीर्यामितविक्रमरूपसर्वान्तरात्मत्वसृष्ट्
यादिको यो महिमा तवेदं महत्त्वमजानता मया प्रमादान्मोहात्प्र

श्री॰ १ णयेन सखेति समवयस्क इति मत्वा हे कृष्ण हे यादव हे सखेति मया प्रसभं
सी टी प्रणयं विनयापेतं ॥ ४१ ॥

अभिनवगुप्तकृतटीका ९

स्पष्टार्थं ॥ ४१ ॥

परमार्थप्रपाटीका ७

५स इदानीं स्वापराधं क्षमापयन्नाह सखेति द्वाभ्यां तेऽप्राकृतः सखा इति म
त्वा मया प्रसभं तिरस्कारेण यदुक्तं तथा कथं हे कृष्ण हे यादव हे सख
इत्येकवचनेन सखेति लोपमिज्ञानेन सन्धिः कथं दसः किम् तेन मया
इदमनभूपमानेन तव महिमानमजानता अत्यन्ततिरस्कारप्रकारोनल्पमा
दम माहात्म्यप्रियेण अनवधानेन वा प्रणयेन प्रीत्या वा ॥ ४१ ॥

वनमालीटीका ८

यतो हे तस्मात्त्वयापरिज्ञानादपराधान् जातमकार्षमतः परमका
रुणिकं त्वां प्रार्थयामि क्षमापयितुमाकारयामीत्याह सखेति द्वाभ्यां त्वम
मम सखा समानवया इति मत्वा प्रसभं स्वोत्कर्षख्यापनरूपेणाभिभवे
न मया यदुक्तं तवेदं विश्वरूपं तथा महिमानमैश्वर्यातिशयमजान
ता प्रमादाच्चित्तविक्षेपात् प्रणयेन स्नेहेन वापि किमुक्तमित्याह
हे कृष्ण हे यादव हे सखेति ॥ ४१ ॥

अमवैजयन्तीटीका ९

एवं स्वसारथ्ये भगवतो निरंकुशैश्वर्यातिशयमवलोक्य स्तवनम
स्कारं कृतवानिदानीं तु स्वापराधं क्षमापयन्नर्जुनो भगवन्तमाह
द्वाभ्याम् सखेतीति यथेह लोके प्राकृतजनानां प्राकृत सखा भवति
तथा त्वमपि मम सखा भवसीति त्वनन्तवीर्यामितविक्रमम् इति मत्वा
विज्ञाय प्रसभं हठात् तवोत्कर्षख्यापनरूपेणाभिभवेन यद्युक्तः प्रमादा
त् मोहाच्चित्तविक्षेपादित्यर्थः प्रणयेन स्नेहेन वा अपि शब्दात् कस्मैचि
त्प्रयोजनाय हे कृष्ण हे यादव हे सखे इति सन्धिरार्षः मया यदुक्तं तिर
स्कारपूर्वकं यद्भाषितं तत्त्वामक्षामयामीत्युत्तरेणान्वयः कीदृशेन मया तवे
दं सहस्रशीर्षादिलक्षणमतिभयानकमद्भुतं रूपं तथैवं महिमानमै
श्वर्यातिशयमजानता पुंल्लिङ्गपाठे तु इमं विश्वरूपात्मकं महिमानम
जानता हे कृष्णेत्यत्र श्रीपूर्वकत्वाभावात् हे यादवेत्यत्र राजत्वज्ञापना
भावावेदनात् हे सखेत्यत्र समवयस्कत्वमात्रसूचनात्संबोधनत्र
येण भगवतोऽनादरणीयत्वस्वरूपं स्वापराधं ख्यापयतीत्यभिप्रायः ॥ ४१ ॥

+ यतोऽहं त्वन्माहात्म्यापरिज्ञानादपराधमजस्रमकार्षं ततः परमकारुणिकं त्वां प्रणम्यापराधक्षमां कारयामीत्याह द्वाभ्यां ॥

मधुसूदनीटीका ९

+ त्वं मम सखा समानवया इति मत्वा प्रसभं स्वोत्कर्षख्यापनरूपेणाभिमानेन यदुक्तं मया तवेदं विश्वरूपं तथा महिमानमैश्वर्यातिशयमजानता पुंलिंगपाठे [illegible] इमं विश्वरूपात्मकं महिमानमजानता प्रमादाच्चित्तविक्षेपात् प्रणयेन स्नेहेन वापि किमुक्तमित्याह हे कृष्ण हे यादव हे सखेति ५१

सदानंदी टीका ११

तव महिमापरिज्ञानाद्यतोऽहमित्यशो हरे अपराधमकार्षं यतस्ततस्त्वां करुणाकरं क्षामयामि प्रणम्याहमपराधत्वमामिति मया तत्त्वं याहीति मत्वा स्वोत्कर्षतो प्रमात् हे कृष्ण यादव सखेवेति सूचितं साम्प्रतः अभिभूय यदुक्तं तव महिमानमजानता प्रमादाच्चित्तविक्षेपाद्वा प्रणयेन स्नेहेन वा मया ५१

नीलकंठीटीका १२

एवं स्वकृतस्यापराधान् क्षमापयते सखेतीति अयं मम सखा इति मत्वा प्रसभं स्वोत्कर्षाविष्करणपूर्वकं यन्मया उक्तं हे कृष्ण हे यादव हे सखेति इति शब्दः संपिण्डार्थः कृत्स्नोक्त तवेदं एवंविधं महिमानं माहात्म्यं अजानता कदाचित् प्रमादाच्चित्तविक्षेपात् कदाचित् प्रणयेन स्नेहेन च ५१

आनंदीटीका

आकृष्य सखित्वादिप्रतिपन्नाविहितमतिक्रमं मन्यमानस्तत्क्षमापणार्थं श्लोकचतुष्टयेनाह

अथ भगवतः पारमैश्वर्यमप्रत्यभिज्ञानात्

तवेदं माहात्म्यमिदानीं साक्षात्कृतमजानता मया प्रमादादज्ञानात् प्रणयात् स्नेहपूर्वकेण वशीकारेण वापि अयं सखा ममेति मत्वा प्रसभं स्वोत्कर्षरूपेण बलात्कारेण हे कृष्णेत्यादि यदुक्तं तत्त्वामहं क्षामये इत्यग्रिमेणान्वयः ५१

रामकंठीटीका

यत्प्राभगवति विहितमतिक्रमं मन्यमानस्तत्क्षमापणार्थं

अथ विज्ञातभगवत्परस्वभावत्वात्सर्वं प्रत्यक्षं ति श्लोकचतुष्टयमाह ॥

सखायमेतत् किं तु सखा त्वं ममेति मत्वा यद्यादवादिशब्दैर्नामभिर्वितोऽसि यो
ऽत्यन्तमतिक्रमः कृतस्तत्त्वमजानतो भगवन्मात्स्वं तदानीमजानता तोम ह्ना१
तं क्षामिति संबंधः [illegible] ५१

लासिकी [illegible]टीका

+ सखायं ममेति मत्वा प्रसभं हठेनानादरेण प्रमादाच्चित्तविक्षेपाद्वा स्नेहेन वा तवेश्वरस्य महिमानं वैश्वात्म्यलक्षणमिदमनुभूयमानं अजानता मयायत् हे कृष्णेत्याद्युक्तं तत्त्वां क्षामये इत्युत्तरेणान्वयः सखेति संधिरिदमिति च लिंगव्यत्ययपक्षे ईश्वरः इममिति पुंलिंगं क्वचित्पठति [illegible] ५१ ॥

+ एवं भगवति समत्वबुद्ध्या विहितमतिक्रमं मधुनात्तन्माहात्म्यसंवेदनादपराद्धं मन्यमानः तत्त्वां त्पर्थं श्लोकचतुष्टयमाह ॥

पैचोलीटीका

इदानींभगवन्महात्म्याऽपरिज्ञानात्कृतमपराधंक्षमापयन्नाह स
खेति हेकृष्णमयातेतववृद्धंविश्वरूपंमहिमानंमाहात्म्यमजानता
प्रमादात् असावथा नवितततयाप्रणयेनस्नेहहेतुनाविश्वासाद्वासखे
समानवयेति मत्वायत् हेकृष्णहेयादवहेसखेति प्रसभंहठादु
क्तं ४१।

रणवीरसमिद्धोथिनी

इदानींभगवंतंस्वात्मानंप्रतिक्षमापयति सखेति मयातवेदंवि
श्वरूपलक्षणंमाहात्म्यंपरमार्थतोजानता प्रमादाच्चित्तव्यासे
पादथवाप्रणयेन सखायंममेति प्रोक्तनवन्मत्वाप्रसभंसाहसि
कतया कृष्णयादवादिसंबोधनपदैराह्वानं भवंतं प्रत्युक्तमपि
यउक्तमथवविहारादिकर्मसुपरीहासार्थंकेलिप्रसाकृतवद्ध
त्वमसत्कृतोसिपरिभूतोसि असत्करणमपिभवंतंप्रत्युक्तं य
त्कृतं अच्युतेति कीदृशेषपत्वमेकः योसिएकाकीसपरिभूतोऽप्य
न्येनव्यलीकं नजानातीऽतिवदेकाकाप्यथवातत्समक्षंतासां
सखीनां समक्षंपरिभूतोसि योऽसन्यसमक्षंपरिभूतः सव्यली
की परिभवतीतिवतत्समक्षमपि तदसत्करणं क्षामयप्रमेयं।
प्रमातमथाक्षमर्दक्षामये क्षमांकर्तुं मदपराधं प्रति प्रसाद
यिष्येऽइतिभावः ४२॥

मधुभाष्य

४२॥

भाषा अनुवाद

अब दो श्लोकके द्वारा भगवान से अर्जुन अपनी अपराध क्षमा
करावते हैं कि हे कृष्ण हे यादव हे सखे ऐसे वचनों से आपको
आपना सखा मानि जो हठ से मैंने तुमारी यह महिमा न जानि
के अथवा भूल से या प्रणय करि अति प्रीतिसे कहा सो मेरी अ
की असावधानी ज्ञान की अपराध चूक आप क्षमाकरो ४१

चौपई

सखा जान हठसें जो कहियो हे कृष्ण यादव सखा निरवहयो
जानेबिन तव महिमा पहूं मैं मदसें वा प्रेमहि सें हूं ४१

यच्चावहासार्थमसत्कृतोसि विहारशय्यास-
नभोजनेषु एकोथवाप्यच्युत तत्समक्षं त
त्क्षामये त्वामहमप्रमेयं ४२

शाङ्करभाष्यटीका १

यच्चेति यच्च अवहासार्थं परिहासप्रयोजनाय असत्कृतः परिभू-
तोसि भवसि क्व च विहारशय्यासनभोजनेषु विहरणं विहारः पा
दव्यायामः शयने शय्या आसने आस्थायिका भोजनमदनमिति ते
षु विहारशय्यासनभोजनेषु एकः परोक्षः सन् असत् कृतोसि प
रिभूतोसि अथवा हेऽच्युत तत्समक्षं तच्छहः क्रियाविशेषणार्थः
अस्यत्वे वासत् कृतोसि तत्सर्वमपराधजातं क्षामये क्षमां कारये
त्वामहमप्रमेयं प्रमाणातीतं यतस्त्वं ४२

आनन्दगिरिकृतटीका २

यदयुक्तमुक्तं तत्तत्क्षन्तव्यमित्येव न किन्तु यत्परीहासार्थं क्रीडा
दिषु त्वयि तिरस्करणं कृतं तदपि सोढव्यमित्याह यच्चेति विह
रणं क्रीडा व्यायामो वा शयनं तल्पादिकं आसनं आस्थायिका सिंहा
सनादिकमुपलक्षणमेतेषु विषयभूतेष्विति यावत् एकशब्दो रहःस्थि
तिमेकाकिनं कथयतीत्याह परोक्षः सन्निति प्रमत्ते परोक्षे वा त
दसत्करणं परिभवनं यथा स्यात्तथा यन्मया त्वमसत्कृतोसि त
त सर्वमिति योजना समक्षमाह तच्छह इति क्षमाकारयितत्वेन
मापरिमितत्वे हेतुमाह अप्रमेयमिति वाचनिके मदीयमपराधजा
ते त्वया तत्क्षन्तव्यमित्यर्थः इदानीं मदीयोऽपराधो न त्वया गृहीतव्यो
गृहीतोपि सोढव्य इत्याह यत इति ४२

स्वामिकृतटीका ३

किंच यच्चावहासार्थमिति हेऽच्युत यच्च परिहासार्थं क्रीडादिषु
तिरस्कृतोसि एकः एकान्तः सखीन् विना रहसि स्थित इत्यर्थः अथवा
तत्समक्षं तेषां परिहसतां सखीनां समक्षं पुरोपि तत्सर्वमपराधजा
तमहं त्वामप्रमेयमचिन्त्यप्रभावं क्षामये क्षमां कारयामि ४२

पिशाचभाष्यटीका ४

श्री॰ गी॰ टी॰ ५

यच्चेति विहारः क्रीडा एकः अप्रत्यक्षः यः वक्रजनप्रत्यक्षं तत् क्षामये प्रसा
दये ४२ ॥ ॥ ॥

रामानुजभाष्यटीका ५

प्रणयं यच्चपरिहासार्थं सर्वदैव मत्कारार्हस्त्वमसत्कृतोऽसि विहारशय्या
सनभोजनेषु सहकृतेषु एको वा सतत् समक्षं वा यदसत्कृतोऽसि त
त्सर्वं त्वामप्रमेयमहं क्षामये ४२

॥ अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थं ४२

परमार्थप्रपाटीका ७

यच्चेति यच्च अवहासार्थं परिहासनिमित्तं मानलघुत्वोहि विनोदा
य इदमिति बुद्ध्येमस्यः विहारे क्रीडायां पर्यङ्कशय्याशने आसने सभास
न्निवेशे भोजने च एकोऽप्रसत्कृतोऽस्यवज्ञातोऽसि किंभूतस्त्वं केवल अथ
वा एकः रहसि स्थितः तत्सर्वमपराधजातं त्वामप्रमेयमचिंत्य
प्रमेयप्रभावं क्षमापये क्षमाकारयामि अयमर्थः सामवेदे हृदद्
यंतरादित्यावमानस्तुतिभिः प्रसन्नाद्भगवतो यथालभस्त्वमादि
नश्वरफलं न हृणे किंत्वपराधमेव क्षमापये तेन पुनरस्मत्पूर्वजरूप
दर्शनान्मुक्तिप्राप्तयो यतः कृतापराधस्यैव पुंसो नश्वरफलप्राप्ति
रिमाशयोऽन्येतस्य श्रुतिरपि वाजसनेयारण्यके अथातः पवमा
नानामेवाभ्यारोहः स वै खलु प्रस्तोता साम प्रस्तौति स यत्र प्रस्तुया
३ त्तदेतानि जपेदसतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्माऽमृ
तं गमयेति भाष्ये अथानन्तरं स्वरस्य लावकवाक्योपक्रमात् पवमाना
नां पावकमानम् स्तुतीनामभ्यारोह उत्कर्षः वेदस्मात् प्रस्तोता परमे
श्वरस्य प्रकर्षेण स्तोता सन् साम रूपं परमेश्वरं स्तौति स यत्र यदा प्रस्तु
यात् स्तुतिं कुर्यात् तदा एतानि त्रीणि यजूंषि यजेत् तान्याह असत
तो मा सद्गमय १ तमसो मा ज्योतिर्गमय मृत्योर्मामृतं गमय ३ भा
ष्ये असतः असद्रूपात्संपन्नान्मां सद्गमय ब्रह्मसेवाय तथा तमसोऽज्ञा ३
नान्मां ज्योतिः स्वप्रकाशरूपं गमय तथा मृत्योः संसारान्माममृतं
गमयेति नेतिरीयकेपि यथा मध्ये समुद्रस्य कूलमवमन्वजैषुलो
३ दकमनु संसर्गे हृदयं तराभ्यामित्याप्रतिष्ठां गच्छति यथा समुद्रस्य
मध्ये पतिताः प्रत्यवेनौकामन्वजैषुः श्रुयंतितादृक दत्रुसर्गतय
न्निर्विशेषहृदद्यंतराभ्यामज्ञानाब्धिमित्वासवलं ज्ञानाप्रतिष्ठां अ॰

लमिस्थितिं गच्छेति अथ तुम्बरफलमिहादित्सति भिर्लभ्यते श्रु
तिरपि अथयानीतराणि स्तोत्राणि तेष्वात्मने स्त्राय मागायेत्तस्मा
द्वेतेषु वरं वृणीत संकामं कामयते तमागायदिति भाष्यं अथेत्यनं
तरं यानि इतराणि यावमायं स्तुमति रिक्तानि स्तोत्राणि सन्ति वा
क्यानि तेषु आत्मने स्वात्मार्थं मन्त्रार्थं फलं आगायेत्सार्थ्यं चेत् तस्मा
त्समस्तात् देवता विशेषात् यं कामं कामयते यद्वरं वृणीत तदागा
यन्प्राप्नुयात् ४२

वनमालीटीका। ८

यच्चावहासार्थं परिहासार्थं विहारशय्यासनभोजनेषु विषयभू
तेषु मया असत्कृतोसि एकः सखीन् विहाय रहसि स्थितो वा हे अ
थवा तत्समक्षं तेषां सखीनां परिहसतां समक्षं वा हे अच्युत सदैका
कारविकारशून्य तत्सर्वं वचनरूपमसत्करणरूपं वा मम अपराधजा
तं त्वामहं क्षामये त्वामप्रमेयमचिन्त्यप्रभावं अचिन्त्यप्रभावेन
निर्विकारेण च परकारुणिकेन भवता त्वन्माहात्म्यानभिज्ञस्य म
मापराधाः तेतव्याः इत्यर्थः ४२

क्षमवेत्नयत्नीतिटीका। ४

किं च यच्चावहासार्थमिति हे अच्युत अप्रच्युतकारुण्य वात्सल्यतमा
दिस्वभाव सनेन मम अपराधसहनेन तव नाति मया सह इति सूचितम्
यच्च विहारशय्यासनभोजनेषु विहारः क्रीडा व्यायामो वा शय्या तू
लिकादि तल्परूप विशेषाः आसनं सिंहासनादि भोजनं बहूनां पंक्ता
वशनमेतेषु विषयभूतेषु वकारादन्येषु गजवाजिरथ्यादिगमनेषु
अवहासार्थं परिहासाय एकः सखीं विना विजने स्थितः अथवा त
त्समक्षं तेषां परिहसतां सखीनामग्रे स्थितस्त्वं मया असत्कृतोसि
यवनं च राजसमन्य विजयीनि तेहियः एव समक्षं वा कसख्लेनि क्ष
पटत्वमिसि वं यजकशाहे रसकृद्वस्तातोसि तन्नाम पतत्सर्वं व
चनरूपमसत्काररूपं वोऽपराधजातं त्वां कारुण्यसिंधुत्वमस्व
भगवद्भिः सन्तु नयामि कीदृशं अप्रमेयमतर्क्यप्रभावमिमनेन त्
वन्माहात्म्यानभिज्ञस्य मम अपराधाः परमकारुणिकेन भवता ते
तव्याः इति सूचितं ४२

मधुसूदनीटीका। ९

यच्चावहासार्थं परिहासार्थं विहारशय्यासनभोजनेषु विहारः

श्री· गी·टी· ८ क्रीडायामायामे वा शय्या तल्पिकाया स्तरणविशेषः आसनं सिंहास
नादि भोजनं च बहूनां पंक्तौ वा भोजने तेषु विषयभूतेषु सत्सु कृतोसि म
या परिभूतोसि एकः सखीन् विहाय रहसि स्थितो वा तव अथवा तत्स
तेषां मक्षं सखीनां पश्यतां समक्षं वा हे अच्युत सदा निर्विकार तत्सर्वं
१९ वचनरूपं अपमानकारं रूपं वा अपराधजातं त्वामहं क्षामये क्षामयामि त्वामप्र
मेयमचिन्त्यप्रभावं अचिन्त्यप्रभावेण निर्विकारेण च परमकारुणि
केन भगवता त्वन्माहात्म्यानभिज्ञस्य मम सापराधाः क्षन्तव्या इत्यर्थः
[illegible] ४२

मसानंदटीका ११

यच्चैव परिहासार्थं क्रीडाशय्यासनादिषु मया त्वं परिभूतोसि रहसि
स्थितस्य एव वा १ यद्वा तेषां सखीनां च समक्षं हासं संसदि हे निर्विका
र तत्सर्वमपराधसहस्रकं क्षमा ते कारये अचिन्त्यप्रभावात्वत्तः प्रार्थ
ये अतो अचिन्त्यप्रभावेन निर्विकारेण च त्वया १ अतिकारुणिकेन
च त्वन्माहात्म्याप्रवेदिनः मम अपराधाः क्षन्तव्याः श्रीमद्भगवता धुना
४२

नीलकंठीटीका १२

तथा यच्चावहासार्थं विहारादिषु असत्कृतोसि परिभूतोसि एको
वा सखीनां वियोगकाले वा तत्समक्षं सविजनसमक्षं वा असत्कृ
तोसि तत्क्षामये त्वामहमप्रमेयं यतस्त्वमप्रमेयो अचिन्त्यस्वभावः करुणा
परः यतः शत्रुभ्योपि शिशुपालादिभ्यस्त्वमोगतिं दत्तवानसीत्य
र्थः ४२

आनंदगिरीटीका

अवहासो नर्मलीलास्तु परिहासः एकः एकाकी समक्षं समक्षं सखीनां तेषां वा
सन्निधौ वा असत्कृतोसि अनादृतोसि तत्क्षमयामीत्यर्थः [illegible]
[illegible] ४२

रामकंठीटीका

नित्यमहममिति सभायां वा सतां सन्निधौ [illegible] ४२
[illegible] ४२ ॥

लासिकी वेंकटनाथीटीका

किंच हे अच्युत विकारहेतौ सत्यपि स्वस्वभावादप्रच्युत यच्चावहासार्थं।

विहारादिषु नाटनोसि एकः सखीन्विनारहसि स्थितः अथवा तत्समक्षं
सखीनां प्रत्यक्षं तत्सर्वमपराधजातं क्षमापयामि त्वाम् नत्वीश्वरस्याप्रा-
सयावरसामनवितमित्यतोहेतुगर्भविशेषणमाह अप्रमेयं त्वामिति के-
नरूपेणाप्रत्यक्षायोगोचरम्[illegible] ४२॥

पंचोलीटीका

यच्चेति हे अच्युत च तु नः अवहासार्थं परिहासप्रयोजनाय एकः
परोक्षं अथवा तत्समक्षं विहारशय्यासनभोजनेषु विहारश्चरण
चक्रमणं च शय्याशयनं आसनमुपवेशनं स्थानं सिंहासनादि भो
जनाशनं तेषु असत्कृतः परिभूतोसि तत्सर्वं अपराधजातं अहमप्र
मेयं अचिन्त्यप्रभावं त्वां क्षामये तन्मां कारयेत्स्वकाम्भूमौ दंडवत्प्रणा
न ४२

रणवीरसमिद्बोधिनी॥

स्पष्टार्थः ४२॥

मधुभाष्य

४२॥

भाषा अनुवाद

और हे अच्युत विहार शयन भोजन क्रीड़ा आदि मे अथवा सखा गण रहित निर्जन स्थान मे जहां हम और तुम को छोड़ और कोई नथा ऐसी जगह मे अथवा परिहास करने वाले मित्रो के बीचमे जो हमने हसने के लिये तिरस्कार आपका किया है सो सब अचिन्त्य प्रभावरूप आपसे हम क्षमा करवावते हैं ४२

चौपई

जो हास हि मैं कस्यो अनादर तोहि बैठत चलत शयन भोजन म
हि जो हि क्रम एकांत वा संग जो देखा मैं तोहि अप्रमेय सो त
महुं मलेखा ४२ ॥

पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गु
रुर्गरीयान् न त्वत्समोस्त्यभ्यधिकः कुतोन्यो
लोकत्रयेप्यप्रतिमप्रभाव ४३

शाङ्करभाष्यटीका १

पितासीति पितासि जनयितासि लोकस्य प्राणिजातस्य चराचरस्य
स्थावरजङ्गमस्य न केवलं त्वमस्य जगतः पिता पूज्यश्च पूजार्हो
यतो गुरुर्गरीयान् गुरुतरः कस्माद्गुरुतरत्वमित्याह न च त्वत्स
मस्त्वत्तुल्योस्ति न हीश्वरद्वयं सम्भवत्यनेकेश्वरत्वव्यवहारानु
पपत्तेः त्वत्सम एव तावदन्यो न सम्भवति कुत एवान्योऽभ्यधि
कः स्यात् कस्माल्लोकत्रयेपि सर्वस्मिन्नप्रतिमप्रभाव प्रतिमीयते
यया सा प्रतिमा न विद्यते प्रतिमा यस्य तव प्रभावस्य स त्वम
प्रतिमप्रभावः हेप्रतिमप्रभाव निरतिशयप्रभाव इत्यर्थः ४३

आनन्दगिरिकृतटीका २

गुणाधिक्यात् पूजार्हत्वे धर्मात्मज्ञानसंप्रदायप्रवर्तकत्वेन शि
क्षयितृत्वात् गुरुत्वं गुरूणामपि ब्रह्मादीनां गुरुत्वाद्गरीयस्त्वं तदे
व प्रश्नद्वारा साधयति कस्मादिति ईश्वरान्तरं तत्सं भविष्यती
त्याशंक्याह न हीति ईश्वरभेदे प्रत्येकं स्वातन्त्र्यादेककार्ये हेतु
भावाभावात्मतित्वे चैकस्य सिसृक्षायामन्यस्य संजिहीर्षासम्भवाद्य
वहारलोपादपुरुषमीश्वरनानात्वमित्यर्थः अभ्यधिकाभावे कैमु
तिकन्यायेन दर्शयति त्वत्समइति तत्र हेतुमवतार्य व्याकरोति
अप्रतिमेत्यादिना ४३

स्वामिकृतटीका ३

अचिंत्यप्रभावमेवाह पितेति न विद्यतेप्रतिमोपमायस्य सः अप्र
तिमस्तथाविधः प्रभावो यस्य तव हे अप्रतिमप्रभाव त्वमस्य चराचर
स्य पिता जनकोसि अत एव पूज्यश्च गुरुश्च गुरोरपि गरीयान् गुरुतरः
अतो लोकत्रयेपि त्वत्सम एव तावदन्यो नास्ति परमेश्वरा[illegible]न्यस्याभा
वात् त्वत्तोभ्यधिकः पुनः [illegible] कुतः स्यात् ४३

पिशाचभाष्यटीका ४

स्पष्टार्थं ४३ ॥ ॥ ॥

पितासिलोकस्यचराचरस्यत्वमस्यपूज्यश्चगु
रुर्गरीयान् नत्वत्समोस्त्यभ्यधिकःकुतोन्यो
लोकत्रयेप्यप्रतिमप्रभाव ४३

शाङ्करभाष्यटीका १

पितासीति पितासि जनयितासि लोकस्य प्राणिजातस्य चराचरस्य
स्थावरजङ्गमस्य न केवलं त्वमस्य जगतः पिता पूज्यश्च पूजार्हो
यतोगुरुर्गरीयान् गुरुतरः कस्माद्गुरुतरत्वमित्याह न च त्वत्स
मस्त्वत्तुल्योस्ति न हीश्वरद्वयं सम्भवत्यनेकेश्वरत्वव्यवहारानु
पपत्तेः त्वत्सम एव तावदन्यो न सम्भवति कुत एवान्योऽभ्यधि
कः स्यात् कस्माल्लोकत्रयेपि सर्वस्मिन्नप्रतिमप्रभाव प्रतिमीयते
यया सा प्रतिमा न विद्यते प्रतिमा यस्य तव प्रभावस्य स त्वम
प्रतिमप्रभावः हेऽप्रतिमप्रभाव निरतिशयप्रभाव इत्यर्थः ४३

आनन्दगिरिकृतटीका २

गुणाधिक्यात् पूजार्हत्वं धर्माधर्मसम्प्रदायप्रवर्तकत्वेन शि
क्षयितृत्वात् गुरुत्वं गुरूणामपि ब्रह्मादीनां गुरुत्वाद्गरीयस्त्वं तदे
व प्रपञ्चद्वारा साधयति कस्मादिति ईश्वरान्तरं तुल्यं भविष्यती
त्याशंक्याह नहीति ईश्वरभेदे प्रत्येकं स्वातन्त्र्यादेकमत्ये हेत
भावान्नानामतित्वे चैकस्य सिसृक्षायामन्यस्य संजिहीर्षासम्भवाद्व्य
वहारलोपाद्युक्तमीश्वरनानात्वमित्यर्थः अभ्यधिकासत्वं कैमु
तिकन्यायेन दर्शयति त्वत्सम इति तत्र हेतुमवतार्य व्याकरोति
अप्रतिमेत्यादिना ४३

स्वामिकृतटीका ३

अचिन्त्यप्रभावमेवाह पितेति नविद्यतेप्रतिमोपमायस्यसःअप्र
तिमस्तथाविधःप्रभावोयस्यतवहे अप्रतिमप्रभाव त्वमस्यचराचर
स्यपिताजनकोसि अतएवपूज्यश्चगुरुश्चगुरोरपिगरीयान्गुरुतरः
अतोलोकत्रयेपित्वत्समएवतावदन्योनास्ति परमेश्वर[illegible]स्याभा
वात् त्वत्तोभ्यधिकःपुनः[illegible]कुतःस्यात् ४३

पिशाचभाष्यटीका ४

स्पष्टार्थं ४३ ॥ ॥ ॥

श्री॰ गी॰ टी॰ प

रामानुजभाष्यटीका॰ ५

पितासीति अस्य चराचरस्य लोकस्य पितासि अस्य लोकस्य गुरुश्चा
सि अतस्त्वमस्य लोकस्य चराचरस्य गरीयान् पूज्यतमः न त्वत्समो
स्त्यभ्यधिकः कुतोन्यः लोकत्रयेपि त्वदन्यः कारुण्यादिना गुणेन के
नापि न त्वत्समोस्ति कुतोभ्यधिकः ४३

अभिनवगुप्तकृतटीका॰ ९

स्पष्टार्थं ४३

परमार्थप्रपाटीटीका॰ १

अथ तत्क्षमापने बीजमाह पितेति पितास्याद्यकः पूज्यः पूजनीयश्च गु
रुरुपदेष्टा ततोपि गरीयान् इष्टतोभावे कथयति अप्रतिमप्र
भावः त्वत्सदृशोन्यः परमेश्वरो नास्ति कुतस्त्वत्तोधिकः श्रुतिरपि
रथन्तरसाम्न्येतत् न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्य
ते इत्यवादीति विनाशोपि स्पष्टार्थं ४३

वनमालीटीका॰ ८

अचिन्त्यप्रभावत्वमेव प्रपञ्चयति पितेति अस्य चराचरस्य लोकस्य पि
ता जनकस्त्वमसि पूज्यश्चासि सर्वेश्वरत्वात् गुरुश्चासि शास्त्रोपदे
ष्टा अतः सर्वप्रकारैर्गरीयान् गुरुतरोसि अत एव न त्वत्समोस्त्यभ्य
धिकः कुतः लोकत्रयेपि हे अप्रतिमप्रभाव नास्ति प्रतिमा तुल्यो ऽन्यः
प्रभावो यस्य सोऽप्रतिमः प्रभावो यस्य स तथा त्वत्समो ना
सर्व॰ स्ति द्वितीयपरमेश्वराभावात् तस्मादधिको ऽन्यः कुतः स्यात् सर्वथा
न संभाव्यत एव समर्थः ४३

कृष्णवैजयन्तीटीका ४

अप्रमेयतामेव प्रपंचयति पितासीति अस्य चराचरस्य विदचिदात्मक
स्य लोकस्य त्वं पिता जनकोसि सर्वकारणत्वात् अस्य पूज्यश्चासि
सर्वेश्वरत्वात् अस्य गुरुश्चासि सर्वशास्त्रोपदेष्टृत्वात् अतः सर्वैः प्र
कारैर्गरीयान् गुरुतरस्त्वमेवासि अत एव हे अप्रतिमप्रभाव न विद्य
ते प्रतिमा उपमा यस्य सो ऽप्रतिमस्तथाविधः प्रभावो निरंकुशाचि
न्त्यैश्वर्यं यस्य स तत्संबोधने कुत एव यतो लोकत्रयेपि ब्रह्मलोका
दिपातालान्तेपि अन्यस्त्वदन्यः कश्चिदपि त्वत्समोः विद्यमानत्वस्वरूप
गुणशक्त्यादिभिस्त्वत्तुल्यो नास्ति अतीतमुपलक्षणेनातीतं न भविष्य
तीत्यर्थः अतोभ्यधिकस्त्वत्तः सर्वप्रकारैरधिको ऽन्यः कुतः स्यात् हि

तीयस्यसर्वेश्वरस्याभावात् एवंश्रुतिरप्याह नतत्समश्चाभ्यधि
कश्चदृश्यतइति ४२

मधुसूदनीटीका॰ १०॥ अचिंत्यप्रभाव तामेवप्रपंचयति॥

अस्यचराचरस्यलोकस्यपिताजनकस्त्वमसि पूज्यश्चासिसर्वे
श्वरत्वात्गुरुश्चासिशास्त्रोपदेष्टा अतःसर्वैःप्रकारैर्गरीयान्
गुरुतरोसि अतएवनत्वत्समोस्त्यभ्यधिकःकुतोन्यःलोकत्र
येपिहेअप्रतिमप्रभावयस्यसमोपिनास्तिद्वितीयस्यपरमेश्व
रस्याभाववात् तस्याधिकोन्यःकुतःस्यात्सर्वथानसंभाव्यत
एवेत्यर्थः [illegible] ४२

सदानंदीटीका॰ ११

अप्तचिंत्यप्रभावत्वंप्रपंचयतिपांडवः चराचरस्यलोकस्यपि
तात्वंपूज्यईश्वरः १ गुरुःशास्त्रोपदेष्टासिगरीयान्सर्वथाप्यसि
त्वत्समोनास्तिकुत्रापिकुतस्त्वादधिकोहरेः त्वत्तोन्यस्येश्वरस्येवा
भावादप्रतिमेश्वर ४२

नीलकंठीटीका॰ १२

अप्रमेयत्वमेवाह पितासीति यतस्त्वमस्माकंपितासिअतोस्मा
भिःशिशुभिःकृताअपराधास्त्वयासोढव्याएवेतिभावः ४२

आनंदीटीका + सुगमोर्थः ४२

+ अप्रमेयत्वअचिंत्यप्रभावतांप्रपंचयति॥

रामकंठीटीका [illegible] लोकत्रयेपितव
समोनास्तिकुतोन्योभ्यधिकोभविष्यति॥ ४२ ॥

लासिकी [illegible]टीका

यतः हेअप्रतिमप्रभावअनुपमैश्वर्य त्वमस्यचराचरस्यलोकस्यपिताज
नकःपालकोवासि पूज्यश्चासिगुरुश्चासि अतःसर्वस्माद्गरीयान्गु
रुतमोसि अतोलोकत्रयेपित्वत्समस्तावदन्योनास्ति द्वितीयस्यपरमे
श्वरस्याभावात् त्वत्तोभ्यधिकःकुतःपुनःस्यात् ४२ ॥

पंचोलीटीका

अचिंत्यप्रभावत्वमेवाह पितासीति अस्यचराचरस्यस्थावरजं
गमस्यलोकस्यजगतस्त्वंपिताजनकःनकेवलंजनकःपूज्यः
पूजार्हःयतस्त्वंगुरुर्गरीयान् गुरुतरःयतोलोकत्रयेत्वत्स॰

मःकोपिनास्तिअभ्यधिकःअतःअप्रतिमःअनुपमःभावो
यस्यसःअप्रतिमप्रभावः ४३

रसवीरसमिद्धोधिनी॥

पितासीति त्वमेवास्यचराचरात्मकस्यजगतःपिता पितृवदु
त्पादयितातएवगरीयान्गुरुतरप्रभावत्वात्पूज्योगुरुस्त्वोप
देष्टासियतस्त्वमप्रतिमप्रभावः विश्वस्मिल्लोकेप्यप्रतिमोसमा
नःप्रभावोस्याद्वितीयत्वादिति ब्रह्मादयोप्युत्पादयितारोम
समानाएवेतिचेदतआह नेतित्वत्समोविशेषद्योतकः अन्यो
ब्रह्मादिकः त्वत्समोपिनभवत्यप्रतिमप्रभावत्वात्कुतोभ्यधि
कोनिरतिशयप्रभावत्वादिति ४३॥

मधुभाष्य

४३॥

भाषा अनुवाद

अथ भगवत् का अचिन्त्य प्रभाव कहते हैं कि हे अप्रतिम प्रभाव नहीं है प्रतिमा कहे उपमा ऐसा निरूपम प्रभाव है जिसका सो तुम इस चराचरात्मक लोक के पिता कहे उत्पत्ति करनेवाले औ पूजनीय तथा गुरु के भी गुरु हो इस हेतु परमेश्वर जो तुम तुमारे समान को त्रिलोकी मे कोई नहीं तो अधिक फेरि और कहां होय सकै है ४२

चौपई

पिताचराचरको तुं होई तुंजगपूज्यगुरुगरिष्ठ हि सोई नहि
तव सम को अधिक हि ओर तीनलोक असमप्रभाव हि तोर ४२

तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वा
महमीशमीड्यं पितेव पुत्रस्य सखेव सख्युः
प्रियः प्रियायार्हसि देव सोढुं ४४

शाङ्करभाष्यटीका १

यत एवं तस्मादिति तस्मात् प्रणम्य नमस्कृत्य प्रणिधाय प्रक
र्षेण नीचैर्धृत्वा कायं शरीरं प्रसादये प्रसादं कारये त्वामहमी
शमीशितारमीड्यं स्तुत्यं त्वं पुनः पुत्रस्यापराधं पिता यथा क्षम
ते सर्वं सखा इव सख्युरपराधं यथा वा प्रियः प्रियाया अपराधं
क्षमते एवमर्हसि हे देव सोढुं प्रसहितुं क्षन्तुमित्यर्थः ४४

आनन्दगिरिकृतटीका २

निरतिशयप्रभावत्वे हेतुं कृत्वाप्रतिमेत्यादिना प्रसादये प्रणाम
पूर्वकं त्वामित्याह यत इति प्रसादनानन्तरं भगवता कर्तव्यं प्रार्थ्य
ते त्वं पुनरिति प्रियइव प्रियाया इतीवकारो लुप्तोऽत्र प्रियायार्ह
सीति छान्दसः सन्धिः क्षन्तुं मदपराधजातमिति शेषः ४४

स्वामिकृतटीका ३

यस्मादेवं तस्मादिति तस्मात्त्वामीशं जगतः स्वामिनमीड्यं स्तुत्यं प्रसाद
यामि कथं कायं प्रणिधाय दण्डवन्निपात्य प्रणम्य नत्वा अतस्त्वं मम
पराधं सोढुं त्वमर्हसि कस्य क इव पुत्रस्यापराधं कृपया पिता यथा स
हते सख्युर्मित्रस्यापराधं सखा मित्रं यथा प्रियः प्रियाया पर
राधं प्रियायाः यथा तद्वत् ४४

पैशाचभाष्यटीका ४

तस्मादिति प्रणिधाय प्रकर्षेण नीचैर्दण्डवत् भूमौ कायं निपात्य सो
ढुमुपचारः ४४

रामानुजभाष्यटीका ५

तस्मादिति यस्मात्त्वं सर्वस्य पिता पूज्यतमो गुरुश्च कारुण्यादिगुणै
श्च सर्वाधिकोऽसि तस्मात्त्वां प्रणम्य प्रणिधाय कायं प्रसादये यथा कृता
पराधस्यापि पुत्रस्य यथा सख्युः प्रणामपूर्वकं प्रार्थितः पिता सखा वा
प्रसीदति तथा त्वं परमकारुणिकः प्रियायाः इव मे सर्वं सोढुमर्हसि ४४

॥ अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थः ४४ ॥

परमार्थप्रपाटीका ७

१ श्री. गी. टी. ८

नु

यत एवं तस्मात्कायं प्रणिधाय दण्डवन्निपात्य प्रणम्य त्वामहं प्रसादये प्र-
सन्नं करोमि किंभूतमीशमीड्यं स्तुत्यं त्वं च अनेकप्रकारेण मम
पराधं सोढुमर्हसि कस्य क इव पिता पुत्रस्येव सखा सख्युः प्रियः प्रि- सखेव
प्रियायाः प्रियायाग्रथवस्वरफलाये स्मृतिः ज्ञातारमिदंमपितारा
हवे मिदं हवैस्तत्रव मिमादि प्रमेयत्वेनाह श्लोकत्रय मुद्दानप्रवस्रा
पितेत्यपि भगवद्बहुमानमभिज्ञस्य मतद्वाक्यालमितादरस्य हरिर्या
काश्य मामाश्रितैः युक्तापन्नतमारणाम पशास्मामस्नायभोग-
स्थिरादालामिमपराधं जातमधुनाश्मप्रहरे देशीने ४४

वनमालीटीका ८

तस्मात्प्रणम्य प्रणिधाय प्रकर्षेण नीचैः कायं धृत्वा दण्डवद्भूमौ पति-
त्वा प्रसादये त्वामीशमीड्यं सर्वस्तुत्यमहमपराधी अतो हे देव पितेव
पुत्रस्यापराधं सखेव सख्युरपराधं प्रियः प्रियायाः पतिव्रताया अप-
राधं ममापराधं त्वं सोढुं क्षन्तुमर्हसि अन्यथा रक्षामि मम प्रियायार्हसि १०
सोढुमेव शाह लोपः संधिश्चार्षः ४४

कृष्णसेवाजयन्तीटीका ४

किंच यस्मात्त्वं सर्वलोकस्य पिता गुरुः पूज्योऽगुरुतरश्च स्वरूपगुणा-
दिभिः सर्वप्रकारेण सर्वाधिकोऽसि तस्मात्कायं प्रणिधाय प्रणम्य भू-
मौ साष्टाङ्गं प्रणतिं कृत्वाहं त्वदपराधी त्वन्महिमानभिज्ञः ईशं सर्व-
स्य नियन्तारं स्वामिनं वा ईड्यं सर्वस्तुत्यं विश्वाकारं भगवन्तं प्रसादये
प्रसन्नं करोमि न त्वपराधिनः प्रणामेनेवाहं प्रसन्नः कथं स्यामित्यपे-
क्षायां स्वस्वाभाविककारुण्यादिगुणाश्रयत्वेन प्रणाममात्रसाधनत्वे-
नैव त्वं प्रसन्नः स्यादिति स्वजनापराधसहने दृष्टान्तत्रयेण भगवन्तो
योग्यतामाह पितेव पुत्रस्य यथापराधिनः पुत्रस्यापराधं पिता सहते
यथा च सखा सख्युरपराधं पिता सहते यथा च सखा सख्युरपराधं सखा सहते
यथा प्रियायाः पतिव्रतायाः अपराधं प्रियः पतिः सहते यथा हे दे-
वापराधिनो ममाप्यपराधं सोढुं त्वं करुणावरुणालयोऽर्हसि
योग्यो भवसि प्रियायार्हसीत्यत्र इवशब्दलोपः संधिश्चार्षः ४४

मधुसूदनीटीका ४

यस्मादेवं --- तस्मात्प्रणम्य नमस्कृत्य त्वां प्रणिधाय प्रकर्षेण नीचैर्धृत्वा कायं दण्ड-
वद्भूमौ पतित्वेति यावत् प्रसादये त्वामहमीशमीड्यं सर्वस्तुत्यमहमप-
राधी अतो हे देव पितेव पुत्रस्यापराधं सखेव सख्युरपराधं प्रियः प

ॐ

तिरिव प्रियायाः पतिव्रतायाः पराधं समाप्यपराधं त्वं सोढुं तं तु मर्ह
सि अनन्यशरणत्वान्मम प्रियायाः ईशी मंत्र इव शाहलोपः संधि
श्छांदसः [illegible]
[illegible] ४४

सदानंदीटीका ११

तस्मात्त्वाहं नमस्कृत्य पतित्वा देवं वदतो प्रसादयेविल त्वं
त्वामीश्वरपदाश्रदं १ यथा पुत्रस्य स्खलत्सु तेष्वपराधं पिता यथा १
सख्युः सखा पतिः सत्याभार्यायाः तत्सुते यथा २ तथा ममापरा
धं त्वं सोढुमर्हसि केशव अनन्यशरणत्वाच्च कल्याणगुणसागर
३ इत्येतद्वत्तं मति शजगतामुपरि शाः क्रमः क्रपात्र लृपि वा सव
तोषात्प्रणेः स्तोत्रं पदेन यति शांति नत्वेक यामयत्नं भजेस तत तमी
शामहं स्तुतेदं ४४ नीलकंठीटीका १२

पतदेवाह तस्मादिति यस्मात्त्वं पिता गुरुश्च तस्मात्त्वां प्रणम्य शरीरेण प्र
णिधाय भूमौ कृत्वा देवं वत्प्रणम्य त्वामप्रसादये ईशमीड्यं सहमम
त ४४

आनंदीटीका

कायं प्रणिधाय दंडवद्भूमौ पतित्वा प्रणाम्य नमस्कृत्य अथेश्वरस्य
माहात्म्यप्रत्यभिज्ञानमाह दिव्यानि कर्माणि तवाद्भुतानि पूर्वाणि पूर्वे
प्यृषयः स्मरंति नान्योस्ति कर्ता जगतस्त्वमेको धाता विधाता च विभु
र्भवश्च धाता धारयिता विधाता स्रष्टा तवाद्भुतं किंन भवेदसंख्यं किं वा
प्राकं परतः कीर्तयिष्ये कर्तास्मि सर्वस्य यतः स्वयं वै विभो ततं सर्वमिदं
त्वमेव अत्यद्भुतं कर्म तदुष्करं ते कर्मोपमानं नहि विद्यते ते न ते गुणाना
त्वा परिमाणमस्ति न तेजसो नापि बलस्य चर्द्धेः दिव्यानि कर्माणीत्या
दिकं श्लोकद्वयमेतद्ग्रंथे नास्ति [illegible]
[illegible] ४४

रामकंठीटीका मूलश्लोकं स्पष्टार्थत्वान् पाठक्रमोप्यत्र

अथाविज्ञातमहिमानमावेदयितुमाह दिव्यानि कर्माणि तवाद्भुता
नि पूर्वाणि पूर्वेप्यृषयः स्मरंति नान्योस्ति कर्ता जगतस्त्वमेको धा
ता विधाता च विभुर्भवश्च तवाद्भुतं किन्न भवेदसंख्यं किं वा प्राकं परितः

श्री॰ गी॰ टी॰ प॰

कीर्तयिष्ये कर्तासि सर्वं समाप्नोषि ततः स्वयं वै विभो ततः सर्वमिदं त्वमेव अ
त्यद्भुतं कर्म न दृष्टं नेक मौपमानं नहि विद्यते ते तेजसा नांपरि
माणामस्ति न तेजसो नापि बलस्य न इ॥ पूर्वं श्रुतानन्तापि सर्व
३४ ता वीर्य यस्त्वं कर्मणि समर्थ इति अत एव तेषाम् ऋषीणामपि ता
निर्वाणीति जगतः सर्गप्रलयादीनां भगवत्कर्मणां स्वनादि
वेष प्रवृत्तत्वप्रतिपादनपरमेतत् पूर्वं व्याख्यातं स्यायमर्थः स
वांथं किं तथा नात्माथ्यितं विधानां स्पष्टात व स्पष्टयः समाराः
किमद्भुतमाश्चर्यं रूपं कर्म स्वेच्छामात्रोपकारणस्य कस्य कर्तं
त्वमत्यन्तम तपवसङ्कार्यादिकारणानिरपेक्षत्वात्स्वतः स्वा
त्मव्यतिरिक्तात् जगत्सिद्धकं सामर्थ्यं किं वा नेकधा यस्य त्वमीत कुदा
त्वमात्र तत्र यागतत्त्वं सर्वस्य वस्तुजातस्य निर्माता ततो हेतं त
राभावात्वमेवेदं सर्वं त्वच्छक्तिरेव जगदेकास्तीत्यर्थः ततस्तन्या
श्चर्यरूपमपि कर्म न तेन दृष्टं रमित्यादि स्पष्टम् [illegible]
[illegible]
[illegible] ॥

लासिकी वल्लभीटीका

तस्मात्ततो हेतोः प्रणम्य नत्वा कायं प्रणिधाय दंडवद्भूमौ निपात्य
त्वां स्तुत्यमीश्वरं प्रसादये हे देव पिता पुत्रस्यापराधं जातमिव सखा ४
सख्युरिवापराधम् प्रियः प्रियायाऽपराधं ममापि त्वं सोढुमर्हसि
प्रियायाऽइति विसर्गलोपः संधिरार्षः [illegible] ४४

पंचोलीटीका

यस्मादेवं तस्मादिति कायं देहं प्रणिधाय भूमौ पातयित्वा प्रण
म्य नमस्कृत्य अहं त्वामीशमीड्यं पितेव पुत्रस्य प्रसादये प्रसादं
कारये हे देव ममापराधं सोढुमर्हसि यथा पुत्रस्यापराधं पिता
सहते यथा सखा सख्युरपराधं सखा सहते प्रियायाः अपराधं प्रियः सह
ते तथा त्वमपि ४४

यस्मादेवं तस्मात्कारणादहं त्वत्सर्वकायं त्वत्पादीं प्रणिधाय प्रकर्षे
णाष्टांगं दंडवन्निधाय तदनु प्रणम्य प्रार्थनामेव च नत्वा त्वामीशं
स्वामिनमीड्यं कीर्तनीयमाहात्म्यं प्रसादये प्रसन्नं कारये इत्यर्थः॥
पुनः प्रार्थयते पितेति यथाहि पुत्रेरक्षित्वादिधर्मव्यापारवत्त्वेपि
तवैवेति पुत्रस्य पितेव यथा च सख्युः कुमार्गादिभ्यो व्यावर्तकत्वादि
धर्मवत्त्वं सख्यावेवेति सख्युः सखेव तथा त्वमपि ममेति किंच
प्रियः प्रियायार्हसि देव सोढुमिति देव यथा च प्रियः प्रियतमः पुरा
दिकः प्रियाय पितादेर्हिताय भवति तथा त्वमपि ममेति मद्विषया
नपराधान्सोढुमर्हसि अपराधिनमपि मां प्रति प्रसीदेति भावः
४४॥

मधुभाष्य

४४॥

147

भाषा अनुवाद

इस से हे ईश स्वामिन् स्तुति के योग्य ईश्वर जो आप तिन को मैं शरीर से दण्ड की नाईं अष्टाङ्ग प्रणाम करि प्रसन्न करावता हूं कि जैसे पुत्र की अपराध कृपा करि के पिता सहि लेता और मित्र की अपराध मित्र मनमे नहीं धरता तथा पत्नी की अपराध पति भी प्रीति से सम करता है तैसे ही हे देव पिता औ मित्र तथा स्वामी रूप आप भी मेरी अनजान बालक समान प्रीतिपात्र सेवक की अपराध क्षमा कीजिये ४४

चौपाई

तातें नमहुं भूमिपर शीश करौं प्रसन्न मै तोहि पूज्य हिं ईश
सुत को पितु सम हित को हितु होई प्रियहिं प्रिया तें योग्य दे
व सहन कोई ४५

248

अदृष्टपूर्वं हृषितोस्मि दृष्ट्वा भयेन च प्रव्यथि
तं मनो मे तदेव मे दर्शय देव रूपं प्रसीद दे
वेश जगन्निवास ४५

शाङ्करभाष्यटीका १

अदृष्टपूर्वमिति अदृष्टपूर्वं न कदाचिदपि दृष्टपूर्वमिदं विश्व
रूपं तव मया मैत्वा तदहं दृष्ट्वा हृषितोस्मि भयेन च प्रव्यथितं
मनो मेऽतस्तदेव मे मम दर्शय हे देव रूपं यत्मात्सखं प्रसीद दे
वेश जगन्निवास जगतो निवासो जगन्निवासः हे जगन्निवास ४५

आनन्दगिरिकृतटीका २

हेतूक्तिपूर्वकं विश्वरूपोपसंहारं प्रार्थयते अदृष्टेति हृषितो हृष्ट^
लुष्ट इति यावत् भयेन तद्दृष्टविकृतदर्शनेनेत्यर्थः ४५

स्वामिकृतटीका ३

एवं क्षमापयित्वा प्रार्थयते अदृष्टपूर्वमिति द्वाभ्यां हे देव पूर्वमदृष्टं
तव रूपं दृष्ट्वा हृषितोस्मि तथा भयेन च मे मनः प्रव्यथितं तस्मान्मम
व्यथानिवृत्तये तदेव रूपं दर्शय हे देवेश हे जगन्निवास प्रसन्नो भव ४५

पैशाचभाष्यटीका ४

अदृष्टपूर्वमिति हृषितो हृष्टरोमा ४५

रामानुजभाष्यटीका ५

अदृष्टेति अदृष्टपूर्वमत्यद्भुतमत्युग्रं च तव रूपं दृष्ट्वा हृषितोस्मि
भयेन च प्रव्यथितं च मे मनः अतस्त्वदीयं प्रसन्नं रूपं मे दर्शय प्रसीद दे तं^
वेश जगन्निवास मयि प्रसादं कुरु देवानां ब्रह्मादीनामपीश जग
दाश्रयभूत ४५

अभिनवगुप्तकृतटीका ६

स्पष्टार्थो ४५ ॥ ॥ ॥

परमार्थप्रपाटीका ७

अपरं माण्यप्रार्थयते अदृष्टपूर्वमिति द्वाभ्यां पूर्वं जन्मजन्मान्तरे
पिन दृष्टमिमं अदृष्टपूर्वं विश्वरूपान्तम्नत्वधुजरूपं दृष्ट्वा मा दृष्टपाल
मपमलभ्यलाभ इति हृषितोस्मि अनन्तरं दृष्ट्वा करालानि रूपा
णि दृष्ट्वा भयेन च मे मनः प्रव्यथितं अतः परं भो देवेश जगन्निवास प्र

१ श्री॰ गी॰ टी॰ प

सीद प्रसन्नो भव प्रसादे किं प्रार्थनीयमित्याह तदेव प्रथमम् उपलब्धं हर्षजनकं चतुर्भुजं रूपं मइति मां दर्शय तावतैव कृतार्थः स्यामित्यर्थः ४५

वनमालीटीका ८

एवमपराधान्क्षमापयित्वा सर्वदा स्वानुभूतरूपदर्शनं प्रार्थयते अदृष्टेति द्वाभ्यां कदाप्यदृष्टपूर्वं पूर्वमदृष्टं विश्वरूपं दृष्ट्वा हृषितो हृष्टोऽस्मि तद्रूपदर्शनजेन भयेन मे मनो व्यथितं व्याकुलीकृतं अतस्तदेव स्वरूपं मयाभ्यस्तं मम प्राणसहस्रादपि तथापि प्रियं यत्तस्माद्देवविनाद्यो गीश्वराणां मनसाप्यगम्यं रूपं मम दर्शय चक्षुर्गोचरीकुरु हे देवेश हे जगन्निवास प्रसीद मदतिवल्लभरूपदर्शनरूपप्रसादं मे कुरु ४५

[illegible]वैजयन्तीटीका ९

एवमात्मनोऽपराधक्षमां संप्रार्थ्य इदानीं भगवतो विश्वरूपोपसंहारेण प्राग्रूपदर्शनाय भगवन्तमर्जुनः प्रार्थयते द्वाभ्यां अदृष्टपूर्वमिति अदृष्टपूर्वं मया कदापि पूर्वं न दृष्टं नवेदमैश्वरं विश्वरूपं दृष्ट्वावलोक्याहं हृषितोऽस्मि मन्त्रिवर्गस्यैवेदं समसाधारणरूपमिति मुदितोऽस्मि अथ च मे मम मनो अतिभयानकं नवेदघोररूपमवलोक्य तद्विकृतरूपदर्शनजेन भयेन प्रव्यथितं व्याकुलीकृतं भवति अत इदमहं त्वां प्रार्थये हे देवेश ब्रह्मादिदेवनियन्तः स्वामिन्वा हे जगन्निवास सर्वजगदाधार प्रसीद त्वमपि प्रसादं कुरु मत्प्रसादेन किं फलमिच्छसीत्यपेक्षायामाह तदेवेति मे मम प्राणेभ्योऽप्यतिप्रियं यत्तदेव पूर्वं दृष्टमेव देवरूपं चतुर्भुजाकारं तेनैव रूपेण चतुर्भुजेनैव मन्नेत्रयमेव वसन्ते तद्दर्शय प्राङ्गभावय देवनिसर्गोपथन रूपमिन्नं पदेवादेह देवमनेन लोकदृश्यासम्भवाकारोपि त्वं नमानुषः किं तु परमेश्वर एवासंदेहज्जाने इति सूचितं ४५

+ एवं निजापराधक्षमां प्रार्थ्य पुनः प्राग्रूपदर्शनं विश्वरूपोपसंहारेण प्रार्थयते द्वाभ्यां ॥

मधुसूदनीटीका १०

+कदापि अदृष्टपूर्वं पूर्वमदृष्टं तव विश्वरूपं दृष्ट्वा हृषितो हृष्टोऽस्मि तद्विकृतरूपदर्शनजेन भयेन प्रव्यथितं व्याकुलीकृतं मनो मे अतस्तदेव प्राचीनमेव मम प्राणेभ्योऽपि प्रियं रूपं मे दर्शय हे देवेश हे जगन्निवास प्रसीद प्राग्रूपदर्शनरूपप्रसादं मे कुरु [illegible]

सदानंदीटीका ११

अपराधक्षमां प्रार्थ्य पुनः प्राग्रूपदर्शनं विश्वरूपोपसंहारद्वारा
प्रार्थयते पुना १ कदाप्यदृष्टपूर्वं यद्विश्वरूपं महत्तरं दृष्ट्वा हृष्टो
स्मि तद्रूपं श्रीमद्भगवतो हरेः २ भीषणत्वाद्भयेनैव मनो मे व्या
कुलीकृतं अतस्त्वं देव प्राचीनं मम प्राणादपि प्रियं ३ मह्यं दर्श
य देवेश प्रसीद जगतां पते ४५

नीलकंठीटीका १२

एवं स्तुत्वा स्वेष्टं प्रार्थयते अदृष्टपूर्वमिति हे देव कदाचिदपि
पूर्वं न दृष्टं तादृशं अदृष्टपूर्वं तव रूपं दृष्ट्वा हृषितउत्फुल्लो
स्मि तथा विकरालरूपदर्शनजेन भयेन च मे मम मनः प्रव्य
थितं अतस्त्वं देव धारणाविषयभूतं रूपं मे मह्यं दर्शय ४५

आनंदीटीका ॥ ^अथैतद्रूपं मनुष्यस्य कृते नित्यं चिरकालं द्रष्टुमशक्यमि
रपरिचितमेव रूपं द्रष्टुं प्रार्थयते पुनः ॥

^हृषितोस्मि रोमांचितोस्मि ४५ ॥

रामकंठीटीका स्पष्टार्थम् ४५

अथानुग्रहलक्षणानुभूतभगवत्स्वरूपातिरेकसमाधेर्निष्क्रांतस्त[illegible]विध
मस्त्वग्रं भगवद्रूपं मनुष्यधर्मप्रत्यापत्तेश्चिरं द्रष्टुमशक्तः प्राक्तनमेव दि[illegible]दृक्ष
माणमिदमाह ॥

लासिकी धनपतीटीका

किंच हे जगन्निवास अदृष्टपूर्वं तवैश्वरं रूपं दृष्ट्वा भयेन च मम मनः प्र
व्यथितं व्याकुलीभूतम् ऐश्वररूपसमावेशसंस्कारवैवश्येन पुरः
स्थितमपि श्रीकृष्णरूपमनुपलभ्यमानत्वाद्दर्शयितुं प्रार्थयते त
देवेति हे देव हे देवेश तदेव प्राचीनं रूपं मे मह्यं दर्शय प्रसीद प्रसन्नो भ
व [illegible] ४५

पंचोलीटीका

एवं क्षमाप्य प्रार्थयते अदृष्टपूर्वमिति द्वाभ्यां हे देव हे भगवन्
अदृष्टपूर्वं तवेदं विश्वरूपं दृष्ट्वा हृषितोस्मि च भयेन मे
मनः प्रव्यथितं प्रचलितं मम तदेव रूपं यत्मत्सुखं तदेव दर्शय
हे देवेश जगन्निवास प्रसीद प्रसादं कुरु ४५

भगवीरसमिद्धोधिनी

अदृष्टपूर्वमिति पूर्वंविनदृष्टमेतत्तेरूपंसंप्रतिदृष्ट्वाहृषितो।
स्मि मनश्चमेभयेनप्रव्यथितमिति हर्षकंपमिश्रसुखलाभा
नमव्यथानिवृत्तिर्नाभूदेवन्त्वदूपाद्व्यातेरित्यतस्तदेवरूपं
दर्शय येनाहं सुखितःस्यामित्याह तदेवेति तदेवरूपंमेद
र्शयाथ देवदेवेशजगन्निवासेति संबोधनद्वयंभक्ताभ्येत्यत्र
ग्रहस्तवनार्थंइतिमांप्रति प्रसीदेत्यनेनैव प्रसादेननिरतिशय
सुखोभवामीति प्रसादफलमितिभावः ४५॥

मधुभाष्य

४५

भाषा अनुवाद

इस प्रकार से क्षमा कराय अब अर्जुन दो श्लोक के द्वारा भग
वान से प्रार्थना करते हैं कि हे देव श्रीकृष्ण अदृष्टपूर्व यह
आपका रूप देखि के मैं अति प्रसन्न भया हौं परन्तु भय के
मारे मेरा मन थिर नहीं है इससे हे देवेश जगत के निवा
स अब मेरे पर प्रसन्न होउ और वही पूर्व रूप देखावो यह
प्रार्थना करता हूं ४५

चौपई

अदृष्ट पूर्व देखि मैं हर्षा पुन भयसें मन मोरहि कर्षा
ताते देव दर्षो पसोई रूपा हर्ष सुरेषा जगवास स्वरूपा ४५

151

149

किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुम
हं तथैव तेनैव रूपेण चतुर्भुजेन सहस्रबा
हो भव विश्वमूर्ते ४६

शाङ्करभाष्यटीका १

किञ्च किरीटिनमिति किरीटिनं किरीटवन्तं तथा गदिनं गदा
वन्तं चक्रहस्तमिच्छामि त्वां प्रार्थयेत्वा द्रष्टुमहं तथैव पूर्ववद
ित्यर्थः यत एवं तस्मात् तेनैव रूपेण वसुदेवपुत्ररूपेण च
तुर्भुजेन सहस्रबाहो वार्तमानिकेन विश्वरूपेण भव विश्वमू
र्ते उपसंहृत्य विश्वरूपं तेनैव रूपेण वसुदेवपुत्ररूपेण भवे
त्यर्थः ४६

आनन्दगिरिकृतटीका २

तदेव दर्शयेत्यर्थं किं तदित्यपेक्षायामाह किरीटिनमितीति चक्रं
हस्ते यस्य तमिति श्रुमतिं गृहीत्वाह चक्रेति मदीयेच्छाफलप
र्थिता कर्तव्यमित्याह यत इति चतुर्भुजत्वे कथं सहस्रबाहुत्वं तत्रा
ह वार्तमानिकेनेति सति विश्वरूपे कथं पूर्वरूपभाक्त्वं तत्राह
उपसंहृत्येति ४६

स्वामिकृतटीका ३

तदेव रूपं विशेषयन्नाह किरीटिनमिति किरीटवन्तं गदावन्तं चक्र
हस्तं च त्वां द्रष्टुमिच्छामि पूर्वं यथा दृष्टोऽसि तथैव अतो हे सहस्रबा
हो विश्वमूर्ते इदं रूपं संहृत्य तेनैव किरीटादियुक्तेन चतुर्भुजेन
भवाविर्भूतो भव तदनेन श्रीकृष्णमर्जुनः पूर्वमपि किरीटादियु
क्तमेव पश्यतीति गम्यते यत्तु पूर्वं युक्तं विश्वरूपदर्शने किरीटिनं
गदिनं चक्रिणं च पश्यामीति तत्तु बहु किरीटाद्यभिप्रायेण यद्वा
यत्तावन्तं कालं यं त्वां किरीटिनं चक्रिणं च सस्मितमपश्यं तमे
वेदानीं तेजोराशिं दुर्निरीक्ष्यं पश्यामीत्येवं तत्र वचनव्यक्तिरिति
न विरोधः ४६

पिशाचभाष्यटीका ४

यथा पूर्वं दृष्टवानहं तथैव संयुक्तो भव ४६

रामानुजभाष्यटीका ५

किरीटिनमिति तथैव पूर्ववत् किरीटिनं गदिनं चक्रहस्तं त्वां द्रष्टु
मिच्छामि अतस्तेनैव पूर्वसिद्धेन चतुर्भुजेन रूपेण युक्तो भव सहस्र

श्री
गी टी·
५

बाहो विश्वमूर्ते इदानीं सहस्रबाहुस्तेन विश्वशरीरत्वेन दृश्यमान
रूपत्वं तेनैव रूपेण चतुर्भुजो भवेत्यर्थः ४६

अभिनवगुप्तकृतटीका· ९ ॥

स्पष्टार्थं ४६

॥

परमार्थप्रपाटीका ७

अथोपक्रमेः दृष्टपूर्वं कीदृशमित्याह किरीटिनमिति मुकुटवं
तं गदिनं चक्रिणं चेत्युपलक्षणमेतत् सर्वायुधयुक्तमिति तेयं अभ्रा तेऽ^
यमर्थः विश्वरूपादर्शनोपक्रमे दिव्यदृष्ट्यापचात्रभुजं तेनोक्तमति
मनोरमरूपं दृष्टं तेन हेतुकुण्ठविनानाम्बञ्जनभवगौवरं भवतीति पू
र्वं प्रमाणादिभ्यः अतमामीप्सितदर्शयामतो मया चैव दृष्टमिति दृष्टं^
जनकं तथा नतेरं दंष्ट्राकरालमरूपं प्रपन्नः ... प्रसन्नकमनुत्तलदेव
किरीटादुपस्कृतं रूपं द्रष्टुमिच्छामि न तु भयजनकं तस्माद्धे विश्व न४
मूर्ते सहस्रबाहो तेनैव चतुर्भुजेन रूपेण भव आविर्भव अथ विश्व
रूपदर्शना[illegible]तरमर्जुनश्चतुर्भुजमेव रूपं द्रष्टवानिति व
देव^ दन्ति पूर्वमपि देवो रूपं दृष्टवानत्र किरीटिनं गदिनं चक्रिणं वेति
पुनर्वक्तव्यमनुपपन्नं किं च चतुर्भुजरूपं हि देवस्य नमानुषं तथा
च प्रथममेव देवरूपप्रतीतो अज्ञानतो महिमानं तवेदं तथा यद्वा
तै^ वहासार्थमसत्कृतोसीतिन युज्यते किं च अवजानन्ति मां मूढा
मानुषीं तनुमाश्रितं तथा द्रष्टुं दमानुषरूपं तव सौम्यं जनार्दनेत्यु
पक्रमोपसंहाराभ्यां सर्वमनुपपन्नमापरमपरसम्^ ४६ द्विभुज रूपं सैव निर्दिष्टं यानु^

वनमालीटीका· ८

किरीटवंत[illegible]वक्रहस्तं वक्रिटं द्रष्टुमिच्छामि तथैव तेनैव
मदभ्यस्तरूपेणैव चतुर्भुजेन सहस्रबाहो हे विश्वमूर्ते यद्यपि
न^ वाहं तद्रूपं यथा मम चित्तं तस्मिन्नेव रूपेत्तरं मनो मम तदेव द
र्शय अविमानेन गुणालयेवासदेवयकस्मिन्नेवानंतरूपाकृति
गुणशक्तयः संतियस्मै स्वभक्ताय कृपयाद्युणादिकं यावद
र्शयति तावदेव सपश्यति तत्तद्रूपान्तरप्रतीतौ मम सा विश्वरूपा
दिस्मागः पंचाननेनिरमसवित्तरूपयहासनं तोपितविश्वरूपमि
ति तस्मिन्नद्रूपेपि गूढितविश्वरूपहोलेः तथाचतद्रूपान्तरसंयोगापन
मेवनतत्साग इतिभावः एतेनानन्तरूपस्यापि हरेरर्जुनेन चत
र्भुजमेव रूपं सदा द्रष्टव्यम् इत्युक्तम् ४६

हनुमवेजपत्नीटीका· ९

तद्रूपंकीदृग्भवतीत्यपेक्षायामाह किरीटिनमिति किरीटिनं किरीटो
पलक्षितंकुंडलकटककेयूरहारकटिसूत्रनूपुराद्यलंकारवंतंगदि
नंगदावंतंचक्रहस्तंचक्रंहस्तेयस्यतंएतेपदेशाङ्खपद्मवतोहे
स्तयोरप्युपलक्षणेः त्वत्पुत्रभुजेतोकिमिदंःप्राग्वत्पद्मवंतंवत्स
श्रीः ईदृशंचतुर्भुजंतदेवहंत्वांद्रष्टुमहमिच्छामि अतोहेसहस्रवाहो हे
विश्वमूर्ते इदानीमिदंरूपमेतदभावातदेववसुदेववदेवतेनैवातिसौ
दर्यादिगुणयुक्तेनैवचतुर्भुजेनरूपेणविशिष्टःसन्भवप्रादुर्भवः ४६

तदेवरूपंविवृणोति॥

मधुसूदनीटीका॥१॥

किरीटवंतंगदावंतंचक्रहस्तंचत्वांद्रष्टुमिच्छाम्यहंतथैवपूर्व
वदेव अतस्तेनैवरूपेणचतुर्भुजेनवसुदेवात्मजत्वेनभव हेस
तोहेसहस्रवाहोहेविश्वमूर्तेउपसंहृत्यविश्वरूपंपूर्वरूपेणैवप्र
कटोभवत्यर्थः एतेनसर्वदाचतुर्भुजादिरूपमर्जुनेनभगव
तोदृष्टपूर्वमिति ४६ [illegible]

[illegible]

[illegible] ४६

सदानंदीटीका॥१॥

प्रार्थनीयंस्वरूपंतद्विवृणोतिपरेजयः किरीटिनंगदावंतंचक्रह
स्तमहंप्रिये १ पूर्ववद्द्रष्टुमिच्छामितोश्रियोवासमच्युते चतुर्भुजे
नतेनैवरूपेणप्रकटोभव २ सहस्रवाहोविश्वात्मन्नुपसंहृत्यसर्व
तः विश्वरूपंस्वसौम्येनरूपेणप्रकटोभव ४६

नीलकंठीटीका॥१॥

तदेवरूपमाह किरीटिनमिति एतेनचतुर्भुजेनशंखचक्रगदाकिरी
टोपेतंचतुर्भुजंभगवतोरूपंधारणाविषयइतिदर्शितं हेसहस्र
वाहोहेविश्वमूर्ते सहस्रवाहुत्वादिकमुपसंहृत्यतेनैवरूपेणा॥
भवप्रकटोभव ४६

आनंदीटीका

स्वबोधमेतत [illegible] ४६

रामकंठीटीका स्पष्टार्थं ४६

लासकीदत्तगणीटीका॥ कालरूपसंहरणायतदेवरूपंविशिनष्टि॥

श्री
गी टी
५

153

तथैव पूर्ववदेव तेनैव किरीटादियुक्तेन यतेन पूर्वमपि चतुर्भुजाया
कारेणा श्रीकृष्णमर्जुनः पश्यति स्मेति गम्यते
४६

पंचोलीटीका

तदेवरूपं विशेषेणाह किरीटिनमिति हे सहस्रबाहो अहं त्वां
तथैव किरीटिनं गदिनं चक्रहस्तं द्रष्टुमिच्छामि हे विश्वमूर्ते तेनैव च
तुर्भुजेन रूपेण भव ४६

मणवीरसमिद्धोधिनी॥

तदेवरूपं दिदृक्षुरर्जुनो भगवंतं पुनः प्रार्थयते किरीटिनमिति
यत्त्वं पूर्वमेव किरीटिनमित्याद्युक्तं तेनैव रूपेण संयुक्तो भवेति
वाक्यार्थः ४६॥

मधुभाष्य

४६॥

भाषा अनुवाद

अब सोई पूर्व रूप कहते हैं कि हे सहस्रबाहो हे विश्वमू मैं सोई किरीट मुकुट दिये गदा औ चक्र हाथ मे लिये आप को देखने की इच्छा करता हौं इससे अब आप इस विश्वरूप को संहार करि के वे सही चतुर्भुज रूप स्वरूप धारण करो ४६

चौपई

गदा किरीट चक्रधर जैसें चाहत देखा मैं तोहि तैसें तोहि च
तुर्भुज रूपहि सोहु सहस्रबाहु विश्वमूर्ति होहु ४६॥

154

श्रीभगवानुवाच मयाप्रसन्नेन तवार्जुनेदं
रूपं परं दर्शितमात्मयोगात् तेजोमयं विश्व
मनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वं ४७

शाङ्करभाष्यटीका १

अर्जुनं भीतमुपलभ्य उपसंहृत्य विश्वरूपं प्रियवचनेनाश्वासय
न् श्रीभगवान् मयेति मयाप्रसन्नेन प्रसादोनाम त्वद्विषयानुग्रहबुद्धिस्त
द्वता प्रसन्नेन मया तव हे अर्जुन इदं परं रूपं विश्वरू
पं दर्शितमात्मयोगात् आत्मन ऐश्वर्य्यस्य सामर्थ्यात् तेजोमयं ते
जःप्राय विश्वं समस्त मनन्तं अन्तरहितं आदौ भवमाद्यं यद्रूपं
मेमम त्वदन्येन त्वत्तोऽन्येन केनचिन्न दृष्टपूर्वं ४७

आनन्दगिरिकृतटीका २

अर्ज्जुनेनप्रार्थिते हृषीकेशेनादितोक्तस्य भगवतोवचनमवतारय
ति अर्जुनमिति भगवत्प्रसादैकोपायलभ्यं तद्दर्शनमित्याशयेनाहम
येति ४७

स्वामिकृतटीका ३

एवंप्रार्थितःसन् तमाश्वासयन् श्रीभगवानुवाच मयेतित्रिभिः
हेअर्जुन किमितित्वंबिभेषियतोमयाप्रसन्नेन कृपयातवेदंपरंरूपं
मद्रूपंदर्शितं आत्मनोममयोगात्योगमायासामर्थ्यात् परमत
मेवाह तेजोमयं विश्वं विश्वात्मकं मनन्तमाद्यंच यन्ममरूपं त्वदन्ये
न त्वाद्दशात्भक्तादन्येनन पूर्वंदृष्टंतत् ४७

पिशाचभाष्यटीका ४

एतदर्जुनस्य वचनंश्रुत्वाभगवानुवाच मयेति आत्मयोगादात्म
स्वरूपेणयोगः ४७

रामानुजभाष्यटीका ५

श्रीभगवानुवाच मयेतियन्मेतेजोमयंतेजोराशिंविश्वंसर्वात्मभू
तमनंतमंतरहितंप्रदर्शनार्थमिदंआदिमध्यांतरहितंआद्यंकृ
त्स्नस्यादिभूतंत्वदन्येनकेनापिनदृष्टपूर्वंपूर्वंतदिदंप्रसन्नेनम
यामद्भक्तायतेदर्शितं आत्मनःसत्यसंकल्पत्वयोगयुक्तत्वात् ४७

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ४७

१

श्री·
गी·टी·
८

परमार्थप्रपाटीका ७

द्विगुणतरमुद्वेगमेव निर्वेदात् अथास्याश्वासयन् भगवानाह मयेति त्रिभिः
त्वया पृष्टं कुंभवाधितां तरात्मा यत्तिनविदामीति तर्हि श्राकस्मिकाद्भुत
भयानकरूपदर्शनेन भयमुत्पन्नं ते प्रहृष्टेन तु प्रसन्नेन मया दिव्यदृ
ष्टिदानपूर्वकं तव तत्परमात्मयोगात् निजमायाविभवेन रूपमुत्कृ
ष्टरूपं दर्शितं अत एव त्वमभिविशेषणेनाह तेजोमयं विश्वमनन्तं
आद्यं यत्त्वदन्येन केनापि न दृष्टपूर्वं ४७

वनमालीटीका ८

एवं प्रार्थितो भगवान् भक्तिविह्वलाय विश्वरूपदर्शनस्य दुर्लभत्वं
दर्शयन्नर्जुनमाश्वासयन्नाह मयेति हे अर्जुन किमिति बिभेषि म
या प्रसन्नेन कृपया तवेदं परं श्रेष्ठं रूपं समग्रमपि विश्वरूपं आत्म
योगात् दृष्टमपि स्वसामर्थ्याद्दर्शितं तेजोमयं प्रकाशात्मकं वि
श्वं व्यापकमनन्तं गुणपूर्णं च अनन्तं देशकालादिपरिच्छेदशून्यं
मेयदिदं रूपमेतादृशप्रसादहीनेन त्वदन्येन न दृष्टपूर्वं यद्यपि
श्रीव्यासप्रसादात्सञ्जयेनापि भीष्मादिभिरन्यैरपि केश्विद्रूपं दृष्टं
तथापि यथार्जुनेन दृष्टं तथान्येन दृष्टमर्जुनस्येवान्यत्र भगवः
प्रसादस्यासत्त्वात् ४७

ऊसमवैजयन्तीटीका·

एवमर्जुनेन प्रार्थितो विश्वरूपमुपसंहरन् कृपापूर्णनेत्राभ्यामभ
यमिव मवलोकयन्नमुपलभ्य च यथा विस्मरेद्देवं तेन तमाश्वा
सयन् श्रीभगवानुवाच त्रिभिः मया प्रसन्नेनेति हे अर्जुन सुहृत्त्वा त्वत्कृ
पया तोऽतुष्टमिच्छामि ते रूपमित्यादि त्वत्प्रार्थनया प्रसन्नेन त्वद्विष
यकृपातिशयवता मया आत्मयोगात् आत्मनः स्वस्य योगात् सम
से कल्परूपयोगात् स्वसामर्थ्यादित्यर्थः परं सर्वोत्कृष्टमिदं रूपं वि
श्वरूपं तव त्वां दर्शितम् अतो भयं न स्मार्यं इत्यभिप्रायः परत्वं विवृणो
ति तेजोमयं तेजोराशिं विश्वं सर्वात्मभूतमनन्तं आदिमध्ययोरन्त
त उपलक्षणं आदिमध्यान्तरहितमित्यर्थः आद्यं सर्वस्यादिभूत
मीदृग्मम रूपं विश्वरूपं त्वया दृष्टं त्वदन्येन केनापि जनेन
दृष्टपूर्वं पूर्वं न दृष्टं यत्त्वन्मम ब्रह्मादिदेवानाम् अन्यैरपि देवादिभि
र्दृष्टं तदेतन्मम रूपं भक्तिदर्शं भक्ते त्वामृते निदर्शितं तन्मया
दृष्टस्य तस्य वहमातिकत्वाय देवाय देवादिभ्योपि भक्तिमन्यः प्र

+ एवमर्जुनेन प्रसादितो भयबाधितमर्जुनमुपलभ्योपसंहृत्य विश्वरूपमुचितेन वचनेन तमाश्वासयन् ॥

दर्शितं यच्चेहाखिलं जगत् भीमकर्त्तृयोधनादिभिर्दृष्टं तन्नेदमीदृशमि
ति त्वदन्येन न दृष्टपूर्वमित्युक्तं ४७ मधुसूदनी टीका ९

+श्रीभगवानुवाच हे अर्जुन मा भैषीः यतो मया प्रसन्नेन त्वद्विषयकृपातिशयवता
इदं विश्वरूपात्मकं परं श्रेष्ठं रूपं तव दर्शितमात्मयोगात् असा
धारणात् निजसामर्थ्यात् परं त्वं बिभेषीति तेजोमयं तेजः
प्रचुरं विश्वं समस्तमनन्तमाद्यं च यन्मम रूपं त्वदन्येन केनापि न
पूर्वं दृष्टपूर्वं न दृष्ट

४७ सदानन्दी टीका ११
एवं प्रसादितो विस्मृभीतं दृष्ट्वार्जुनं प्रियं उपसंहृत्य तद्रूपमाश्वा
सयन् भ १ मा भैषीस्त्वं यतः पार्थ प्रसन्नेन मया तव वि
श्वरूपात्मकं श्रेष्ठं दर्शितं करुणावशात् असाधारणसामर्थ्या
दात्मयोगाभिधात्परं तेजोमयं समस्तं यच्चाद्यमनन्तं विवर्जितं
त्वदन्येन न केनापि दृष्टपूर्वं कथंचन ४७
नीलकंठी टीका १२
एवमर्जुनेन प्रार्थितस्तं सान्त्वयन् भगवानुवाच मयेति त्रिभिः हे
अर्जुन प्रसन्नेन मया तव तुभ्यमिदं परं रूपं दर्शितं आत्मयोगात्
सामर्थ्यात् करुणया न तु त्वदर्शने त्वधिकारोऽस्ति तथा च माणुके
कर्मणि वाधिकारस्त्व इति तेजोमयं चिद्रूपं दिव्यं विश्वं विश्वात्मकं
आद्यं अनादिमनन्तं च यत् रूपं त्वदन्येन कदाचिदपि न पूर्वं दृष्ट
दृष्टपूर्वं ४७
आनंदी टीका
अथैवं प्रार्थितो भगवानुवाच ॥
आत्मयोगादैवात्म्यज्ञानोपदेशेन मथितः योगः तदपि च मम योग
स्तेनैव परमेश्वरप्रकारात् परमेश्वर्यं समं वहुमेतद्रूपं प्रकटीकृतम्

४७ ॥
रामकंठी टीका
एवं प्रार्थितः सन्तमाश्वासयन् ॥
अथैवं विपन्नं भगवानुवाच त्वद्बोधमेतत् किं त्वात्मयोगाद्दर्शित
मित्येतदेवं वोढुं मयर त्वयद्दपरेण मया त्वमात्मनि परस्मिन् स्वभाव
योगं समाधिं प्रापितस्तदैतद्रूपं तव प्रत्यक्षीकृतं

गी
टी॰ प॰

[illegible]

श्रीभगवानुवाच [illegible] लासिकी[illegible]टीका

हेअर्जुनमाभैषीः यतोमयाप्रसन्नेनसता इदंत्वदनुभूतंपरमुत्
कृष्टमैश्वरंरूपमात्मयोगात् आत्मनईश्वररूपस्ययोगसमाव
शप्राप्य त्वज्ञोपेपंचमीतवदर्शितम् दृष्टं तथात्वदात्मतया
प्रथकृं परत्वमेवाह तेजोमयंविश्वंविश्वात्मकत्वेपितेजोमयंवि
त्वकाशमयम् अनंतमपरिछिन्नम् आद्यंविश्वोत्मेषस्यकारण
भूतंयन्ममरूपंत्वदन्येनत्वादृशादन्येनपूर्वंनदृष्टं [illegible]
[illegible] ४७

पंचोलीटीका

अर्जुनंभीतमुपलभ्यविश्वरूपमुपसंहृत्यप्रियवचनेनआश्वा
सयन् श्रीभगवानुवाच मयेति हेअर्जुनमयाप्रसन्नेनइदंपरं
रूपंविश्वरूपंतेजोमयंतेजःप्रायंविश्वंसमस्तमनंतमंतरहितं
आदौभवमाद्यमात्मयोगात् आत्मपेश्वर्यसामर्थ्यात्दर्शितंयन्मे
यद्रूपंमेममत्वदन्येननदृष्टपूर्वं ४७

रणवीरसमिद्धोधिनी॥

अथभगवानर्जुनंसंभ्रांतमनसमाश्वासयन् विश्वरूपदर्शन
लक्षणंप्रसादमंगीकुर्वन्प्रत्युवाच मयेति अर्जुनेति संबोधनं
भृशचिंतनस्यसूचनार्थमिदानींत्वांप्रतिप्रसन्नेनमयेदंविश्वरूपा
ख्यंपरंरूपमात्मयोगादात्मनोयोगःसामर्थ्यंतस्माद्धेतोर्दर्शितं
कीदृशंतत्तेजोमयं तेजसप्राचुर्येण यद्वाततेजोमयमनंतमा
द्यमाद्यंतरहितं किंतदित्याह यन्मेइति यत्परंरूपंत्वत्तोन्येनब्र
ह्मादिनापिनदृष्टपूर्वं पूर्वंसर्गस्यादावंतेचनदृष्टं भगवदनुग्र
हपात्रत्वाभावादिति ४७॥

मधुभाष्य

४७॥

भाषा अनुवाद

भगवान श्रीकृस्न जब ऐसे प्रार्थना किये गये तब अर्जुन
को समभाते हूये तीनि श्लोक से यह कहने लगे कि हे अ
र्जुन तुम भय काहे लिये करते हो मै ने अति प्रसन्न होय
अपनी योग माया की सामर्थ्य से यह अपना अपूर्व उत्तम
रूप तुम को कृपा करि के देखाया है और इस तेजोमय
विश्वात्मक आदि अन्त रहित मेरे रूप को तुमारे समान भक्त
के बिना कसी और भक्तने कभी भी नंही देखा है ४७

चौपई

मैं प्रसन्न होय यह अर्जुन तोहि रूप दिखायो स्वयोग हूं सों
हिं तेजोमय विश्व अनंत रु आदि पूर्व न दृष्ट जो तें और न
रादि ४७ ॥

157

146

न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न
तपोभिरुग्रैः एवंरूपः शक्य अहं नृलो
के द्रष्टुं त्वदन्येन कुरुप्रवीर ४८

शाङ्करभाष्यटीका १

आत्मनो मम रूपदर्शनेन कृतार्थ एव त्वं संवृत्त इति स्तौ
ति न वेदेति न वेदयज्ञाध्ययनैर्न दानैश्चतुर्णामपि वेदा
नामध्ययनैर्यथावद्यज्ञाध्ययनैश्च वेदाध्ययनेनैव यज्ञाध्य
यनस्य सिद्धत्वात् पृथक् यज्ञाध्ययनग्रहणं यज्ञविज्ञानोपल
क्षणार्थं तथा न दानैः तुलापुरुषादिभिर्न च क्रियाभिरग्निहो
त्रादिभिः श्रौतादिभिर्नापि तपोभिरुग्रैश्चान्द्रायणादिभिरुग्रैः
घोरैः एवं रूपो यथा दर्शितं विश्वरूपं यस्य सोऽहमेवंरूपः
शक्योऽ न शक्यः अहं नृलोके मनुष्यलोके द्रष्टुं त्वदन्येन कुरुप्र
वीर ४८

आनन्दगिरिकृतटीका २

तद्रूपेण प्रकृतं दर्शनं प्रशंसयते वेदाध्ययनात् पृथक्
यज्ञाध्ययनग्रहणं पुनरुक्तेरयुक्तमित्याशङ्क्याह न वेदेति
न च वेदाध्ययनग्रहणादेव यज्ञविज्ञानमपि गृहीतमध्य
यनस्यार्थावबोधान्तत्वादिति वाच्यं तस्मात् तद्ग्रहणात्तत
या हेतोः साधितत्वादिति भावः श्लोकद्वयस्यार्थमसाधारणक
रणे त्वत्तोऽन्येन मदनुग्रहविहीनेनेति शेषः ४८

स्वामिकृतटीका ३

एतद्दर्शनमतिदुर्लभं लब्ध्वा त्वं कृतार्थोऽसीत्याह नवेदेति वे
दाध्ययनातिरेकेण यज्ञाध्ययनस्याभावात् यज्ञशब्देन यज्ञवि
द्याः कल्पसूत्रादिलक्ष्यन्ते वेदानां यज्ञविद्यानां चाध्ययनैरि
त्यर्थः न च दानैर्न च क्रियाभिरग्निहोत्रादिभिर्नैवोग्रैस्तपोभिश्चान्द्रा
यणादिभिः एवंरूपोऽहं त्वत्तोऽन्येन मनुष्यलोके द्रष्टुं शक्यः अ
पितु त्वमेव केवलं मत्प्रसादेन दृष्ट्वा कृतार्थोऽसीति ४८

पिशाचभाष्यटीका ४

१ श्री॰ गी॰ टी॰ ८ नुवेदयज्ञै[...]ध्ययनैर्यज्ञाध्ययनैः नवक्रियाभिःउग्रपरिचर्याभिः
४८

158

रामानुजभाष्यटीका॰ ५

अनन्यभक्तिव्यतिरिक्तैः सर्वैरप्युपायैर्यथावदवस्थितोहं द्रष्टुं
न शक्य इत्याह नवेदेति एवंरूपो यथावस्थितोहं मयि भक्तिम
तस्त्वत्तोन्येन एकांतभक्तिरहितेन केनापि पुरुषेण केवलवे
दयज्ञादिभिः द्रष्टुं न शक्यः ४८

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ४८

परमार्थप्रपाटीका॰ ७

अथास्य दुर्लभत्वमाह नवेदैरिति वेदाङ्गादयः एतावत्तमे
यादयः अध्ययनं शास्त्रपठनं तैः नापि तुलापुरुषादिदानैः
नच क्रियाभिः श्रौतस्मार्तकर्मभिः तपोभिः कृच्छ्रचान्द्रायणादि
भिः नृलोके मनुष्यलोके अर्जुन कर्मभूमौ त्वदन्येन द्रष्टुमशक्यः
कुरुप्रवीरेति निर्भयत्वेपि भयोत्पत्तिरयुक्तेति सूचितं ४८

वनमालीटीका॰ ८

एतद्रूपदर्शनात्मकमतिदुर्लभं मत्प्रसादेन लब्धमाकृतकृत्यत्वमसि
त्वमित्याह नेति वेदानामध्ययनैरक्षरग्रहणरूपैः तथा मीमांसा
कल्पसूत्रादिद्वारा यज्ञानां वेदबोधितकर्मणामध्ययनैरर्थविचा
ररूपैर्दानैस्तुलापुरुषादिभिः क्रियाभिरग्निहोत्रादिश्रौतकर्मभिः
तपोभिः कृच्छ्रचान्द्रायणादिभिरुग्रैः कायेन्द्रियशोषकत्वेनउग्र
रेवंरूपोहं न शक्यः नृलोके मनुष्यलोके द्रष्टुं त्वदन्येन एवंभूत
मत्प्रसादहीनेन हे कुरुप्रवीर शक्योहमिति वक्तव्ये विसर्गलो
पश्छांदसः प्रत्येकं नकाराभ्यासो निषेधदार्ढ्याय ४८

उत्तमवैजयन्तीटीका॰ ९

मद्भक्तिं विनान्यैः साधनैरीदृशो मत्प्रसादोतिदुर्लभ इति इतिव
दन्नस्यैश्वररूपस्य प्रमामर्थ्यतामाह नवेदयज्ञाध्ययनैरिति
वेदानां [...]नामध्ययनैः पदक्रमजटाघनाभ्यासरूपैर
क्षरग्रहणैः यज्ञानां वेदबोधितकर्मणामध्ययनैर्मीमांसाक
ल्पसूत्रादिद्वारा तदर्थविचाररूपैश्च न दानैः स्वेष्टभोग्यवस्तूनां
सम्यग्ब्राह्मणेभ्योर्पणैः न क्रियाभिरग्निहोत्रादिकर्मभिः न तपोभिः कृ

कृच्छ्रचान्द्रायणादिभिरुग्रैरिन्द्रियशोषकत्वेन दुष्करैर्भक्तिरिक्तैः केवलै
रेभिर्वेदाध्ययनादिभिः हे कुरुप्रवीर कुरुकुलश्रेष्ठ त्वदन्येन न यथा
साधनानुरागपेतारहितकेवलमहंकेन निष्ठो राजर्षिः कृत्यम्
तथात्वमपि मद्भक्तासीति सूचितम् त्वदन्येन मद्भक्तिशून्येनात्व
न्नोऽन्येन भक्तिरहितेन केनापि पुरुषेण न्लोके मनुष्यलोके द्र
ष्टुमुपलक्षणे लोकमात्रोणामित्येनेन स्वर्गलोकेऽप्येवं दर्शने दुर्ल
भम् देवाद्यप्यस्य रूपस्यातिसंदर्शनकांक्षिण इत्युक्तत्वात् मनुष्य
लोके त्वतिदुर्लभमिति सूचितं एवंरूपोऽहं द्रष्टुं न शक्यः शक्यो
हमिति वक्तव्ये विसर्गलोपश्छान्दसः प्रत्येकं नकाराभ्यासोऽति
षेधदार्ढ्यार्थश्चकारोऽनुक्तसाधनान्तरसमुच्चायकः ४८

मधुसूदनीटीका १

+ ईदृशमीदृक् मयैकबाहूरादियुक्तं त्वं न भयं कर्तुमनरूपं दृष्ट्वा
स्थितस्य तेन व्यथा व्यथाभयनिमित्तापीडा मा भूत् तथा
दृष्ट्वैवंविधं घोरं रूपं विमूढभावो व्याकुलचित्तत्वं च मा भूत्
कीदृशस्तु तम् किं तु व्यपेतभीरपगतभयः प्रीतमनाश्च सन्
तदेव चतुर्भुजं वासुदेवत्वादिविशिष्टं त्वया सदा दृष्ट
रूपं शंखचक्रगदापद्मधरं प्रपश्य किरीटादिगुणं
एकस्वरूपेण प्रपश्य वेदानां च यज्ञानामध्य

+ एतद्रूपदर्शनात्मकमतिदुर्लभं
मत्प्रसादलब्धात्कृतार्थ एवा
सि त्वमित्याह ॥

मां

ध्ययनैरर्थग्रहणरूपैः तथा मीमांसाकल्पसूत्रादिद्वारा यज्ञाना
वेदबोधितकर्मणामध्ययनैरर्थविचाररूपैर्वेदयज्ञाध्ययनै
र्दानैस्तुलापुरुषादिभिः क्रियाभिरग्निहोत्रादिश्रौतकर्मभिः
तपोभिः कृच्छ्रचान्द्रायणादिभिरुग्रैः कायेन्द्रियशोषकत्वेन दुः
करैः एवंरूपः अहं न शक्यः त्वल्लोके मनुष्यलोके द्रष्टुं त्वदन्ये
न मदनुग्रहहीनेन हे कुरुप्रवीर शक्योऽहमिति वक्तव्ये विस
र्गलोपश्छान्दसः प्रत्येकं नकाराभ्यासो निषेधदार्ढ्यार्थः च ।
क्रियाभिरित्यत्र चकारादनुक्तसाधनान्तरसमुच्चयः
४८

सदानंदीटीका ११

एतन्मद्रूपमैश्वर्यं प्रदर्शितं दुर्लभं कृतार्थोऽसि त्वमित्याह
न वेदयज्ञैरिति १ अध्ययनैर्वेदानां वेदार्थस्य विचार
णैः तुलापुरुषादिदानैः श्रौतकर्मभिरग्नि २ कृच्छ्रादिभि

२ श्री गी॰टी॰ प

स्तपोभिर्वाउग्रैर्देहशोषकैः एवंरूपोनशक्योहंत्वदन्येनम
हीतले १ द्रष्टुंकुरुकुलश्रेष्ठमदनुग्रहमंतरा ४८

नीलकंठीटीका॰ ५२

योगैकगम्यमेतत्कर्मिणांदुष्प्रापमित्याह नवेदेतिवेदानांयज्ञा
नांचअध्ययनैरधिगमैः नचदानैः नचक्रियाभिःश्रौतस्मार्ता
भिरापूर्तादिभिर्वापीकूपारामादिभिः तपोभिःकृच्छ्रचांद्राय॰
णाद्यैः उग्रैःमासोपवासाद्यैः नृलोकेएवंरूपोहंद्रष्टुंनशक्यः॰
रुत्वाभावश्चार्षः त्वदन्येनकुरुप्रवीर ४८

ज्ञानेश्वरीटीका॥ यस्त्वेवंविधमेनंयोगेनप्राप्तःसद्रष्टुमश
क्तोस्यस्वरूपस्येत्याह॥
शक्यग्रहमितिज्ञानस्समाधिः ४८

व्यतिरिक्तत्वेनास्यपारमेश्वरस्वरूप रामकंठीटीका स्यद्रष्टुमशक्यत्वादतएवाह॥
वेदानांयज्ञानांवअध्ययनात्वादधिगमवत्त्वमधिगमश्चाहेनवाध्ययन
श्रवणादयोरग्रगाः॰श्रुतिपादिताः दानक्रियातपश्चत्वैर्मन्दनुष्ठा
ने क्रियाशब्दश्चात्रश्रीयमानब्रह्मचर्यादिकर्मविशेषवाचकः
एतचैवंविधस्याचारव्यवस्थितेरपिपरज्ञानस्मृतत्वादशक्यद्रा
र्शनमेतत्परमंममरूपंमदनुग्रहादेवोन्मीलितदिव्यचक्षुषातया
दृष्टंतेनाभयमोहादीनांकोवसरः एतत्तमतत्स्वरूपमित्यानुसंधा
नावहितात्मनात्वयातदेवस्मर्तव्यमित्यभिप्रायः ४८

+ किंचकालरूपसंवलितस्यविश्वा
त्मकस्यदर्शनंमनुष्यलो
केशक्यमित्याह॥

यज्ञानां लासिकी धनपतीटीका
नवेदानांचतुर्णांयज्ञविद्यानांकल्पसूत्रादीनां अध्ययनैर्नचदा
नैर्नचक्रियाभिरग्निहोत्रादिभिः नचोग्रैःकायेन्द्रियशोषकत्वेनउग्र
रैस्तपोभिःकृच्छ्रचांद्रायणादिभि रेवंरूपःकालरूपसंवलितोहमी
श्वरोमनुष्यलोकेत्वदन्येनद्रष्टुंशक्यः अपितुत्वयैवतद्दर्शनेमाकुं
ठकुरुप्रवीरेतिसामर्थ्यसूचकसंबोधनम् अत्रोदिमवधाः परिच्छिन्न
भयानकवस्तुदर्शनादेवमहत्वादाशांकजन्यत्वात् स्त्रत्रीभाववान्न
तत्कोऽपिनःकथास्पदर्शनस्य शक्योहमितिवक्तव्येविसर्गलोपश्चा
न्दसः आर्षः ४८॥ ति

पंचोलीटीका

एतद्दर्शनमतिदुर्लभं लब्धवांस्त्वं कृतार्थोऽसीति स्तुवन्नाह नवेदे-
ति हे कुरुप्रवीर अहं नृलोके मनुष्यलोके एवं पूर्वं दर्शितरूपस्त्वद
न्येन द्रष्टुं न शक्यः न वेदयज्ञाध्ययनैः चतुर्णामपि वेदयज्ञाध्ययनै :
यद्वा वेदानां यज्ञविद्यानां कल्पसूत्रादीनां चाध्ययनैः न च क्रियाभि :
र्न दानैस्तपोभिरुग्रैर्घोरैस्तपोभिश्चान्द्रायणादिभिरहं द्रष्टुं न शक्यः
४८

रणवीरसमिद्धोधिनी

किंच कुरुप्रवीरेति कुरुषु मध्ये प्रकर्षेण वीरो विक्रान्तो यस्तस्य
संबोधनं अहं नृलोके मनुष्यलोके एवंरूप एवंप्रकाशित वि
श्वरूपोऽहं द्रष्टुं साक्षात्कर्तुं लक्षयितुं त्वदन्येन त्वत्तोऽन्येनाभक्ते
न न शक्य इति ननु ये हि वेदादिकारिणो वेदाभ्यासं कुर्वन्ति यज्ञांश्च त
दीयैरेव मंत्रब्राह्मणैः प्रतिपादयन्ति तदध्ययनं च चतुर्वर्गफलसा
धनत्वावगमात् कुर्वन्तीति वेदाध्ययनस्य मोक्षं प्रति साधनत्वं सूचि
तमिति तथा च ये दानशीला दानैरेवात्मानं संभावयन्तः सुकृतं कर्म
कुर्वन्ति तेच फलसाधनत्वावधारणात् धनं दानसात्कुर्वन्तीति
दानशीलस्यापि मोक्षं प्रत्यधिकारित्वं सूचितमिति एतत्स्वरूपाभिर्वे
दाध्ययनपूर्वकयज्ञदानक्रियाभिस्तथोग्रैस्तपोभिर्घोरैः कर्मभिश्च
किं नैवंरूपो द्रष्टुं शक्योऽपि तु प्रकाश एवेति किमनेन यन्मे त्वदन्येन
न द्रष्टुं सर्वैः शक्यः केनेत्याशंक्याह नवेदेति एवंरूपो विश्वरूपोऽहं न वे
दैर्नापि यज्ञदानादिभिः क्रियाभिर्द्रष्टुं शक्यो भगवद्भक्तेरभावादि-
ति भावः ४८॥

मधुभाष्य

४८॥

भाषा अनुवाद

और यह अति दुर्लभ दर्शन पायके तुम अब कृतार्थ भये
हो सोई कहते हैं कि न वेद अध्ययन सेन यज्ञ अध्ययन
करके यज्ञविद्या जो कल्पसूत्र आदि कर्म्मकाण्ड के ग्रंथ संग्र
ह किये ग्रन्थ तिन से अर्थात् न यज्ञविद्या ध्यायन से और
दानैः न:से न अग्निहोत्र आदि क्रियो से न चान्द्रायण आदि उग्र क
है कठिन तपस्यों के द्वारा यह मेरा रूप नरलोक मे देख
ने के शक्य है सो हे कुरुप्रवीर अर्जुन तुम को छोड़ि और
कोई नही नृलोक मे इस रूप को देखशका है सो तुम मे
रे अनुग्रह से इस मेरे रूप का दर्शन करि अपने को कृता
र्थ भये जानो ४८

चौपई

वेद न यज्ञ पठन दानहि सोहे क्रिया किये तप उग्रहि जो
हे मैं नरलोक न पाको यह रूपहि कुरुप्रवीर तोहि अ
न्य न दर्शहि ४८॥

मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोर
मीदृङ्ममेदं व्यपेतभीः प्रीतमनाः पुनस्त्वं
तदेव मे रूपमिदं प्रपश्य ४९

शाङ्करभाष्यटीका १

मा ते व्यथेति मा ते व्यथा मा भूत् ते भयं मा च विमूढभावः विमूढ
चित्तता दृष्ट्वोपलभ्य रूपं घोरमीदृक् यथादर्शितं ममेदं व्यपे
तभीर्विगतभयः प्रीतमनाश्च सन् पुनर्भूयस्त्वं तदेव चतुर्भुजं रू
पं शङ्खचक्रगदाधरं तवेष्टं रूपमिदं प्रपश्य ४९

आनन्दगिरिकृतटीका २

विश्वरूपदर्शनमेवं कृत्वा यद्यस्माद्दृश्यमानाद्बिभेषि तर्हि तदु
पसंहरामीत्याह मा ते व्यथेति वक्तृत्वमनुभूतत्वमभिप्रेत्य
तदेव मत्के इदमिति ४९

स्वामिकृतटीका ३

एवमपि चेत् त्वमिदं घोरं रूपं दृष्ट्वा व्यथा भवति तर्हि तदेव रूपं
दर्शयामीत्याह मा ते इति ईदृक् ईदृशं घोरं रूपं दृष्ट्वा ते व्यथा
मास्तु विमूढभावो विमूढत्वं च मास्तु व्यपगतभयः प्रीतमना
श्च सन् पुनस्त्वं तदेवेदं मम रूपं प्रपश्य प्रकर्षेण पश्य ४९

॥ पिशाचभाष्यटीका ४ ॥

स्पष्टार्थम् ४९ ॥

रामानुजभाष्यटीकाम् ५

मा ते इति ईदृशघोररूपदर्शनेन ते या व्यथा यश्च विमूढभावो
वर्तते तदुभयं माभूत् त्वयाभ्यस्तपूर्वमेव सौम्यरूपं दर्शयामि
तदेव मम रूपं पश्य ४९

॥ अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थम् ४९ ॥

परमार्थप्रपाटीका ७

अत एवाह मा ते व्यथेति ईदृग्घोरं भयानकं मे रूपं दृष्ट्वा ते व्यथा
भयं त्वं [illegible] विमूढभावो भ्रान्तत्वं मास्तु अतः परं व्यपेतभीः प्रीत
मनाः सन् तदेव पूर्वानुभूतं पुनः प्रपश्य ४९

वनमालीटीका ८

१ श्री.
गी. टी.
प

162

इदं घोरमीदृगनेकबाह्वादियुक्तत्वेनातिभयंकरं मम रूपं दृ-
ष्ट्वा स्थितस्य ते तव या व्यथा भयनिमित्ता पीडा सा माभूत् तथा म-
द्रूपदर्शनेपि यो विमूढभावो व्याकुलचित्तत्वमपरितोषाख्यः
ताभः सोपि माभूत् किंतु व्यपेतभीरपगतभयः प्रीतमना प्रस-
न्नचित्तस्त्वं तदेव चतुर्भुजं वा सदेवाख्यं त्वया सदानुभूतं रूपं प्र-
पश्य भयराहित्येन संतोषेण च प्रपश्य ४९

गनमवैजयन्तीटीका ९

द्रौपद्याः प्रधर्षणे वीक्षापितृसीमेव स्थिता ये सर्वे धर्मज्ञा अपि
भीष्मादयस्तेन दुर्धर्षेण प्रकुपितेन मयैव हन्तव्या न तत्त्वतत्रिहन्तने
न कोपि भारोऽस्तीति बोधयितुं मयेदमतिघोरं जगत्संहारस्वरूप-
दर्शितं यच्चेतदृष्ट्वा तव व्यथासीत्तर्हि तदेव चतुर्भुजं रूपं त्वं पश्य
सादृश्यमानं व्यथेति मेदमीदृक् सहस्रबाहुशीर्षकादिप्रकार-
कं घोरमतिभयंकरं रूपं दृष्ट्वा मा ते तव व्यथा तद्दर्शनजभय-
निमित्तपीडा जाता सा मा मा भूत् च पुनर्यत्त्वद्दर्शनेन विमूढ-
भावो व्याकुलचित्तत्वेनापरितोषस्सोपि माभूत् व्यपेतभीः नि-
र्भयः प्रीतमनाः प्रसन्नचित्तस्सन् त्वं पुनर्भूयो मे मम तदेव स्व-
स्यावस्थिभूतं द्विभुजं चतुर्भुजं वा रूपं विग्रहमिदं प्रपश्य प्रकर्षेणाति-
हर्षेणावलोकय ४९

मधुसूदनीटीका १०

एवं त्वदनुग्रहार्थं मयाविर्भूतेन
रूपेणानेन चेत्त्वं मोहं गतस्तर्हि

इदं घोरमीदृक् अनेकबाह्वादियुक्तत्वेन भयंकरं मम रूपं दृष्ट्वा
स्थितस्य ते तव [illegible] व्यथा भयनिमित्ता पीडा सा माभूत् तथा म-
द्रूपदर्शनेपि यो विमूढभावो व्याकुलचित्तत्वमपरितोषः सो-
पि माभूत् किंतु व्यपेतभीरपगतभयः प्रीतमनाश्च सन् पुन-
स्त्वं तदेव चतुर्भुजं वा सदेवत्वादि विशिष्टं त्वया सदापूर्वं दृष्टरू-
पमिदं विश्वरूपोपसंहारेण प्रकटी क्रियमाणं प्रपश्य प्रकर्षे-
णभयराहित्येन संतोषेण च प्रपश्य ४९

सदानंदीटीका ११

मा ते भयनिमित्ते ये पीडाभून्मा विमूढता इदं घोरं मद्रूप-
मीदृक् अतिभयंकरं । दृष्ट्वा सर्वात्मकं नानाकारयुक्तं ममेश्व-

रे निर्भयो भव प्रीतात्मा पुनस्त्वं पश्य मद्वपुः तदेव वदनं शरा
मं च तत्र वाऽज्ञि श्रियोज्ज्वले ४९

नीलकंठीटीका ५२

इदमतिदुर्लभदर्शनं रूपं दृष्ट्वापि चेद्व्यथसे तर्हि उपसंह
रामीदमित्याशयेनाह मा त इति मम ईदृक् ईदृक् घोरं रूपं
दृष्ट्वा ते तव व्यथा माभूदिति शेषः विमूढभावो मोहश्च ते
माभूत् व्यपेतभीः निर्भयः प्रीतमनाश्च पुनस्त्वं भूत्वा तदेव
यत्त्वया दृष्टं प्रार्थितं मे मम इदं रूपं प्रपश्य ४९

ज्ञानंदीटीका स्पष्टार्थं

४९

रामकंठीटीका

घोरं कालपुरुषाख्याकृतियोगादुग्रं संहारकर्मत्वाच्छिष्टं स्पष्टम् ४९

लालकी[illegible]टीका

ममेश्वरस्य रूपमीदृग्विश्वात्मकमिदं तद्दृष्टं ते घोरं कालपुरुषा
कृतियोगादुग्रं करं दृष्ट्वा मत्तस्त्वव्यथा भयं मास्तु विमूढभावो मो
हेन स्तब्धता च मास्तु भयंकरदर्शने हि वीरस्यापि व्यथा स्तब्धता योग्य
तया भवत्येव विगतभयः प्रीतमना स्तब्धाभावेन प्रसन्नचेतास्त्वं पुनः
तदेवैश्वरस्वरूपदर्शनात्प्राग्दृष्टं चतुर्भुजत्वादिलक्षणमिदं परिच्छिन्नं वै
नेदं तत्त्वया पुरो भासमानं मे श्रीकृष्णस्य रूपं प्रपश्य सम्यक्तमापि सं
स्कारमवधूय द्रष्टुमर्हो भव [illegible] ४९

पंचोलीटीका

यदा एवमिदं घोरं रूपं दृष्ट्वा ते व्यथा जायते तर्हि तदेव प्रागनुभू
तं रूपं दर्शयामीत्याह मा ते व्यथेति हे अर्जुन मम इदानीं ईदृक्
रूपं घोरं दृष्ट्वा ते तव व्यथा भयं माभून्मा च विमूढचित्तता भू
त् व्यपेतभीः विगतभयः प्रीतमनाः पुनस्त्वं तदेव चतुर्भुजं शंख
चक्रगदापद्मधरं तवेष्टं मे मम इदं रूपं प्रपश्य ४९

गीतार्थसमसिद्धबोधिनी॥

इदानीमेतादृग्घोररूपदर्शनेन मा भूत्ते व्यथेत्याह मा ते इ
ति ममेदं दृश्यमानं घोरं विश्वाकारं रूपमीदृग्यदादिजन
कं मया दर्शितं संप्रति दृष्ट्वा ते व्यथा भयं चलनं वा मास्तु अ
थवा विमूढभावश्च मूर्छितत्वमपि मास्तु किं तर्हि पुनर्भू
य एव अस्तु गेदं रूपं तदेव तत्रैवैव पश्य साक्षात्कुरु तत्र
त्वा च प्रीतमनाः सं स्वरूपस्य हर्षजनकत्वाद् तदेव व्यपीतभी
र्भव संत्यक्तशोकमोहो भवेति वरदानन्तरं शो भगवदनुग्र
हः सिद्ध इति ४९॥

मध्वभाष्य

४९

भाषा अनुवाद

जो ऐसा घोर भयानक रूप देखि तुम को क्लेश होता है
तो जिसमे तुमे मेरा रूप देखि व्यथा औ मूढ़ता न होय
इस से अब तुम विगतभय प्रसन्नचित्त होय फेरि हमा
रा सोई वह पूर्व रूप जो देखा चाहते हौ सो देखौ ४९

चौपई

ना तोहि व्यथा न मूढ़ता होई॥ घोर रूप मोहि देषे सोइ भय
कर विगत हर्ष मन होउ फिर देवरूप मोहि देषहु सोउ
४९॥

संजय उवाच इत्यर्जुनं वासुदेवस्तथोक्त्वा स्व
कं रूपं दर्शयामास भूयः आश्वासयामास
च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा ५०

शांकरभाष्यटीका १

इत्यर्जुनमिति इत्येवमर्जुनं प्रति वासुदेवस्तथाभूतं वचनमु
क्त्वा स्वकं वसुदेवगृहे जातं रूपं दर्शयामास दर्शितवान् भूयः
पुनराश्वासयामास चाश्वासितवान् भीतमेनं भूत्वा पुनः सौम्य
वपुः प्रसन्नदेहो महात्मा ५०

आनन्दगिरिकृतटीका २

प्रसन्नरूपयोग्यत्वं तदिदं वृत्तं राज्ञे सूतो निवेदितवानित्याह संज
य इति तथाभूतं वचनं मया प्रसन्नेनेत्यादि वचनं चतुर्भुजं रूपं किं त
स्य रूपस्य परिचितपूर्वस्य ^ प्रसन्नदेहत्वेन चार्जुनं प्रत्याश्वासनं ^प्रदर्शनेन^
च^ भगवतो युक्तमित्यत्र हेतुमाह महात्मेति ५०

स्वामिकृतटीका ३

एवमुक्त्वा प्राकृतमेव रूपं दर्शितवानिति संजय उवाच इतीति श्री
वासुदेवोऽर्जुनमेवमुक्त्वा यथा रूपमासीत् तथा किरीटादियुक्तं च
तुर्भुजं रूपं पुनर्दर्शयामास एवमर्जुनं भीतमेनं प्रसन्नवपुर्भूत्वा पु
नराश्वासितवान् महात्मा विश्वरूपः कृपालुरिति वा ५०

पैशाचभाष्यटीका ४ ॥ ॥

स्पष्टार्थः संजय ^उवाच^ ५०

रामानुजभाष्यटीका ५

संजय उवाच इतीति एवं पाण्डुतनयं वासुदेवस्तूक्त्वा भूयः स्व
कीयमेव चतुर्भुजं रूपं दर्शयामास अपरिचितरूपदर्शनेन भीत
मेनं पुनरपि परिचितसौम्यवपुर्भूत्वाश्वासयामास च महात्मा सत्य
संकल्पः सर्वेश्वरस्य परमपुरुषस्य परब्रह्मणो जगदुपकृतिम
र्त्यस्य वसुदेवसूनोश्चतुर्भुजमेव स्वकीयं रूपं कंसभीतवसुदेवप्रा
र्थितेन कंसवधात् पूर्वं भुजद्वयमुपसंहृतं पश्चादाविष्कृतं च जा
तोऽसि देवदेवेश शङ्खचक्रगदाधर दिव्यं रूपमिदं देव प्रसादेनोप
संहर उपसंहर सर्वात्मन् रूपमेतच्चतुर्भुजमिति हि प्रार्थितः पिशु

श्री॰ गी॰ टी॰ ११

पालस्यापि द्विषतोऽनवरतभावनाविषयं चतुर्भुजमेव वसुदेवसू-
नोरूपमुदारपीवरचतुर्बाहुं शंखचक्रगदाधरमिति अतः पार्थेनानेनै-
वरूपेण चतुर्भुजेनेत्युच्यते ५

स्पष्टार्थम् ५

अभिनवगुप्तकृतटीका ८

165

परमार्थप्रपाटीका ७

पुनः संजय इति इत्युक्त्वा प्रकारं वासुदेव उक्त्वा स्वकं रूपं चतुर्भु-
जं दर्शयामास ५

वनमालीटीका ८

वासुदेवोऽर्जुनं तथेत्युक्त्वा स्तवनं क्रियते प्रकाश्यत इति स्वकं कृ-
ष्णरूपं विश्वरूपं ज्ञानतो स्तवनं प्रकाशयति एतद्रूपं ज्ञानतो वि-
श्वरूपं स्तवनं प्रकाशयति रूपेण परापरत्वं चाधिकारिणमपेक्ष्य
भगवद्रूपे भूतारतम्याभावात् यद्वा स्वकं स्वकीयमर्जुनीयं सद-
र्जनमैव्यं शंखचक्रगदादियुक्तं दर्शयामास भूयः आश्वासयामा-
स च भीतमेनमर्जुनं भूत्वा पुनः पूर्ववत् सौम्यवपुरनुग्रहशरीरः
महात्मा परमकारुणिकः सर्वेश्वरः सर्वज्ञ इत्यादिकल्याणगुणाकरः ५

ऊनमवेनयनीटीका ९

एवमपरिचितरूपदर्शनेन व्याकुलचित्तमर्जुनमुक्त्वा भगवांस्त-
त्परिचितमेव स्वकं रूपं तं दर्शितवानिति सञ्जयो धृतराष्ट्रमुवाच
इत्यर्जुनमिति वासुदेवो वसुदेवपुत्र इत्येवमर्जुनमुक्त्वा तथा
स्वयं कल्पेनैव विश्वरूपदर्शिनं बालयैव भूयः पुनरपि स्वकं मेघ-
श्याममपीताम्बरधरं किरीटकुण्डलकटकांगदकौस्तुभहारकटिसू-
त्रनूपुराद्यनेकभूषणभूषितं शंखचक्रगदापद्मोपशोभितमपुं-
डरीकनयनं स्मयमानमुखो भुजे निजं रूपं चतुर्भुजविग्रहं
दर्शयामास पुनः सौम्यवपुरतिकारुण्यापवात्मस्य शान्तिकामा-
दिगुणयुक्तशरीरो भूत्वा महात्मा सुदारमनाश्वसनेन भगवतः
स्वयं न स्थितिमप्रवृत्तिकत्वेपि भक्ताधीनविग्रहत्वं सूचितं भीतं
अपरिचितघोराकारदर्शनेन भययुक्तमेनमर्जुनमाश्वासया-
मित्रम मास हे पार्थ त्वं ममासि मतस्त्वं भयेनालं स्वसारथिमामवलोक-
येत्यादिनमेव वचनेनाश्वासितवान् चकारेण सर्वेश्वरस्य भगव-
तोऽयं प्रतीहर्षीक्रियातस्य विजयस्य विजयो भविष्यतीति ब्रह्मा-
दयः कृताः सर्वेस्तनापवेसहं मन्ये त्वमपि ममाप्यसीति

द्योतितम् ५०

मधुसूदनीटीका १०

वासुदेवोर्जुनमितिपाशुक्त्वा स्वकायथापूर्वमासीत् तथाख
केयूरकिरीटमकरकुंडलगदाचक्रादियुक्तं चतुर्भुजं श्री
वत्सकौस्तुभवनमालापीतांबरादिशोभितं दर्शयामासभू
यः पुनः आश्वासयामास च भीतमर्जुनमेनंभूत्वा पुनः पूर्ववद्
ह सौम्यवपुरनुग्रशरीरः महात्मा परमकारुणिकः सर्वेश्वरःस
र्वज्ञ इत्यादिकल्याणगुणाकरः ५०

का० महानंदीटीका ११

इत्येवमर्जुनेप्रोक्तवकीयं दूपमीश्वरः किरीटिनं गदाशंखच
क्रादियुतमद्भुतं चतुर्भुजं च श्रीवत्सकौस्तुभप्रभयान्वितं १
वनमालापरीतांगं हारकेयूरशोभितं २ पीतांबरधरंस
र्वसौंदर्यरसवारिधिं दर्शयामासभीतं तं भूत्वासौम्यवपु
र्हरिः पुनराश्वासयामासपूर्ववत्करुणाकरः सर्वज्ञः सर्व
शक्तिश्चकल्याणगुणसागरः ५०

नीलकंठीटीका १२

संजयउवाच इतीति वासुदेवः अर्जुनंप्रति इति पूर्वोक्तरी
त्याउक्त्वा यथा पूर्वमासीत्तथा स्वकं मानुषरूपंभूयः पुनर्दर्शि
यामास यदर्जुनेन प्रार्थितं चतुर्भुजं धारणाविषयं रूपं तद
पितिरोहितं यथेत्यर्थः तथा महात्मा व्यापकोपि सन्सौम्यव
ह० पुरनुग्रदेहोभूत्वा भीतं पनं आश्वासयामासच ५०

श्रानंदीटीका स्पष्टार्थं

अथैतद्भुतरार्ष्ट्रंप्रतिसंजय
उवाच ५०

रामकंठीटीका

अथैतद्भुतराष्ट्रायसंजयउवाच किंतु महात्माविश्वरूपः सन्सौ
म्यवपुः पुनः मांन्नुन ष्टहर्षविग्रहात्मदर्शनाकृतिर्भूत्वाभगवाने
नमर्जुनं तथाविधाद्भुतदर्शनसंचमत्कृतं च समाश्वासेन प्रत्याश्वा
सयदितितात्पर्यं ५०

श्री
गी टी॰
प

संजयउवाच

लासिकी [illegible]टीका

एवं वासुदेव उक्त्वा अर्जुनं यथा पूर्वं दृष्टं तथा स्वकं रूपं किरीटादि
युक्तं भूयो दर्शयामास एवं तेन प्रभुणा अर्जुनस्तत्र एव तस्मिन् भ
गवांस्तत्र प्रयोजकोभूदित्यर्थः समहात्मा विश्वरूपः श्रीकृष्णः
कालरूपोपसंहारेण समाप्य संस्कारनिरस्तेन च सौम्यवपुः स
दर्शितनिर्भूता एनं भीतं अर्जुनं पुनर्वंदमागोन प्रकारेणाश्वा
सयामास च सांत्वयामास च [illegible] ५०

पंचोलीटीका

एवमुक्त्वा प्रोक्तं तमेव रूपं दर्शितवानिति संजयउवाच इत्य
र्जुनमिति वासुदेवः अर्जुनं तथेति तथाभूतं वचनमुक्त्वा भूयः
पुनरपि स्वकं रूपं वसुदेवगृहे जातं दर्शयामास च पुनः महा
त्मा पुनः सौम्यवपुर्भूत्वा एनं भूतमाश्वासयामास ५०

रणवीरसमिहोधिनी॥

एतदेव वृत्तांतं धृतराष्ट्रं प्रति संजयउवाच इत्यर्जुनमि
ति स्पष्टार्थः ५०॥

मधुभाष्य

५०॥

भाषा अनुवाद

ऐसे वचन कहि कर भगवान ने अर्जुन को वही पूर्वरूप अपना देखाया यह सञ्जय धृतराष्ट्र से कहते हैं कि महात्मा वासुदेव श्रीकृष्णजी ने अर्जुन को सोई चतुर्भुज किरीटधारी अपना शान्त स्वरूप फेरि देखाया और डरे भये अर्जुन को आश्वास दिया ५०

चौपई

वासुदेव कहि नरको ऐसे फिर निजरूप दिखायो तैसें
त्रस्तभए कहुं करी आश्वासा भय पुन सौम्य रूप जगवासा
५०॥

167

160

अर्जुनउवाच दृष्ट्वेदंमानुषंरूपंतवसौम्यंजना
र्दन इदानीमस्मिसंवृत्तःसचेताःप्रकृतिंगतः
५१

शांकरभाष्यटीका १

दृष्ट्वेदमिति दृष्ट्वेदं मानुषं रूपं मत्सखं प्रसन्नं भव सौम्यं
जनार्दनेत्यर्दतेर्गतिकर्मणः स्वराणां देवप्रतिपक्षजनानां प्रा
णवियोगजरतनुकार्यप्रयोजनेन सर्वैर्जनैर्याच्यतइति वा राम
चिन्त्याज्जनार्दनः अभ्युदयनिःश्रेयसपुरुषार्थाय इदानीमधु
नास्मि संवृत्तः संजातः सचेताः किंप्रसन्नचित्तः प्रकृतिं स्वभावं
गतश्चास्मि ५१

आनंदगिरिकृतटीका २

एवं भगवताश्वासितः सन्नर्जुनस्तं प्रत्युक्तवानित्याह अर्जुनइ
ति ५१

स्वामिकृतटीका ३

ततोनिर्भयःसन् अर्जुनउवाच दृष्ट्वेदमिति सचेताःप्रसन्नचि
त्तः इदानींसंवृत्तोजातोस्मि प्रकृतिंस्वास्थ्यंचप्राप्तोस्मि शेषंस्पष्टं
स्वकृतस्यानुग्रहस्यातिदुर्लभत्वंदर्शयन् ५१

पिशाचभाष्यटीका ४

अर्जुनउवाच दृष्ट्वेदमिति इदंपरंप्राप्तिकारणं ५१

रामानुजभाष्यटीका ५

अर्जुनउवाच दृष्ट्वेति अनवधिकातिशयसौंदर्यसौकुमार्य
लावण्यादियुक्तेन स्वेनासाधारणेन मनुष्यत्वसंस्थानसंस्थितमति
सौम्यमिदंरूपंदृष्ट्वा इदानींसचेताः संवृत्तोस्मिप्रकृतिंगतश्च ५१

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् ५१

परमार्थप्रपाठीटीका ७

पुनरर्जुनः प्राह दृष्ट्वेदमिति मानुषमनुष्येईदृग्योग्यं सचेताः
प्रसन्नचित्तः संवृत्तोजातोस्मिप्रकृतिंस्वास्थ्यंचगतोस्मि ५१

वनमालीटीका ८

इदानींसचेताभयकृत[illegible]व्यामोहाभावेनाव्याकुलचित्तःसं

१

श्री॰ गी॰ टी॰ ५

वृत्तोस्मि तथाप्रकृतभयकृतव्यथाराहित्येन स्वास्थ्यंगतोस्मिस्प
ष्टमन्यत् ॥५१

क्रस्मवैनपत्नीटीका ४

भगवतस्सौम्यरूपादर्शनान्नदाश्यामनाद्वृनिर्भयःशांतचित्तःस
न्नर्जुनउवाच दृष्ट्वेदमिति हेजनार्दनेत्यनेन संडष्टजनात् हत्वा
स्वजनान्नस्मान्नतिष्ठस्येवेतिसूचितम् तवविश्वरूपस्यानंतवि
भूतिपतेःसर्वेश्वरस्येदंमनेत्रविषयभूतंसौम्यंतिरवधिकाति
शयसौंदर्यसौकुमार्यसौहार्दसौगन्ध्यसौस्पर्शसौशीलसौरस्य
लावण्यमनोज्ञादिगुणविशिष्टमानुषंमानुष्यवत्संस्थानस्थितं
रूपंदेहंहदृष्ट्वेदानीमहंसचेताःप्रसन्नचित्तःभयकृतव्यामोहाभा
वेनाव्याकुलचित्तइत्यर्थः संवृत्तोस्मिजातोस्मि तथाप्रकृतिंगतः

॰त भयकृतव्यथाराहित्येन स्वास्थ्यंप्राप्तोस्मि एवंमयाप्रसन्नेनातवा
र्जुनेनेदंनवेदयज्ञाध्ययनैरित्यादिना भगवान्स्वस्यविश्वविग्रहस्य दुर्दर्शत्वं
त्वमुक्तमधुनास्वस्य दुर्दर्शत्वंसुदुर्दर्शमिदमित्यादिना मत्कर्मकृदित्यनेन स्वक
स्यमानुषविग्रहस्यापि सुदुर्दर्शत्वं दर्शयन् ॥५१

मधुसूदनीटीका ६

ततोनिर्भयःसन्— इदानींसचेताः भयकृतव्यामोहाभावेनाव्याकुलचित्तःसंवृत्तो
स्मि तथाप्रकृतिंभयकृतव्यथाराहित्येन स्वास्थ्यंगतोस्मि स्पष्टम
मन्यत् ॥५१

सदानंदीटीका॰ ११

ततोसौनिर्भयोभूत्वावाक्यमाहार्जुनोहरिं दृष्ट्वेदंसौम्यरूपंतेवा
सुदेवाभिधंपरं । इदानींनिर्भयोभूत्वास्वास्थ्यंप्राप्यात्मनागतः ॥५१

नीलकंठीटीका॰ १२

ततोनिर्भयःसन्नर्जुनउवाच दृष्ट्वेति सचेताश्चाव्याकुलः प्रकृतिं
गतःस्वास्थ्यंप्राप्तः संवृत्तोजातोस्मि ॥५१

आनंदीटीका स्पष्टार्थः

ततोनिर्भयःसन्नर्जुनउ
वाच ॥५१

रामकंठीटीका॥ एवंप्रत्यागतप्रकृतिरर्जुनउ
वाच— स्पष्टमेतत् ॥५१ ॥५१

१६८

लासिकी दसगमीटीका

ततः सम्यग्व्यक्तितोऽर्जुन
उवाच हे जनार्दन हे देव उरः स्फुरत्सौम्यं सुदर्शनं मानुषं रूपं तव दृष्ट्वा इदानीं व्युत्क्रा
न्त्याने प्रकृतिं स्वस्वभावं जीववद्रूपं गतः प्राप्तः सन् सचेता अन्तःकरणान्
वितोऽहं संवृत्तः संपन्नः [illegible] ५१

पंचोलीटीका

ततो निवर्त्यमानभयोऽर्जुन उवाच दृष्ट्वेदमिति हे जनार्दन तवे
दं सौम्यं मानुषं रूपं दृष्ट्वा इदानीमधुना सचेताः प्रसन्नचित्तः संवृत्तः
संजातः प्रकृतिं स्वभावं गतः प्राप्तोऽस्मि ५१

रणवीरसमिद्बोधिनी॥

एवं भगवतोऽत्यद्भुतं रूपं दृष्ट्वा जाताह्लादोऽर्जुन उवाच दृष्ट्वेदमि
ति अयजनार्दनेति संबोधनमनिष्टनिवृत्तीष्टप्राप्तिसाधनत्वा
त्तवेदं मानुषं मनुष्यावतारकं सौम्यमाह्लादकं स्वरूपं दृष्ट्वेदानी
मेव संवृत्तः स्वयमेव प्रवृत्तः स्वयमस्यैव भगवद्भक्तिमूलस्य मोक्षं
प्रतिसाधनत्वावधारणादित्येतादृशोऽहं सचेताः। बोध्यते स्वभा
वोऽनेनेति चेतः स्वभावसंवित्तेन सह वर्तते इति तत्संवित्त्यैव प्र^
कृतिं सहजतां गतः संप्राप्तः स्वस्वभाव इति यावदिति ५१॥

मधुभाष्य

५१॥

169

भाषा अनुवाद

तिसके अनन्तर निर्भय होय अर्जुन ने कहा कि हे जनार्द
न तुमारा यह शान्त मनुष्य स्वरूप देखि मै अब प्रसन्नचित
औ साव धान भया हौं ५१

दोहा

मनुज रूप यह देखके सौम्य जनार्दन तोर स्वधर्मस्थित
अब मैं भयो स्वाभावक चितमोर ५१

श्रीभगवानुवाच सुदुर्दर्शमिदं रूपं दृष्टवा
नसि यन्मम देवा अप्यस्य रूपस्य नित्यं दर्श
नकाङ्क्षिणः ५२

शाङ्करभाष्यटीका १

सुदुर्दर्शमिति सुदुर्दर्शं सुष्ठु दुःखेन दर्शनमस्येति सुदुर्दर्श
मिदं रूपं दृष्टवानसि यन्मम देवा अप्यस्य मम रूपस्य नि
त्यं सर्वदा दर्शनकाङ्क्षिणो दर्शनेप्सवोऽपि न त्वमिव दृष्टवन्तो न
द्रक्ष्यन्ति चेत्यभिप्रायः ५२

आनन्दगिरिकृतटीका २

उपास्यत्वाय विश्वरूपं स्तौति भगवदुक्तिं उत्थापयति भग
वानिति त्वद्यतिरिक्तानामिदं रूपं द्रष्टुमशक्यमित्येतद्विशद
यति देवादय इति ५२

स्वामिकृतटीका ३

यन्मे विश्वरूपं दृष्टवानसि तत्सुदुर्दर्शमन्यैर्द्रष्टुमशक्यमतो दे
वा अप्यस्य रूपस्य दर्शनमिच्छन्ति केवलं न पुनरिदं पश्यंति ५२

पिशाचभाष्यटीका ४

स्पष्टार्थः ५२ ॥ ॥ ॥

रामानुजभाष्यटीका ५

श्रीभगवानुवाच सुदुर्दर्शमिति ममेदं सर्वस्य प्रशासनेऽवस्थि
तं सर्वाश्रयं सर्वकारणभूतं यत् दृष्टवानसि तत् सुदुर्दर्शं न
केनापि द्रष्टुं शक्यं अस्य रूपस्य देवा अपि नित्यं दर्शनकाङ्क्षिणः
न तु दृष्टवन्तः ५२

अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् ५२

परमार्थप्रपाटीका ७

पुनर्भगवान् सुदुर्दर्शमत्यन्तदुःखेनापि द्रष्टुमशक्यं मम रूपं य
दृष्टवानसि अस्य रूपस्य देवा अपि नित्यं दर्शनमिच्छन्ति मनोरथ
मात्रं कुर्वन्ति परंतु न प्राप्नुवंति ५२

वनमालीटीका ८

स्वकृतस्यानुग्रहस्यातिदुर्लभत्वं दर्शयति त्रिभिः सममयद्रू
पमिदानीं त्वं दृष्टवानसि इदं विश्वरूपं सुदुर्दर्शं अन्यैर्द्रष्टुमशक्य

श्री० १
गी०टी०
८

ते यन्नो देवा अप्यस्य रूपस्य नित्यं सर्वदा दर्शनकाङ्क्षिणो न तु त्वमि-
व पूर्वं दृष्टवन्तो न वा अग्रे द्रक्ष्यन्तीत्यभिप्रायः दर्शनकाङ्क्षायां नित्यत्वो-
क्तेः ५२

हनुमद्वैजयन्तीटीका ९

श्रीभगवानुवाच सुदुर्दर्शमिदमिति मम सर्वविश्वप्रशासनेऽ-
वस्थितस्य सर्वाश्रयस्य सर्वकारणभूतस्य यद्रूपं विश्वरूपद-
र्शनात्मकं त्वं दृष्टवानसि तदेवेदमिदानीं तव रूपं यदुकुलोद्भ-
वदेवकीपुत्रं मनुष्याकारविग्रहं सुदुर्दर्शनकेनापि दृष्टुं शक्यं
विश्वरूपं दुर्दर्शमिदं तु सुदुर्दर्शमिति विशेषः अस्य सुदुर्दर्श-
त्वमेवाह देवा इति अस्य मनुष्यत्वसंस्थानावस्थितस्य रूपस्य देवा
अपि ब्रह्मादयोऽपि नित्यमनवरतं दर्शनकाङ्क्षिणः स्वनेन तु दृष्टव-
न्तः अयं भावः यथा भगवतो मम विश्वविग्रहस्य लोकेऽवलोकनं सूर्या-
दीनां क्रूरत्वभयंकरत्वादीनां च गुणानां ख्यापनं परमैश्वर्याय-
मिति यथाऽऽत्मनेन देवैरपि न ज्ञातो मनुष्यत्वलोकाकथा तथा कृष्ण-
रूपे मनुष्यविग्रहेऽपि सौन्दर्यलावण्यबलपौरुषचतुर्य्यादिभि-
र्गुणैः पशुचारणपरदाररमणवधूनवनीतचौर्यभयपलायन-
त्वत्वास्त्रयष्टिबन्धादिकर्मभिश्चाहमीश्वरत्वं याथात्म्येन ब्रह्म-
दयोऽपि न जानन्तीति तरेकिं सुबकस्य मनोमदनुग्रहेणैव सुदर्श-
मन्यथाहं सुदुर्दर्शमिति ५२

मधुसूदनीटीका १३

सुकृतस्यानुग्रहस्याति दुर्लभत्वं दर्शयन् चतु- भिः श्रीभगवानुवाच — मम यद्रूपमिदानीं त्वं दृष्टवानसि इदं विश्वरूपं सुदुर्दर्शमत्यन्त-
दृष्टुमशक्यं यतो देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः सर्वदा
न तु त्वमिव पूर्वं दृष्टवन्तः न वा अग्रे द्रक्ष्यन्तीत्यभिप्रायः दर्शना-
काङ्क्षायां नित्यत्वोक्तेः [illegible]
[illegible] ५२

सदानन्दटीका ११

स्वकृतस्य प्रसादस्य दुर्लभत्वं प्रदर्शयन् उवाच भगवानेव
स्वभावस्य जयं प्रति १ विश्वरूपं मदीयं यत्त्वमिदं दृष्टवानसि
तदस्मेत्तमशक्यं हि दृष्टं देववरैरपि २ देवास्तद्दृष्टुमिच्छन्ति नि-
त्यं सात्त्विका अपि न तु त्वमिव पूर्वं ते दृष्टवन्तः कदाचन न वै-
वाग्रेऽपि द्रक्ष्यन्ति श्रीहरेरयमाशयः ५२

नीलकंठीटीका ५२

अस्य विश्वरूपदर्शनस्य दौर्लभ्यं दर्शयन् श्रीभगवानुवाच
सुदुर्दर्शमिति दर्शनकांक्षिणः दर्शनेकांक्षंतेएव न तु लभं-
ते ५२

अस्य रूपस्य दुर्लभदर्शनतां व्याख्याय श्रा[illegible]टीटीका न् श्रीभगवानुवाच॥

देवाब्रह्मादयोपितन्नतागादिसाधिकारश्चघविन्नतयापरमस्यैव
स्वभावः [illegible] ५२

अर्जुनाश्वासायभगवानुवाच॥ रामकंठीटीका

निगदव्याख्यातप्रायमेतत् यतः स्वर्गादितन्नत्वाधिकारश्चघवि-
न्नवारपरान्स्वभावात्मनोस्योदेवा अप्यस्य रूपस्य सदासाता-
कारमभिकांक्षंतिनतु लभंते ५२॥

नासिकी [illegible]टीका॥ स्वकृतस्यानुग्रहस्यातिदुर्लभत्वं
दर्शयन् दृष्टवानसीत्युक्तवान् अस्मात्स्वम[illegible] ५२॥

पंचोलीटीका

स्वकृतस्यानुग्रहस्यातिदुर्लभत्वंदर्शयन् श्रीभगवानुवाच
सुदुर्दर्शमिति हेअर्जुनममइदंरूपंसुदुर्दर्शंसुष्ठुअतीवदुर्दर्शं
यत्दृष्टवानसिदेवाअपिअस्यरूपस्यनित्यंनिरंतरंदर्शनकां-
क्षिणोभवंति ५२

[illegible]वीरसामिद्धांथिनी॥

अथभगवानर्जुनंप्रतिनराख्याख्यासमथितमाह सुदुर्दर्शमिति
गतार्थमेतच्छ्लोकद्वयं ५२॥

मधुभाष्य

५२॥

172

भाषा अनुवाद

तिसके बादि भगवान अपनी कृपा की दुर्लभता देखाव
ते हैं कि जो यह हमारा विश्वरूप स्वरूप तुम ने देखा
इस का दर्शन अति दुर्लभ है देखो देवतागण भी इस रू
प के दर्शन की इच्छा सर्वदा करते हैं परन्तु इसका दर्श
न नहीं पावते हैं ५२

दोहा

दुर्लभअतिशयरूपयहजोममदेख्यातेहूं सुरअभिलाषी
दर्शकेनित्ययाहिरूपकेपहुं ५२॥

173

नाहं वेदैर्न तपसा न दानेन न चेज्यया श
क्य एवंविधो द्रष्टुं दृष्टवानसि यन्मम ५३

शांकरभाष्यटीका १

कस्मात् नाहमिति नाहं वेदैः ऋग्यजुःसामाथर्ववेदैश्चतु
र्भिरपि न तपसोग्रेण चान्द्रायणादिना न दानेन गोभूहिरण्या
दिना न चेज्यया यज्ञेन पूजया वा शक्य एवं विधो यथा दर्शि
तप्रकारोद्रष्टुमसि यथा शक्यो दृष्टवानसि मां यथा त्वं ५३

आनन्दगिरिकृतटीका २

दर्शनोपायाभावात् दुर्दर्शत्वमिति शङ्कते कस्मादिति वेदादिषूपा
येषु सत्स्वपि भगवानुक्तरूपेण शक्यो द्रष्टुमित्याह नाहमिति त
र्हि दर्शनायोग्यत्वात् द्रष्टुमशक्यत्वमित्याशंक्याह दृष्टवानिति ५३

स्वामिकृतटीका ३

तत्र हेतुर्नाहमिति स्पष्टार्थः ५३

पिशाचभाष्यटीका ४ ॥ ॥

॥ स्पष्टार्थम् ५३

रामानुजभाष्यटीका ५

नाहमितिभक्त्येति वेदैः अध्यापनप्रवचनाध्ययनश्रवणजपवि
षयैर्यागदानहोमतपोभिश्च मद्भक्तिविरहितैः केवलैर्यथावदव
स्थितोहं द्रष्टुमशक्यः ५३

अभिनवगुप्तकृतटीका ६

नमो नमस्तु मनेनपीनःपुण्यंभक्त्यातिशयाविष्कारार्थं यदेव भग
वन्नातिक्रान्ताध्यायैरभ्यायासस्वस्वरूपं तदेवार्जुनःप्रमत्तोपलभ
विषयापन्नस्तोत्रद्वारेण प्रकटयतीति तत्र्यान्येनकेवलंयोनक
त्वप्रसंगायेति विरम्यते ५३

परमार्थप्रपाटीका ७

नाहं वेदैरिति गतार्थः [illegible]
[illegible] ५३

वनमालीटीका ८

कस्माद्देवा अपि न रूपं न दृष्टवंतो न वा दृश्यंतीति मदीयतादृशानुग्रह
शून्यत्वादित्याह न वेदयज्ञाध्ययनैरित्यादिना गतार्थः श्लोकः परम
दुर्लभत्वोपपादनाय यत्नः ५३

श्री॰
गी॰टी॰

आनमवैजयन्तीटीका ८

यथा मम विश्वरूपं भक्तिहीनैः पुरुषैर्वेदाध्ययनादिभिः साधनै
र्दर्शं तथा मनुष्यरूपमपीत्याह नाहं वेदैरिति यथा त्वं मानु
षरूपं मां दृष्टवानसि तथैवंविधो वसुदेवसूनुर्हि भुजस्यान
र्भजो वा तत्सारथिरहं मद्भक्तिशून्यैः कैश्चिदपि पुरुषैर्वेदाध्य
नादिभिरपि साधनैर्द्रष्टुं न शक्यः ५३

कस्माद्देवा एतद्रूपं नद्र
ष्टवंतो न वा ये द्रक्ष्यंति मद्भ
क्तिशून्यत्वादित्याह॥

मधुसूदनीटीका ९

न वेदयज्ञाध्ययनैरित्यादिना गतार्थोऽयं श्लोकः परमदुर्लभत्व
ख्यापनाय पुनरभ्यस्तः [illegible] ५३

सदानंदीटीका ११

कुत एतन्न देवा अपि दृष्टवंतो न वा पुनः द्रक्ष्यंतीति भूयस्त्वं मद्भ
क्तियोगमलभमाना १ न येषां सामर्थ्यमानतेन ज्ञाधिकारिणः
वेदैरधीतैस्तपसा दानैर्यज्ञैरहं हरिः २ द्रष्टुमेवंविधो नास्मि
शक्यो दृष्टो यथा त्वया ३ ५३

नीलकंठीटीका १२

नाहमिति न वेदयज्ञाध्ययनैरित्यनेनोक्तस्यैवार्थः पुनरुच्यते
विश्वरूपदर्शनस्यातिदौर्लभ्यसूचनाय स्पष्टार्थश्च श्लोकः ५३

आनंदीटीका, स्पष्टार्थम् ५३ अत्रोपायमाह॥

रामकंठीटीका

ततः सततं रामवैणाकेन विदुष्करदर्शनमेतद्यत्त्वया मत्प्रसादाविर्भू
तपरत्वानवत्वकार दृष्टमतो यथा मां त्वं ततः साक्षात्कृतवांस्तथा दाना
दिक्रियामकैर्द्रष्टुमशक्यो [illegible]

लासिकी [illegible]टीका

तत्रहेतुः॥ स्पष्टोऽर्थः [illegible] ५३ ॥ ॥

पंचोलीटीका

नाहमिति नवैदैः ऋग्यजुःसामाथर्वभिः तपसोग्रेणचंद्रायणा
दिनानदानेनदानेनगोभूहिरण्यादिनानचेज्ययायज्ञेनअश्वमेधा
दिनाएवंविधोद्रष्टुंनशक्यः यथात्वंमांदृष्टवानसि ५३

रणवीरसमिद्धोधिनी॥

स्पष्टार्थः ५३॥

मधुभाष्य

५३॥

125

169

भाषा अनुवाद

उस अपने रूप के दुर्लभ दर्शन मे कारण कहते हैं कि
तुम ने जो रूप मेरा देखा वह वेद अध्ययन औ तपस्या
या दान यज्ञ के द्वारा किसी को देखने की सामर्थ्य नहीं है ५२

दोहा

नाभे तपयज्ञदान सें वेदहि से पुनपढ़ु यह विध देष न
पाकर हों जिहविध देषातेहु ५३॥

176/

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ५४

शाङ्करभाष्यटीका १

कथं पुनः शक्य इत्युच्यते भक्त्येति भक्त्या तु किं विशिष्टयेत्याह अ
नन्यया अपृथग्भूतया भगवतोऽन्यत्र पृथक् न कदाचिदपि
भवति सा त्वनन्या भक्तिः सर्वैरपि करणैर्वासुदेवादन्यन्न लभ्यते
यया सानन्या भक्तिस्तया शक्योऽहमेवंविधो विश्वरूपप्रकारो हे
अर्जुन ज्ञातुं शास्त्रतो न केवलं ज्ञातुं शास्त्रतो द्रष्टुं च साक्षात्क
र्तुं तत्त्वेन तत्त्वतः प्रवेष्टुं च मोक्षं च गन्तुं परंतप ५४

आनंदगिरिकृतटीका २

केनोपायेन तर्हि द्रष्टुं शक्यो भगवानिति पृच्छति कथमिति शा
स्त्रीयज्ञानद्वारा तद्दर्शने सफले सिध्यतीत्याह उच्यत इति न भक्ति
मात्रं तत्र हेतुरिति न शास्त्रार्थं स्फुटयति किमित्यादिना अनन्यभ
क्तिमेव व्यनक्ति सर्वैरिति ५४

स्वामिकृतटीका ३

केनोपायेन तर्हि त्वं द्रष्टुं शक्य इति तत्राह भक्त्येति अनन्यया मदेकनि
ष्ठया भक्त्या त्वेवंभूतो विश्वरूपोऽहं तत्त्वेन परमार्थतो ज्ञातुं शक्यः शा
स्त्रतो द्रष्टुं च प्रत्यक्षतः प्रवेष्टुं च तादात्म्येन शक्यो नान्यैरुपायैः ५४

॥ पिशाचभाष्यटीका ४ ॥

स्पष्टार्थम् ५४

रामानुजभाष्यटीका ५

अनन्यया भक्त्या तत्त्वतः शास्त्रैर्ज्ञातुं तत्त्वतः साक्षात्कर्तुं तत्त्वतः प्रवेष्टुं
च शक्यः तथा च श्रुतिः नायमात्मा प्रवचनेन लभ्यो न मेधया न बहु
ना श्रुतेन यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वा
मिति ५४

॥ अभिनवगुप्तकृतटी ६ ॥

स्पष्टार्थं ५४

किंतु हेऽर्जुन एवंविधोऽहमनन्य परमार्थप्रपाटीका ७ यद्यभिचारिण्या भक्त्या तत्त्वेन ज्ञा
तुं शक्यस्ततः द्रष्टुं प्र[illegible]स्यततः प्रवेष्टुं तादात्म्येन शक्यः नान्यथा ५४

वनमालाटीका ८

वेदतपोदानेज्यादिभिर्द्रष्टुमशक्यस्त्वं तर्हि केनोपायेन द्रष्टुं शक्योऽसीत

१ श्री· गी·टी· ५

तुशब्दो भक्त्येति साधनान्तरव्यावृत्त्यर्थस्तुशब्दः भक्त्यैवानन्यया मदेक
निष्ठयामवैतन मनस्त्वानन्दपूर्वकाविच्छिन्नप्रेमप्रवाहरूपया एवंविधो
दिव्यानन्तनिरतिशयैश्वर्यविशिष्टविश्वरूपवानहं शास्त्रतो ज्ञातुं श
क्य अहमिति च्छान्दसो विसर्गलोपः न केवलं परोक्षतो ज्ञातुं शक्योऽपि
तु तत्त्वेन द्रष्टुं च प्रत्यक्षतो भक्तिपूर्वकवेदान्तश्रवणमनननिदिध्यास
नादिभिरनन्तगुणालयोऽहं तैस्तैर्विश्वरूपाद्यनेकरूपवान् स्वयोग्य
तानुसारेण ... तथा साक्षात्कर्तुं शक्यः प्रवेष्टुं मत्साक्षात्कारानन्त
रमज्ञानतत्कार्यनिवृत्तिविशेषाविद्यातत्कार्ययुक्तेन प्रवेष्टुं शक्यः प्रवेशो
हि भगवत्सायुज्यादिकेन लोकप्रवेशः सायुज्यादिरूपसंश्लेषविशे
षप्रवर्तामवेशः ५४

अथ सर्ववैजयन्तीटीका· ५

ननु यदि वेदतपोदानेज्यादिभिः साधनैस्त्वमशक्यस्तर्हि केनोपाये
न द्रष्टुं शक्योऽसीति चेत्तत्राह भक्त्या त्वनन्ययेति तु शब्दः साधनान्त
रनिरासार्थकः हे ऽर्जुन यथाविधाकृतिरहं भक्त्यैव द्रष्टुं शक्यो ना
न्यैरुपायैस्तथैवंविधोऽनन्ताकारस्थानस्तुतोऽहमनन्यया ऽव्यभिचा
रिण्या देवान्तरोपासनरहितया भक्त्या साध्यसाधनरूपया परयाऽपि
शक्यः किं केवलं शक्योऽसीत्यपेक्षायामाह ज्ञातुमिति वेदान्तादिशास्त्रे
ण तत्त्वेन याथात्म्यस्वरूपगुणादिकत्वेन ज्ञातुं वोद्धुं च पुनस्तत्त्वेन द
ष्टुं साक्षात्कर्तुं च तत्त्वेन प्रवेष्टुं मद्भावापत्तिलक्षणं मोक्षं प्राप्तुं श
क्यो नान्यैरुपायैरित्यर्थः नायमात्मा प्रवचनेन लभ्यो न मेधया न ब
हुना श्रुतेन यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनूं स्वा
मित्यादिश्रुतेरप्यैकार्थ्यत्वात् परन्तपेति संबोधनेन मद्भक्तिरहिता
नां साधनकदम्बात्मकशत्रुनाशकत्वमेवास्मिन्नास्यः इति सूचितम् ५४

मधुसूदनीटीका ९

यदि वेदतपोदानेज्याभिर्द्रष्टुमशक्यस्त्वं तर्हि केनोपायेन द्रष्टुं शक्योऽसीत्यत आह
साधनान्तरव्यावृत्त्यर्थस्तुशब्दः भक्त्यैवाऽनन्यया मदेकनिष्ठया नि र
तिशयप्रीत्या एवंविधो विश्वरूपधरोऽहं ज्ञातुं शक्यः शास्त्रतः हे अर्जुन
शक्य अहमिति च्छान्दसो विसर्गलोपः पूर्ववत् न केवलं शास्त्रतो ज्ञातुं
शक्यः अनन्यया भक्त्या किं तु तत्त्वेन द्रष्टुं च स्वरूपेण साक्षात्कर्तुं च श
क्यो वेदान्तवाक्यश्रवणमनननिदिध्यासनपरिपाकेन ततः चित्स्वरू
पसाक्षात्कारादविद्यातत्कार्यनिवृत्तौ तत्त्वेन प्रवेष्टुं च मद्रूपतयैवाप्ते
वाहं शक्यः हे परन्तप अज्ञानशत्रुमर्दने निःप्रवेशयोग्यतां सूचयति

न्नायप्रुंज्ञीकृत्योच्यते ५४

सदानंदीटीका ११

यदिद्रष्टुमशक्यस्त्वंतपोवेदाध्ययनादिभिः केनोपायेनतर्हिद्रष्टुं
शक्योसिचेतिचेत् १ साधनांतरमाहभक्त्येतिशह्नोवोध्यउत्तमैः म
देकनिष्ठयाप्रेमभक्त्यैवाहंमहेश्वरः २ दिव्यरूपधरोज्ञातुंशक्यः
शास्त्रानुयोगतमैः साक्षात्कर्तुंस्वरूपेणवेदवाक्योपपत्तिया श
क्यश्चास्मिसदाप्रेमभक्त्यैवाराधितोजनैः साक्षात्कारादविद्यानका
र्यहानाभावनावतः ४ मत्स्वरूपनयैवाप्नेशक्योहंहेपरंतप अन
न्ययैवभक्त्यात्वसदाभीमाश्रयास्तेन ५४

नीलकंठीटीका १२

कथंतर्हिद्रष्टुंशक्यस्त्वमतआह भक्त्येति भक्त्याआराधनेन अन
न्ययाअव्यभिचारितयाअवेउद्वेषर्थः अहंएवंविधोज्ञातुंशक्यः
वेदार्थशोधकशास्त्रतः द्रष्टुंशक्योध्यानतः तत्त्वेनयाथात्म्येन
प्रवेष्टुंशक्यस्त्वमसिवाक्यार्थज्ञानतः हेपर[illegible]ज्ञानप्राप्तेना
पयतीतिपरंतपः ५४ २०

आनंदीटीका स्पष्टार्थः

[illegible] ५४ ॥

रामकंठीटीका

केनतर्ह्युपायेनशक्योसीत्याह ॥

भक्त्यामदेकविषयेपरदेवमार्गाभिज्ञातेनसतलभयापरिचर्ययातत्व
भावादेवाविर्भूतेनसम्यग्ज्ञानत्वाद्विधमानमत्प्रतिबिंबमजनीयवि
षयत्वेनमयाज्ञातुमविसंवादिनावगमेनवोद्धुंतथासम्यग्ज्ञान
लक्षणेनोपायेनद्रष्टुंगोचरीकर्तुंतथातत्वेनपरिशीलनाभ्या
सातिशयात्मवेष्टुमात्मतयावगाढुमेवंविधोयथान्नयानुभवतः प्र
काहंनान्येनकेनाप्युपायेनस्वपरस्यास्वरूपस्यसाक्षात्दर्शनात्वेष्टापर्यंता
परांभूमिमधिरूढस्तेनइत्यरहैतमोहमायागताज्ञानीशः समाश्वसिहि
ऊतस्त्ववेदानीमदृष्टपरमार्थजनोचितैर्भयादिदोषैः संबंधस्यार्थः १८

[illegible] ५४ ॥

लासिकी [illegible]टीका

नन्वेवंचेत्केनोपायेनतर्हिद्रष्टुंशक्यइति तत्राह ॥

अनन्ययामद्व्यातिरिक्तयाकांक्षणी रहितयाभक्त्या प्रेमातिशय
युक्तेनोपासनेन एवंविधस्त्वदनुभूतोविश्वात्मकोहंतत्त्वमभिज्ञा
तुम् द्रष्टुंसाक्षात्कर्तुंप्रवेष्टुमात्मतयावगाहितुंचशक्यः नान्येहपाये :
तरवधारणोसाधनांतरव्यावृत्त्यर्थः [illegible] ५४

पंचोलीटीका

केनोपायेनतर्हिद्रष्टुंशक्यइतितत्राह भक्त्येतिहेअर्जुनतुश
नः अहमेवंविधोअनन्ययाभक्त्यानविद्यतेअन्यउपाधिर्यस्यास्ता
तयाअनन्ययाभक्त्यासर्वैरपिकरणैर्वासुदेवादन्योपलभ्यते
तत्त्वेनतत्त्वतः याथात्म्येनद्रष्टुंशक्यः चपुनः अन्यत्शास्त्रेणोज्ञातुं
द्रष्टुंपरमेश्वरेणऐक्यंगंतुं हेपरंतपअहंशक्यः ५४

रणवीरसमिंहोद्योतिनी ॥

भक्त्येति हेअर्जुन भक्त्यावहयमाणोयज्ञादिभ्योविशिष्टपदप्रा
प्तिसाधकत्वद्योतकः अनन्ययाद्योतस्यविशिष्टयाभक्त्याथदद्रु
तकर्मणोममद्रष्टः श्रवणकीर्तनध्यानात्मिकयाअस्तु
यादृगेव श्रवणादिकमनोज्ञातंतद्दृक्द्रष्टुंतत्त्वेनपरमार्थ
देवनाप्रवेष्टुंचभक्तेनशक्योनतवन्यथा यज्ञसाध्यस्वर्ग
कामेष्टयेतिभावः ५४ ॥

मधुभाष्य

५८॥

भाष्य अनुवाद

जो कै सि कौन उपाय से आप दर्शन दे शकते हो जो यह कहो तो कहते हैं कि हे अर्जुन अनन्य करके मद्देकविन भक्ति ही के द्वारा ऐसे विश्वरूप से हम प्रगट होशकते हैं और वह भक्त भी हमे जानि शके है और हे परन्तप अर्जुन शास्त्र से प्रमत्त भी तत्त्वात्म रूप प्रवेश अर्थात् उस रूप मे लीन हम कराय श कते हैं और कोई भी उपाय नही है ५४

दोहा

अनन्य भक्तिकर पाकर में अर्जुन यादि वियान जानन देखन
तत्वसें प्रवेश परंतप जान ॥ ५४

श्री
गी टी॰
प॰

अनन्यया मद्व्यतिरिक्तया कांक्षणी रहितया भक्त्या प्रेमातिशय
युक्तेनोपासनेन एवंविधस्त्वन्मूर्तो विश्वात्मकोऽहं ज्ञातं प्रत्यभिज्ञा
तम् द्रष्टुं साक्षात्कर्तुं प्रवेष्टुं मात्मतयाऽवगाढुं च शक्यः नान्येनोपाये :
नरवधारणे मापनेतरव्याहृत्यर्थः [illegible] ५४

पंचोलीटीका

केनोपायेन तर्हि द्रष्टुं शक्य इति तत्राह भक्त्येति हे अर्जुन त्वं तु श
नः अहमेवंविधो अनन्यया भक्त्या न विद्यते अन्य उपाधिर्यस्यास्
तया अनन्यया भक्त्या सर्वैरपि करणैर्वासुदेवादन्यो नोपलभ्यते
तत्त्वेन तत्त्वतः याथात्म्येन द्रष्टुं शक्यः च पुनः अन्यत् शास्त्रेणोज्ञातं
द्रष्टुं परमेश्वरेण एकांगं तं हे परंतप अहं शक्यः ५४

गणवीरसमिद्धेयिनी॥

भक्त्येति हे अर्जुन भक्त्या न तु यागहोमयज्ञादिभ्यो विशिष्टपदप्रा
प्तिसाधकत्वयोतकः अनन्यया योऽनन्यनिष्ठया भक्त्या यदि तदु
त कर्मणो मम मद्धेः श्रवणकीर्तनध्यानात्मिकया शुश्रूष
यादृमेव श्रवणादिकमनोज्ञातं तं दष्टुं द्रष्टुं तत्त्वेन परमार्थ
हेतुनाप्रवेष्टुं च भक्तेन प्रकारान्तरेणापि यज्ञसाध्यस्वर्ग
कामेष्टयेतिभावः ५४॥

मधुभाष

५८॥

भाष्य अनुवाद

जो पूछो कि कौन उपाय से आप दर्शन दे शकते हो जो यह कहो तो कहते हैं कि हे अर्जुन अनन्य करके मदेकचित्त भक्ति होके द्वारा ऐसे विश्वरूप से हम प्रगट होशकते हैं और वह भक्त भी हमें जानि शके है और हे परन्तप अर्जुन शास्त्र से प्रमत भी तत्वात्म रूप प्रवेश अर्थात् उस रूप मे लीन हम कराय शकते हैं और कोई भी उपाय नही है ५४

दोहा

अनन्य भक्ति कर शक्य मैं अर्जुन यादि विधान जानन देषन
तत्व सें प्रवेश परंतप जान ।। ५४

179

मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ५५
इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मवि
द्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे वि
श्वरूपदर्शनो नामैकादशोऽध्यायः ११

शाङ्करभाष्यटीका १

अधुना सर्वस्य गीताशास्त्रस्य सारभूतोऽर्थो निःश्रेयसार्थोऽनुष्ठे
यत्वेन समुच्चित्योच्यते मत्कर्मकृदिति मत्कर्मकृत् मदर्थं क
र्म मत्कर्म तत् करोतीति मत्कर्मकृत् मत्परमः करोति भृ
त्यः स्वामिकर्म न त्वात्मनः परमा प्रेत्य गन्तव्या गतिरिति स्वा
मिनं प्रतिपद्यते अयन्तु मत्कर्मकृन्मामेव परमां गतिं प्रति
पद्यते इति मत्परमोऽहं परमः परा गतिर्यस्य सोऽयं मत्परमः
तथा मद्भक्तः मामेव सर्वप्रकारैः सर्वात्मना सर्वोत्साहेन भजत
इति मद्भक्तः सङ्गवर्जितः धनमित्रपुत्रकलत्रबन्धुवर्गेषु स
ङ्गवर्जितः सङ्गः प्रीतिः स्नेहवर्जितो निर्वैरो निर्गतवैरः शत्रुः स
र्वभूतेषु शत्रुभावरहितः आत्मनोऽत्यन्तापकारप्रवृत्तेष्वपि
य ईदृशो मद्भक्तः स मामेत्यहमेव तस्य परा गतिर्नान्या कदाचि
द्भवतीति ५५ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां यो
गशास्त्रे श्रीशाङ्करभाष्यटीकायां एकादशोऽध्यायः ११ ॥

२२ आनन्दगिरिकृतटीका १

भक्त्या त्विति विशेषणादस्येषा महत्त्वमाशंक्याह अधुनेति स
मुच्चित्य संक्षिप्य पुञ्जीकृत्येति यावत् मत्कर्मकृदित्युक्ते मत्प
रमत्वे आर्थिके इति पुनरुक्तिरित्याशंक्याह करोतीति भग
वानेव परमा गतिरिति निश्चयवत्त्वेऽपि न निष्ठा सिध्यतीत्याह
तथेति तत्रैव सर्वप्रकारैर्भजनं धनादिस्नेहात्कष्टत्वादित्याशं
क्याह सङ्गेति द्वेषपूर्वकानिष्टाचरणं वैरं अनपकारिषु तद्भावे
पि भवत्येवापकारिष्विति शङ्कितेत्याह आत्मन इति एतच्च सर्वं ५५
संक्षिप्यानुष्ठानार्थमुक्तमेव मन्तव्यमिति स्तुतो भगवता प्रागभिरव
स्याविनीत्युपसंहरति अयमिति तदेवं भगवतो विश्वरूपस्य

त्यादि॰

श्री· गी·टी· ५

सर्वात्मनः सर्वज्ञस्य सर्वेश्वरस्य मत्कर्मकृदित्यनेन क्रममुक्तिफलमभिध्यानमभिवदता तमेव वाक्यार्थोऽवस्थापितः ५५ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रे श्रानंदगिरिकृटीकायामेकादशोध्यायः ११

स्वामिकृतटीका ३

टी॰ अतःसर्वशास्त्रसारंपरमरहस्यंसम्यगुपदिशति मत्कर्मकृदिति मदर्थंकर्मकरोतीति मत्कर्मकृत् अहमेवपरमःपुरुषार्थोयस्यसः ममैवभक्तिमाश्रितःपुत्रादिषुसंगवर्जितः निर्वैरश्चसर्वभूतेषुएवंभूतोयःसमांप्राप्नोतिनान्यइति ५५ दैवैरपिसुदुर्दर्शंतपोदानादिकोटिभिः भक्तायभगवानेवंविश्वरूपमदर्शयत्॥ इतिश्रीभगवद्गीतासुबोधिन्यांटीकायांविश्वरूपदर्शनंनामैकादशोध्यायः ११

पैशाचभाष्यटीका ४

अहंवासुदेवःपरमेप्रधानेयस्यसमत्परमः ५५ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेपैशाचभाष्यटीकायामेकादशोध्यायः ११

रामानुजभाष्यटीका ५

मत्स्तुतिवेदाध्ययनादीनिसर्वाणिमदाराधनरूपाणीतियःकरोतिसमत्कर्मकृत् मत्परमः सर्वेषामारंभाणामहमेवोद्देश्योयस्यसमत्परमः अत्यर्थमत्प्रियत्वेनमत्कीर्तनस्तुतिध्यानार्चनप्रणामादिभिर्विनात्मधारणमलभमानोमदेकप्रयोजनतया सततंतानिकरोतिसमद्भक्तः संगवर्जितःमदेकप्रियत्वेनेतरसंगमसहमानः निर्वैरःसर्वभूतेषुमत्संश्लेषवियोगैकदुःखः
टे॰ स्वदुःखेस्वापराधनिमित्तत्वानुसंधानात सर्वभूतानांपरमपुरुषपरतंत्रत्वानुसंधानाच्चसर्वभूतेषुवैरनिमित्ताभावात्तेषुनिर्वैरः यएवंभूतःसमामेतिमांयथावदवस्थितंप्राप्नोतिनिरस्ताविद्याद्यशेषदोषगंधोमदेकानुभवोभवतीत्यर्थः ५५ इतिश्रीमद्भगवद्गीतारामानुजाचार्यविरचितश्रीमद्भगवद्गीताभाष्यटीकायामेकादशोध्यायः ११ मि॰

अभिनवगुप्तकृतटीका ६

सकलोपसंहारेणपरमप्रशांतरूपोब्रह्मतत्त्वस्थितिंददातीति उपसंहारेभगवतःसौम्यताप्रदर्श्यमानात्यंतरमणीयायेषां

१८०

भक्तिः परिपोषकरीति तेषां वासुदेवं सर्वमित्यादिपूर्वाभि
हितोपदेशाच्च मत्कारणाद्विश्वात्मके वासुदेवतत्त्वमयत्नतप
ववोधपदवीमवतरतीति शिवम् ५५ शुद्धाशुद्धविमिश्रो
पेशविदैकप्रकाशनात् भूर्भुवःस्वस्वयंपश्यन्स्वमतेन स
मोमुनिः पष्ठोऽत्र संग्रहः इति श्रीमदाचार्याभिनवगुप्तवि
रचिते श्रीभगवद्गीतार्थसंग्रहे एकादशोऽध्यायः ११

परमार्थप्रपाटीका ७

अमुमर्थं स्पष्टयति मत्कर्मकृदिति मदर्थं कर्म करोती
ति मत्कर्मकृत् अहमेव परमः पुरुषार्थो यस्य स मत्परमः मद्भक्तो
महाश्रितः पुत्रकलत्रादिसङ्गवर्जितः सर्वभूतेषु निर्वैरो भ
वति स मामाप्नोति नान्यः तदुक्तं मत्स्याभिभक्तिशंसने ना
नारंगैरनेगापुयमभिलिखेत श्रिविधेणाभ्यासलभ्यं सोऽरम्य
नैवतस्मिन्नतुसरथहयमेऽडलेवेडरश्मेः नीवनेन खिलो
सांद्रं ११ कीतिमिरनिरसनेनहृदानंदमेमासाभ्यासभाजोनसलभ
मपितश्रीयहन्तेसभक्त्या ५५ अध्यायनास्येयतमात्तुष्यमि
त्यसेवेत्यपितदपनेयभूर्भुवः स्वर्महितःस्वीकारवैभवं
चाभयमस्तगानिदृष्टमिच्छास्तितेवेत् तत्स्वरूपाणातिव
गेनिहितमिहमयादत्तयादिव्यदृष्ट्यावदीनं देवदेवानिति ग्ग ११
यदुपतिनाप्रोक्तमेकादशेऽस्मिन् ॥ इति श्रीमद्देवसपडि
तस्तूर्यविरचितायांभगवद्गीताटीकायांपरमार्थप्रपायां
विश्वरूपाख्यमध्यमप्राणनिरूपणं नामैकादशोऽध्यायः ११

सुगमागीटीका ८

अधुना सर्वस्यगीताशास्त्रस्यसारभूतोऽर्थो निःश्रेयसार्थिना
मनुष्ठानाय पुञ्जीकृत्योच्यते मदीयमतत्कर्मकृत मत्प
रणया मत्प्रीत्यर्थं कर्मकारी स्वर्गादिकामनायास्ततोऽक
थमेवमितिनेत्याह मत्परमः प्राप्यत्वेननिश्चितोऽनन्यत्वे
गाद्विशेष्यसः अतएवंमामीहयामद्भक्तः सर्वात्मनमन्यो मनूं ११
सर्वकमन्येमयुक्तः पुत्रादिषुस्नेहे सतिकथंतत्येवंप्रेमस्यादि

२ श्री· गी टी· ५

द्वं

स्याह संगवर्जितः द्वं वस्तस्पृहाशून्यः शत्रुषु द्वेषेसति कथमेवंस्या
नेमाह निर्वैरः सर्वभूतेषु अपकारिष्वपि द्वेषशून्योयः समामाने
द्ववंमदनेनतरुणाल्यर्थवंसद्देवतनयमेतिनिर्मुक्ताविषयः स
न्मनस्यामस्याप्नोतीत्यर्थः निरंजनः परमंसाम्यमुपैतीतिश्रुतेः
ममसाधर्म्यमागताइतिवक्ष्यमाणत्वाच्च अयमर्थस्त्वयाज्ञातव्यि
ष्टोमयोपदिष्टोनातःपरंकिंचित्कर्तव्यमस्तीत्यर्थः ५५ इतिश्री
वनमालीकायांभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोग
शास्त्रेगीताटीकायांएकादशोध्यायः ११

अन्तमवैजयन्तीटीका ४

ननुयद्येवंतर्हिवेदतपोदानेज्यानांसाधनानांकागतिरित्यपेक्षा
यामर्थविषयाभक्त्यानेत्तानंदरूपमवेष्टुंचशक्योस्मितयाघुक
लक्षकः कीदृशोभवतीत्याशंकायामाह मत्कर्मकृदितियोम
दाराधनार्थ्यैववकर्माणिवेदतपोदानेज्यादीनिकरोतिसमत्क
र्मकृत् नत्विहामुत्रचानेकभोगकामनयायोसमत्कथमेवंनि
श्चितस्यादितिचेत्तत्राहमत्परमः अहमेवपरमः सर्वेषामुपाय
भूतानांकर्मणामुद्देश्योयस्यसमत्परमः नत्विहामुत्रचभोगेच्छु
रित्यर्थः नत्वपिपुत्रकलत्रादिषुस्नेहेसतिकथमेवंस्यादिति
चेत्तत्राहसंगवर्जितः सर्वेषुस्वानुकूलेषुप्राकृतवस्तुषुराग
रहितः नत्वशत्रुवर्गेषुद्वेषेसतिकथमेवंस्यादितिचेत्तत्राह
निर्वैरः सर्वभूतेषुस्वप्रतिकूलेष्वपिभूतेषुप्राणिषुनिर्वैरोवै
रशून्यः यतोऽसौसर्वेष्वपिमद्दर्शित्वेनद्वेष्याभावत्वमुपपन्न प
मेवेत्यर्थः ईदृशोयस्सएवमद्भक्तः समद्रवणकीर्तनादिनव
लक्षणायाभक्तेराश्रयोनान्यः ईदृशाएवपाण्डवतनयसएवचम
त्कृपाभाजनोमामसर्वेश्वरंसर्वकारणंसर्वेशाप्यंयोगिध्येयंयदा
मृजंश्रीमुकुंदमेतिमद्भावापन्निलक्षणांमोक्षंप्राप्नोतिनात्यः अ
तःपरंकिंचित्त्वयाज्ञातव्यंकर्तव्यंनास्तीत्यभिप्रायः ५५ योहि
विश्वम्भरोदेवोविश्वरूपेणमोदनम् सर्वेदानन्ततामिश्र महद
त्तेनमाम्यहम् १ इतिश्रीनियमानंदवंशावतंसश्रीकृष्णदासस्य

+ अधुना सर्वस्य गीताशास्त्रस्य सारभूतोर्थो निःश्रेयसार्थिनामनुष्ठानाय पिंडीकृत्योच्यते ॥

तेवाशिनागिरियारिदासेन विरचितायां गीतार्थकुसुममंजर्यां
नामैकादशोध्यायः ११ मधुसूदनीटीका १

+ मदर्थं कर्म वेदविहितं करोतीति मत्कर्मकृत् स्वर्गादिकामना
यां सत्यां कथमेवं स्यादिति नेत्याह मत्परमः अहमेव परमः प्रा
प्यत्वेन निश्चितो न तु स्वर्गादिर्यस्य सः अत एव मत्प्राप्त्याशया
मद्भक्तः सर्वैः प्रकारैर्मम भजनपरः पुत्रादिषु स्नेहे सति कथ
मेवं स्यादिति नेत्याह संगवर्जितः बाह्यवस्तुस्पृहाशून्यः शत्रुद्वे
षे सति कथमेवं स्यादिति नेत्याह निर्वैरः सर्वभूतेषु अपका
रिष्वपि द्वेषशून्यो यः स मामेति अभेदेन पांडव अयमर्थस्त्वया
ज्ञातुमिष्टो मयोपदिष्टो नातः परं किंचित्कर्तव्यमस्तीत्यर्थः ५५
इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीपा
दशिष्यश्रीमधुसूदनसरस्वतीविरचितायां विश्वरूपदर्शन
निरूपणं नामैकादशोध्यायः ११

सदानंदटीका ११

गीताशास्त्रस्य सर्वस्य सारभूतोर्थ आदरात् निःश्रेयसार्थिनो सम्य
गनुष्ठानाय चाधुना पिंडीकृत्योच्यते श्रीमद्धरिणा करुणाब्धिना
मदर्थं कर्म वेदोक्तं कुर्वन्यो मत्परायणः मत्प्राप्यत्वेन यस्याहं नि
श्चितो नापरोर्थकः मदेवाप्त्याशया तत्र मद्भक्तः सर्वथात्मनः मा
मेव सर्वथा प्रीत्या सर्वोत्साहेन सर्वदा सर्वात्मना यो भजते मम प्रे
म्णाविष्टमानसः पुत्रवित्तकलत्रादिभोगेषु स्नेहवर्जितः सर्वभू
तेषु मद्दृष्ट्यासक्तशत्रुमतिः पुमान् ५ स्वस्यासंतापकारादि
ष्वेतेष्वप्युपकारकृत् ईदृशो दंभशून्यो यो मद्भक्तो मामुपैति सः
६ परागतिरहं तस्य हरिरेवं न वापरा अयमर्थस्त्वया ज्ञातुमिष्टो
तत्ते मयोदितः ७ नातः परं च कर्तव्यं किंचिदित्याह पापहा हरिः ५५
सम्यग्वेदरपीनैः कृतिमते विधिनाकृतनुष्ठानतोपि स्वातः के
शैलपोभिर्निजसमकर्नकैः ब्राह्मणैर्भ्योपि दैवैः यः शक्यो नैव
लोके कथमपि द्विविजैरीदृशोस्मि हरीशः शक्यो योन्यभक्त्या
प्रविशतुं द्रष्टुं मे स कृत्स्नः स भक्तिः ५५ इति श्रीभावप्रकाशे
श्रीसदानंदविदा कृते हरिप्रसादमाहात्म्यपूर्तिर्नामैकादशोध्यायः ११

१ श्री
गी टी
५

...नंदीटीका १२

शास्त्रसर्वस्वसंग्रहणानि मत्कर्मकृदिति मदर्थमेव कर्माणि क
रोतीति मत्कर्मकृत् अहमेव परमो निष्कलः प्राप्योयस्येति मत्पर
मः एतेन कृतः त्वः कर्मयोगो ध्यानयोगश्च त्वंपदार्थशोधक उक्तः
मम भक्त आराधनकृदिति उपासनाकांडार्थसंग्रहः संगवर्जित
इत्यनेन एकांते भगवत्ध्याननिष्ठ इत्युक्तं निर्वैर इति विश्वंभग
वदात्मना पश्येदित्युक्तं अन्यथा भेदबुद्धिमतो निर्वैरत्वासंभवात्
एवंभूतो यः स मां तत्पदलक्ष्यार्थभूतमविज्ञानैकघनं प्रतिप्राप्नो
ति ममताभेदेन हेयांश इव विशुद्धवंशज तमेवैनं ज्ञात्वेति शंकोषी
तिभावः ५५ इति श्रीभीष्मपर्वणि नैलकंठीये भारतभावदीपे ए
कादशोऽध्यायः ११ ३५

सर्वप्रकरणसारभूतमर्थं सिद्धांतीकृ ...नंदीटीका र्वन्नध्यायमुप श्री
संहरति मत्कर्मकृत् श्रुतिस्मृत्युदितानि वर्णाश्रमकर्माणि मदर्पणबुद्ध्यैव करोति
न तु फलांतरार्थम् अत एव मत्परः अहमेवोपादेयो यस्य मद्भक्तः स
र्वास्ववस्थासु मय्येव समाहितचित्तः सर्वभूतेषु संगवर्जितो रागही
नः निर्वैरो द्वेषहीनः स मामेव ब्रह्मैकात्म्यं प्राप्नोति ५५ इति श्री
भगवद्गीता श्रानंदीटीकायां एकादशोऽध्यायः ११ ॥ ॥

एतमेवार्थं सिद्धांतीकृत्य सर्वत्राध्यायार्थमुप ...नंदीटीका
संहरति एवं योगाणां विशिष्टो माणिक्यश्रेष्ठफलः समामेति मद्भेदल
त्वां सिद्धिमपि गच्छति कीदृशो मत्कर्मकृत् श्रुत्वोदितानि नाति
वर्णाश्रमक्रमागतानि कर्माणि करोति किं तु मदर्थं यद्यपि पत्याम
त्वाशयेन न तु फलांतरसिद्धये अत एव मत्परो माहमेवोपादेयतया
प्रकृष्टो यस्य तत् मम मद्भावितिक्रसमस्त हेयोपादेयवस्तुविरक्तचित्त
त्वात् ममैव भक्तः सर्वावस्थासु मय्येव समर्पितांतःकरणस्तथा सदि
सर्वभूतेषु चराचरभावेषु निःसंगो रागरहितो निर्वैरो द्वेषवर्जितः
योऽसौ तत्तनयारागद्वेषविषयत्वेन सर्वे समारिभिः परिदृष्टेषु व
स्तुषु निरतिशयामृतनिर्भरं मत्स्वरूपमेव सततमनुभवति स मा
मेवेति सिद्धो मुक्तः इहोच्यते इति तात्पर्यमित्येवम् संवत्सेव स्वभावे

नवतत्वज्ञविधेरेकमेकांतन्तुइंद्रियेविद्धिभीवभेदैरितिविहितपरामर्शी
मुक्तभ्रमाणाम् स्वात्मन्येवैश्वर्येवोमणिमङ्कुरः इवव्यज्यतो वैश्वरूप्ये
स्वाध्यायस्यापनीतेस्फुटमभिमुखतो व्याख्यायैकादशस्य ५५ ॥
इतिश्रीभगवद्गीता रामकंठीटीकायां एकादशोध्यायः ११ ॥

श्रीमत्सर्वप्रशस्त्रसारुरुपदिशति॥ शांतिकी [illegible]टीका

हेपांडव एवंविधोमद्भक्तोमद्रूपामकोप्यः समांप्राप्नोति किंविधस्त्वा
ह मत्कर्मकृत् मत्प्रात्यर्थमेवाक्रपुण्यकर्मकरोति तथासंगवर्जि
तः आसक्तिरहितः तथा सर्वभूतेषु निर्वैरः मैत्र्यादिविनयादिक
र्मसंपन्नः इतिमुक्तोनेनिरोधेनमत्परमः अहमेवसर्वथाप्राप्यःस्व
र्थः अतिशिवम् महात्माप्युत्ताविश्वरूपदर्शनेसमदर्शयत् यःप्रेष्ठा
यार्जुनायैवभक्ताधीनेनमामितम् ५५ इतिश्रीभगवद्गीता
वसन्तमोटीकायां विश्वरूपदर्शनेनामैकादशोध्यायः ११ ॥

पंचोलीटीका

इदानींसर्वस्यगीताशास्त्रस्यसारंभूतोऽर्थःनिश्रेयसार्थानुष्ठेय
[illegible]त्वेनसर्वाश्वित्योच्यतेमत्कर्मइति हेपांडवयः मत्कर्मकृत्म
दर्थंकर्मकरोतिइतिमत्कर्मकृत्मत्परमः अहंपरमागतिर्यस्यस
मय्येवंप्रकारैःभजतेइतिमद्भक्तः यत्पुत्रकलत्रेषुसंगवर्जितः
प्रीतिस्नेहवर्जितः सकलभूतेषुनिर्वैरःअशत्रुभावनआत्मनः
अत्यंतापकारेहेतुनेष्वपिनिर्गतवैरस्यःयईदृशःसमामेति
ब्रह्ममेवतस्यपरागतिः ५५ इतिश्रीपंचोलेआचार्यकृतटीका
यांएकादशोध्यायः ११

[illegible]वीरसमिद्बोधिनी॥

इदानीमर्थसंग्रहवाक्यमुपदिशति मत्कर्मकृदिति मत्कर्मकृ
न्मय्येवपूर्वमेव यत्कर्मकृतवं मय्येवैतेनिहताःपूर्वमेवेत्यादि

वचनात्कृतं तद्देवकर्म करोतीति मत्कर्मकृदेव स्वधर्मत्वादिति
अथवा मदर्थं कर्म मत्कर्म तदपि स्वधर्मलक्षणं कर्म मदर्थं
मय्यर्पितभावनया कुर्वतो न ते हिंसादोषः अथवा मत्कर्म मत्तो
विश्वरूपं कर्मी[illegible]न्मां त्यक्त्वा यत्कर्म तद्देव येषां ते मत्कर्माणो महि
मत्वा मद्भक्तपाण्डवस्त्वात्कृत्त्वति भावयतीति मत्कर्मकृद्भवेति
भगवदासैव सर्वं स्वयं गतस्य निर्लेपत्वादिति तथा मत्परमः
मत्तो मत्सकाशाद्दान्तोऽस्तु भवेति शेषः यदात्रिहन्मीनानीति म
त्परमो भवेति अथवा मत्परमोऽहमेव धर्मविरुद्धं न्यरान्मोना
ति भगवदाज्ञयैव धार्तराष्ट्रान्हन्मीति बुद्ध्या मत्परमो भवेति अथ
वा मत्परमोऽहमेव परमः पूज्यो यस्य स पदत्वाद्लक्षणो भवेति
न ते कश्चिद्दोषः तथा मद्भक्तो तपव संगवर्जितो निर्लेपत्वेनेत्था
दृक्लक्षणो यस्त्वं सर्वभूतेषु सर्वेषु परापरेषु वधार्हेषु निर्वैरः
सन्नपराधेष्वदादित्यधर्मिवत्याज्ञवेति संग्राममदनग्रदः स
त्वं मामपि इतिपदमेषि इत्यागतावितिधातोः गत्यर्थास्तु ज्ञाना
र्थाः इति वचनादेषि जानासीत्यर्थो बोध्यते इति अथ पांडवेति
संबोधनपदं महाकारस्तरसप्रणश्वभावत्वाद्धिगतस्वधर्मा
चरणविषयसंदिग्धचित्तमलत्वसंभावनाप्रतिपादनार्थमि
ति विश्वरूपदर्शनमाहात्म्यात्पांडवः संजातसमग्राह्लादः
स्वधर्माचरणसमुत्सुको बभूवेतिभावः ५५ इति श्रीरत्न
वीरसमिद्धोपिन्यां श्रीगीताव्याख्यायां विश्वरूपदर्शनं ना
मैकादशोऽध्यायः ११

समुभाष

५५ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भ
गवद्गीताभाष्ये एकादशोऽध्यायः ११॥

भाषा अनुवाद

अब शास्त्र के अर्थ का सारांश परम रहस्य कहते हैं कि हे पाण्ड
व मत्कर्म कृत कहे मेरी प्रीति के अर्थ जो कर्म करै है और
मत्परम कहे मैंही हौं परम प्रयोजन जिसको और मद्भक्त क
हे मेरे आश्रित यथा पुत्र स्त्री धन मे आशक्ति हीन और भूत
कहे प्राणि मात्र मे वैर रहित जो है सोई हमको प्राप्त होता है
५५ इतिश्रीजगन्नाथ शुक्ल विरचितायां मनभावनीटीकायां
एकादशोध्यायः ११

दोहा

मोरे कर्मपरमहिसंगत जहो मो भक्त सभीजीव मे वैर
विनसो पांडव मो प्राप्त ५५ ॥